**DIPLOMA IN SANSKRIT**
**Paper - II (Part - B)**

# RAGHUVAMSAM

*($2^{ND}$ SARGA)*

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha
Tirupati - 517 501(A.P.)

# अंशः-I;रघुवंशः द्वितीयसर्गः -परिचयः

**संरचना**


**१.०.परिचयः**
**१.१. लक्ष्याणि**
**१.२.कालिदासः - रघुवंशम्**
**१.२.१. कालिदासस्य समयः**
**१.२.१. कालिदासस्य स्थानिकता**
**१.२.१. कालिदासस्य रचनाः**
**१.२.१. कालिदासस्य कविता**
**१.३.रघुवंशस्य परिचयः**
**१.३.१. रघुवंशस्य वैशिष्ट्यम्**
**१.३.२. रघुवंशस्य द्वितीयसर्गकथासंक्षेपः**
**१.३.३. पाठ्यांशनेपथ्यम्**
**१.३.३. द्वितीयसर्गस्य कथासङ्ग्रहः**
**१.३.४. रघुवंश-द्वितीयसर्गस्य वैशिष्ट्यम्**
**१.४.उपसंहारः**
**१.५.अभ्यासः**


## १.०.परिचयः

संस्कृतं वाङ्मयं द्विविधं भवति ।लौकिकम् अलौकिम् चेति. लौकिकं नाम लोकेन=जनेन निर्मितम्, लौकिकम्,अतः तदीयं लौकिकं वाङ्मयं भवति। यच्च लोकेन निर्मितम् न भवति तत् अलौकिकम् । वेदाः पुरुषनिर्मिताः न भवन्ति,ते अलौकिकाः। अतः तत् , अलौकिकम् वाङ्मयं भवति। लौकिकं च पुनः पुराण इतिहास काव्यादि भेदेन अनेकविधं न भवति। वेदाः प्रभुसम्मिताः , ते शासनं कुर्वन्ति। इतिहासपुराणानि च मित्र सम्मिताः, मित्रं स्वीकरोतु वा न वा , हितं मात्रं बोधयन्ति ।काव्यानि तु न तथा। एतानि कान्तासम्मितानि। कान्ता नाम प्रिया। सा हि मनः आकर्षति। विषयपरिग्रहणाय मनः अनुकूलम् आरचयति ।कदापि अप्रियं न वदति. अवसरे जाते अपि प्रीतिकरं कृत्वा अनुनयपुरस्सरं कथयति। काव्यनि एवम् अर्थम् उपस्थापयन्ति अतः विषयपरिग्रहणाय काव्यानाम् अध्ययनस्य आवश्यकता जाता।

## १.१. लक्ष्याणि

भाषा + कला =काव्यं भवति। सत्यम् शिवम् सुन्दरम् इति हि काव्यस्य मौलिकं स्वरूपम्। सत्यम् नाम वास्तविकता। शिवम् नाम सामाजिकसङ्क्षेमः ,विश्वश्रेयश्च। सुन्दरम् नाम कलात्मता। तथाच वास्तविकता सामाजिकसङ्क्षेमदृष्ट्या वा ,विश्वस्य श्रेयसम् अभिलक्ष्य वा

पाठकजनानां हृदयाकर्षक यथा भवतितद्रीत्या कलात्मतया वर्णनं वा, कथनं वा अत्र भवति। तेन च उद्दिष्टं विश्वस्य श्रेयस्साधनरूपं लक्ष्यं च साधयति। कलात्मकतायाः आस्वादनाय, अनुभूत्या विषयपरिग्रहणाय च काव्यस्य अध्ययनं क्रियते।

## १.२.कालिदासः - रघुवंशम्

संस्कृतलौकिकसाहित्ये वाल्मीकिः आदिकविः। तदनन्तरश्च व्यासः। उभौ अपि एतौ वैदिकम्, वैज्ञानिकम्, आध्यात्मिकम्, आधिभैतिकं च समाचारं इतिहासरूपेण ,पुराणनाम्ना ग्रन्थस्थं कृतवन्तौ। तथा वाल्माकिः व्यासश्च अखणडवैज्ञानिकभाण्डागारस्य परिरक्षकौ जातौ। तदर्थं तयोः भारतीयाः ऋणग्रस्ताः एव। तस्यैव समाचारस्य अभ्युदयकरत्वम् , आनन्ददायकत्वं च संसाध्य, मनोहरतया स्वीयकवितामहिम्ना मानवानां श्रेयोमार्गं दर्शितवान् कालिदासः। संस्कृत साहित्ये अस्य स्थानम् अद्वितीयम्, अनिर्वचनीयं च। शास्त्रीयता,सहजता, सुन्दरता, सरसता, सरलता, सूक्ष्मता, स्पष्टता, सन्देशात्मकता, सांस्कृतिकतादीनि कालिदासस्य स्थूलानि कविता लक्षणानि।प्रमादवशादपि अस्य कवित्वं कविताधर्मं न जहाति।एवं विशिष्टरूपेण काव्यप्रक्रियया संस्कृतिपरिरक्षणाय, मानवानाम् अभ्युदयाय , च प्रयत्नितवन्तं महनीयं कालिदासम् अधिकृत्य किञ्चित् ज्ञास्यामः।

### १.२.१कालिदासस्य समयः

कालिदासस्य जीवनकालविषये साहित्यचरित्रकाराणाम् एकाभिप्रायः नास्ति। केचित् अमुं क्रीस्तोःपूर्वं अष्टमशतकीयं मन्यन्ते। अन्ये केचित् क्रीस्तोः पूर्वं तृतीयशताब्दीनं तर्कयन्ति। अपरे केचित् क्रीस्तोः परं षष्ठशताब्दीयं चिन्तयन्ति।कतिपयभारतीय-साहित्यचरित्रकाराणाम् अभिप्रायानुसारं अयं क्रीस्तोः पूर्वं १५० कालीनः।'गर्दभिल्लु'नामकस्य सन्ततिः विक्रमादित्यः।सः शकान् निर्जित्य पितुः आकृष्टं राज्यं पुनः स्वाधीनं कृत्वा क्री.पू.५६संवत्सरे विक्रमशताब्दं स्थापितवान्।तस्य आस्थाने कालिदासः आसीदिति बहूनां भारतीयानाम् अभिप्रायः।

एवम् आहत्य एते भिन्नाभिप्रायाः क्री.पू.प्रथमशतकात् प्रभृति क्री.प.षष्ठशतकस्य मध्यकाले यत्र कुत्रापि कालिदासः स्यात् इति स्थूलतः निर्धारणाय आगन्तुम् उपकुर्वन्ति। अस्य कालविषये स्थूलाभिप्रायः एव शरणम्। इदम् इत्थम् इति विशिष्य वक्तुम् अर्हम् प्रामाणिकं समाचरं तु नास्त्येव।

### १.२.२.कालिदासस्य स्थानिकता

अस्य स्थानिकता अपि चर्चाविषय एव आसीत्। अयं काश्मीरदेशीयः इति केचित्, वङ्गदेशीयः इति अन्ये केचित् कथयन्ति। मेघदूते कालिदासः अनुभूत्या उज्जयिनीं वर्णयति। अतः केचित् अमुं मध्यभारतदेशवासिनं मन्यन्ते।निर्दिष्टः आधारस्तु नैव उपलब्धः।अयं यत्र कुत्रापि वा भवतु ,अस्य समग्रं भारतं सुपरिचितम् । भारते देशे कुत्र कः आचारः प्रचलति,तस्य भौगोलिकांशाः के इत्यादिकं सम्यक् अयं जानाति। अत एव भिन्नभिन्नप्रान्तीयाः अपि इमम् आत्मीयं कथयन्ति।

### १.२.३.कालिदासस्य रचनाः

कालिदासस्य रचनाः इति नाम्ना बहूनि काव्यानि,नाटकानि ,मन्त्रशास्त्रग्रन्थाः, ज्योतिश्शास्त्रग्रन्थाःबहवः प्रचारे सन्ति।तेषु सप्तैव कालिदासस्य रचनाः। इतरग्रन्थाः सर्वे अपि प्रचारार्थं कालिदासस्य नाम्ना प्रकटितवन्तः इति साहित्यविमर्शकानाम् अभिप्रायः। एतेषु चत्वारि श्रव्यकाव्यानि, त्रीणि दृश्यकाव्यानि (रूपकाणि) । १). ऋतुसंहारःम् २). कुमारसम्भवम् ३). मेघसन्देशम् ४). रघुवंशम् इति इमानि क्रमेण श्रव्यकाव्यानि भवन्ति।
१). मालविकाग्निमित्रम् २).विक्रमोर्वशीयम् ३). अभिज्ञानशाकुन्तलम् इति इमानि दृश्यकाव्यानि। रचनाक्रमम् अनुसृत्य यदि परिशीलयामः, तदा ऋतुसंहारम् -कुमारसम्भवम् -मालविकाग्निमित्रम् एतानि च त्रीणि कवितानिर्माणप्रारम्भदशायाम् उपनिबद्धानि । मेघसन्देशम् विक्रमोर्वशीयम् एतत् द्वयं च प्रौढे वयसि रचितम् । रघुवंशम् - अभिज्ञानशाकुन्तलम् परिपूर्णं लोकानुभवं सम्पाद्य उत्तमजीवनविधानम् च अभ्यस्य रचितं स्यात् इत्याभाति ।

### १.२.४.कालिदासस्य कविता

कालिदासस्य कवित्वं सरसम् सरलम् सहजम् सुन्दरञ्च। आस्वादनार्हम्,अनुभूतिजनकं च।शास्त्रीयाः,वैज्ञानिकाः च बहवः विषयाःकान्तासम्मिततागुणं वहन्ति।अस्य उपमाः प्रकृतं स्पष्टम् अवगमयन्ति।अस्य अथान्तरन्यासः लोकानुभवं वहति।अस्य उत्प्रेक्षाः पाठकानां भावनां प्रभावपूर्णं कुर्वन्ति।अस्य कवित्वं पाठकमनस्सु रससफूर्तिं जनयति। सांस्कृतिकताम् ,साम्प्रदायकताम्, सनातनताम्,पदे पदे पोषयति।

## १.३.रघुवंशस्य परिचयः

कालिदासस्य श्रव्यकाव्येषु उत्तमम् इदम्। इदं पञ्चमहाकाव्येषु अन्यतमम्, प्रथमञ्च।अस्मिन् एकोनविंशति(१९)सर्गाः विद्यन्ते।१५६९श्लोकाश्च सन्ति।अत्र दिलीप,रघु,अज,दशरथ,श्रीराम,कुश,अतिथि,अग्निवर्णप्रभृतीनां सूर्यवंशीयानां राज्ञां चरितं विस्तरेण, इतरेषां एकविंशतिसंख्याकानां तद्वंशीयानामेव राज्ञां सङ्ग्रहेण; एकस्मिन्नेव अष्टादशतमे सर्गे उपनिबद्धम्।अस्य च मल्लिनाथः सञ्जीविनीनाम्ना व्याख्यां कृतवान्।

### १.३ १.रघुवंशस्य वैशिष्ट्यम्

इदं काव्यं कथावस्तुदृष्ट्या,कवितादृष्ट्या च महत्वपूर्णम्। अत्र च वस्तु आजन्मशुद्धानां सूर्यवंशीयानां राज्ञां चरितम्। तत्र केषाञ्चन श्रद्धासक्तयः वर्णिताः।कतिपयानां पराक्रमः वर्णितः। अन्येषां त्यागनिरतिः वर्णिता।कुत्रचित् शिष्याणां वृत्तान्तम् अभिवर्णितम्।एतत् पाठकानां मनस्सु संस्कारं जनयति।शास्त्रीयाः विषयाः सहजरूपेण कलात्मकतां नीताः।अत्र च यथावकाशं नवरसाःपुष्टिं नीताः।अत्र च सम्भाषणम् सरलम्,व्यक्तीकरणं च स्पष्टम्।सन्निवेशकल्पनं मधुरम्।

## १.३.२.रघुवंशस्य द्वितीयसर्गकथासंक्षेपः

**पाठ्यांशनेपथ्यम्**

भारतीय-इतिहासे राजवंशद्वयं प्रख्यातम् अस्ति।सूर्यवंशः चन्द्रवंशः च इति।तत्र सूर्यवंशे मनुः महीक्षिताम् आद्यः भवति । तत्रैव राजपरम्परायां दिलीपः जायते ।सः सकलगुणसम्पन्नः, आदर्शप्रभुः। तस्य च भार्या सुदक्षिणा। तयोः चिरं सन्ततिः न भवति । सुदक्षिणा दिलीपौ सन्ततिस्तम्भकारणं ज्ञातुं इच्छतः। रघुवंशीयानां पुरोहितः वसिष्ठः। सः सर्वासां दैवीनां मानुषीणां च समस्यानाम् ,अपहारकः। राज्यभारं मन्त्रिषु निक्षिपतः। सन्तानार्थाय विधये वसिष्ठस्य आश्रमं गच्छतः। राजदम्पती अरुन्धत्या अन्वसितं वसिष्ठं प्रणम्य कारणं निवेदयतः। वसिष्ठश्च दिव्यदृष्ट्या विषयं परिजानाति । कामधेनौ पूज्यपूजाव्यतिक्रमणम् अनुष्ठितम्। अतः कामधेनोः शापपीडितौ जातौ इति वसिष्ठः राजदम्पत्योः सन्ततिस्तम्भकारणं ज्ञापयति । अनन्तरञ्च कामधेनोः अनुग्रहसम्पादनेन सन्ततिप्राप्तिं संसूचयति। नन्दिन्याः सेवाव्रताचरणदीक्षां समादिशति । आवासं च तयोः आश्रमे एव कल्पयति । सुदक्षिणा दिलीपौ वसिष्ठस्य समादेशनं शिरसि धारयतः। महर्षिकल्पितं आवासं च स्वीकुरुतः। रात्रिं च तत्रैव यापयतः । अन्तरभागः एव अस्माकं इदानीं पाठ्यांशः -

## १.३.३.द्वितीयसर्गस्य कथासङ्ग्रहः

सुदक्षिणादिलीपौ गोसेवाव्रताचरणाय प्रभाते एव उत्तिष्ठतः।सुदक्षिणा श्रद्धया नन्दिनीम् पूजयति। दिलीपः भक्त्या नन्दिनीम् वनाय विसृजति। अरण्ये च तस्याः समाराधने तत्परः भवति। छाया इव नन्दिनीम् अनुगच्छति च।नन्दिन्याः संरक्षणव्याजेन दुष्टसत्वान् दमयति। अरण्यं प्रभावपूर्णं करोति।तत्र आरण्यकं समादरणं च अनुभवति ।

नन्दिनी बहुलार्थसाधिका। सायं आश्रमे नन्दिन्याः अवसरः वर्तते। अतः वेलाम् अनतिक्रम्य नन्दिनी आश्रमं गच्छेत्। दिलीपः तदवगमनशीलः, अतः ताम् अनुसरति। आश्रमे च सुदक्षिणा नन्दिनीं प्रत्येति, प्रदक्षिणम् आचरति। प्रणमति। शृङ्गान्तरम् अलङ्कृत्य अर्चयति च। नन्दिनी च स्तिमिता सती सपर्यां स्वीकरोति। दिलीपश्च नन्दिन्याः समाराधनगतविशेषान्, संरक्षणे स्वीकृतान् उपायान् च प्रतिदिनं वसिष्ठाय निवेदयति। ततश्च रात्रौ पुनः दीपम् आरचयति। नन्दिन्याः आवश्यकम् आहारं च समायोजयति।गृहिणीसहायः सन् नन्दिन्याः एव पार्श्वे निद्राति । पुनः प्रातः उत्थिताम् नन्दिनीम अनुसृत्य उत्तिष्ठति।

एवं नन्दिन्याः समाराधने दिलीपस्य एकविंशतिदिनानि अतीतानि भवन्ति।नन्दिनी च गुरौ भक्तिभावम्, स्वस्याम् अनुकम्पां च ज्ञातुकामा भवति। मायां च कल्पयति। अनुपदमेव हिमालयगुहासु प्रविशति।दिलीपोपि अनुगच्छति। तत्र क्रूरमृगैःनन्दिनी दुष्प्रधर्षा इति दिलीपस्य प्रगाढः विश्वासः वर्तते। अतः दिलीपः हिमालयस्य सौन्दर्यावलोकने तत्परो भवति। परम् अत्रान्तरे सिंहः कश्चन नन्दिन्याम् उत्पतति। पादाक्रान्तं च करोति। नन्दिनी विवशा भवति। भयम् आप्नोति। रक्षणाय आक्रन्दति च। दिलीपश्च चकितः भवति। हठात् दृष्टिं निवर्त्य

नन्दिन्याम् उपरि सिंहं पश्यति। आन्दोलितो भवति। क्षणात् अप्रमत्तः भवति। अनुपदमेव सिंहं हन्तुम् इच्छति।तस्य वधाय शरम् उद्धर्तुं तूणीरे हस्तं निक्षिपति। हस्तश्च तत्रैव, तथैव संसक्तो भवति। दिलीपश्च बाहोः प्रतिष्टम्भे आश्चर्यम् अनुभवति। असमर्थैः स्वतेजोभिः अन्तर्मथितः भवति।

एवमं हन्तुम् उद्यम्य ,असमर्थो भूत्वा अन्तर्दहन्तं दिलीपं सिंहः एवमं भाषितुम् आरभते।

महीपाल दिलीप अलं श्रमेण।प्रयासः मास्तु। प्रयुक्तमपि अस्त्रं वृथा भवति।अहं परमेश्वरस्य किङ्करः। नाम्ना कुम्भोदरः। वृषभाधिरोहणे नित्यं सहायकः। परमेश्वरः मम पृष्ठे पादं न्यस्यैव वृषभम् अधिरोहति। राजन् इमं पश्य । अयं देवदारुः। इमं पार्वती पोषितवती। तेन असौ वृषभध्वजेन पुत्रीकृतः।कदाचित् अस्य त्वक् वनद्विपेन उन्मथिता। पार्वती उन्मथितत्वचं देवदारुं दृष्ट्वा दुःखितवती। तदा प्रभृति वनद्विपानां त्रासार्थम् परमेश्वरेण अत्र अहं नियुक्तः। परमेश्वरस्य निर्देशानुसारं च इयं धेनुः मम आहारः भवति। लज्जां विहाय निवर्तस्व -इति।

परमेश्वरस्य प्रभावेण अहम् असमर्थः जातः इति दिलीपः आत्मनि अवज्ञां शिथिलीकरोति। स्वपराक्रमेषु विश्वासं च प्रपूर्य, सिंहं प्रति एवं ब्रवीति । मृगेन्द्र ! अहं किञ्चित् विवक्षुः अस्मि। मम परमेश्वरः मान्यः एव। तस्मिन्नेवसमये गुरोः इयम् धेनुरपि अनुपेक्षणीया। मदीयेन देहेन बुभुक्षाम् अपनुदतु। महर्षेः इयं धेनुः विसृज्यताम् इति विज्ञापयति।

राजेन्द्र ! दिलीप ! एकच्छत्राधिपत्यं सार्वभौमाधिकारः, प्रतिष्ठाकरं प्रजानाम्,आदरणम्,सुन्दरञ्च शरीरम्, नवं वयः च,एतत् महत् ऐश्वर्यम्।एतत्सर्वं अल्पस्य हेतोः हातुं अभिलषसि। दिलीप ! "यद्यपि भवान् कारुणिकः,तथापि भवतः कारुणिकतादृष्ट्या अधिकाधिकं एका गैः परिरक्षिता भवति। जीवन् पुनः उपप्लवेभ्यः प्रजाः पासि।एकस्याः गोः अपराधविषये गुरोः दण्डनात् बिभेषि, भवतः सकाशे घटसदृशऊधवत्यः गावश्च कोटिशः सन्ति।ताः समर्प्य गुरोः कोपं परिहर्तुं समर्थः असि। अतः दिलीप ! देहार्पणप्रयत्नात् विरमतु बलसम्पन्नम् इमं देहं अखिलजगत् त्राणाय परिरक्षतु इति मृगेन्द्रः दिलीपम् सन्दिशति।दिलीपस्तु क्षात्रधर्मं निवेदयति। स्वदेहार्पणायैव सिद्धो भवति। नन्दिनी च सम्मतिं सूचयति। दिलीपश्च देहम् अर्पयति। अत्रान्तरे पुष्पवृष्टिः।दिलीपस्य भक्त्या , अनुकम्पया च नन्दिनी प्रीता भवति। प्रसन्ना च भवति। दिलीपाय पुत्रसन्ततिं च अनुगृह्णाति। सुदक्षिणादिलीपौ च गुरोः आदेशेन व्रतं समाप्य राजथानीं च प्रस्थितौ भवतः।

## १.३.४.रघुवंशद्वितीयसर्गस्य वैशिष्ट्यम्

यद्यत् आचरति श्रेष्ठः तत्तदेवेतरो जनः , यथा राजा तथा प्रजाः,इति हि कथनानि आदर्शपुरुषाणां बाध्यतायुतप्रवर्तनम् प्रकटयन्ति। अत्र च सर्गे दिलीपः सूर्यवंशीयः आदर्शप्रभुः। मानवाभ्युदयकरः आदर्शभूतः दिलीपस्य कश्चन जीवितघट्टः सन्ततिप्राप्त्यात्मकः अत्र अभिवर्णितः। अनेन च घट्टेन सार्वभौमस्सन्नपि गुरोः आदेशपालनम्, आदेशपालने निबद्धता, प्राणत्यागाय अपि सिद्धो भूत्वा गुरोः आदेशस्य संरक्षणम्, इत्यादयः श्रेयोदायकाः गुणाः अत्र

वर्णिताः सन्ति।ते च पाठकानाम् आलोचनाय , अभ्यसनाय च उपकुर्वन्ति।

श्रद्धा-भक्ति-विनय-विधेयता-मर्यादाक्रमपालनादीनीम् संस्काराधायकानां गुणानामभ्यसनाय अध्ययनम् अत्र प्रवर्तते।तच्च मानवताविकासाय,व्यक्तित्वाभ्युदयाय च कल्पते।समर्पण- समाराधन -स्वीकरणादीनां महनीयतासम्पादकानां गुणानां कथाप्रसङ्गेन बोधनं अत्र भवति।

सरससम्भाषणम्,सरलसम्भाषणम्,सुन्दरसम्भाषणम् , व्यक्तीकरणपूर्णं सम्भाषणम्, व्यक्तित्वाधायकं च सम्भाषणम् अत्र उपनिबद्धम् विद्यते।उपमा- अर्थान्तरन्यास-श्लेषादीनाम् अलङ्काराणां सन्निवेशानुगुणं संरचनम् अत्र अस्ति।

श्रव्यकाव्येप्यत्र सरससम्भाषणमाध्यमेन नाटकीयतागुणः, सन्दर्शनीयतागुणश्च संसाधितः। अत्र च प्रतिपद्यं मानवाभ्युदयकरस्यैव विशेषांशस्य ख्यापकं भवति।

अत्र च वैज्ञानिकांशानां बोधनमपि सम्पन्नम्। आयुर्वेदे पञ्चगवस्य (गोः विकाराः,पय,दधि, घृतम्,मूत्रम् )महत् स्थानं विद्यते। तत्सेवनेन जन्युसम्बन्धिनः बहवः रोगाःउपशमिताः भवन्ति।प्रकृते जन्युसम्बन्दना रोगेण पीडितायाः सुदक्षिणायाः गोः(नन्दिन्याः )सेवनं वसिष्टेन सन्दिष्टं स्यात्। एतत् वैज्ञानिकमेव अंशं दृष्टौ निधाय एव द्वितीयसर्गस्य कथा प्रचलिता स्यात्।

## १.४.उपसंहारः

एवम् अत्र कालिदासस्य सङ्ग्रहः परिचयः,दत्तः।मौलिकं तस्य कवितावैशिष्टं च दर्शितम्। स्थूलतः रघुवंसस्य परिचयः वैशिष्ट्यादिकं च लब्धम्।पाठ्यांशस्यापि सङ्ग्रहस्वरूपम् च अधिगतम्।

## १.५.अभ्यासः

अ)कालिदासस्य रचनाः कति ? ताः च काः?

इ)रघुवंशे द्वितीयसर्गस्य वैशष्ट्यं कीदृशम् ?

* * *

# अंशः-II; नन्दिन्याः प्रभातसेवनम्

संरचना

२. ०. परिचयः
२.१ .लक्ष्याणि
२. २.नन्दिन्याः प्रभातसेवनम्
२.२.१. नन्दिन्याः अर्चनम्
२.२.२. नन्दिन्याः अनुसरणम्
२.२.३. नन्दिन्याः रक्षणम्
२.२.४. मनुवंशसन्ततेः पराक्रमः
२.२.५. नन्दिन्याः समाराधनम् -१
२.२.६. नन्दिन्याः समाराधनम् -२
२.३.उपसंहारः
२.४.अभ्यासः

## २.० परिचयः

"नन्दिन्याः प्रभातसेवनम् " इत्ययं पाठ्यांशः रघुवंशे- द्वितीयसर्गे वर्तते । तत्र च अयं पाठ्यांशः प्रथमश्लोकात् आरभ्य षष्ठश्लोकपर्यन्तं (१-६) परिमितः भवति ।अत्र च प्रधानतया सुदक्षिणा -दिलीपयोः नन्दिन्याः अर्चनम् ,सुदक्षिणायाः नन्दिन्यनुसरणम्, दिलीपस्य नन्दिन्याः रक्षणम्, मनुसन्ततेः पराक्रमम्, आश्रमे दिलीपस्य नन्दिन्याः सेवनम्, इत्येताः विषयाः बोध्यन्ते

## २.१ लक्ष्याणि

मानवस्य सम्पूर्णव्यक्तित्व- विकासाय कार्यसामर्थ्यवर्धनाय च श्रद्धाभक्तिः-विनयः -विधेयता इत्येते गुणाः अपेक्षिताः ।एतेषां अभ्यसनं मानवं सुखसम्पन्नं नागरिकं,क्रमशिक्षणायुतं च करोति । तत्र श्रद्धा नाम त्रिकरणशुद्धिः। मनसि-वचसि-काये निष्कपटं पवित्रपूर्णं प्रवर्तनम् ।तस्यैव अङ्कितभावः इति व्यवहारः ।श्रद्धा मनसि निश्चलतां निर्मलतां च पूरयति ।वाचि सत्यं सिञ्चति । काये अलसतां अपनुदति ।कर्मसु सामर्थ्यं वर्धयति ।मानवं दीक्षितं करोति ।विशेषपूर्णः अयं गुणः सप्रयत्नं साधनीयः अस्ति ।श्रद्धा ज्ञानसाधिका भवति ।"श्रद्धवान् लभते ज्ञानम् - श्रद्धया परयोपेताः ते मे युक्त तमाः मताः "इत्यादि भगवद्गीता वचनमपि समग्रतासाधनाय मानवस्य श्रद्धायाः आवश्यकतां प्रकटयति ।भक्तिः नाम अनन्यमनसा भजनं,सेवनम्। अयं गुणः मनसः विषयान्तरसम्पर्कं वारयति। इष्टे च विषये मनः एकाग्रं करोति ।विनम्रः नम्रता स्वभावः। स च प्रायेण विद्यासमुपार्जनेन अभ्यस्तो भवति ।विनयगुणः मानवस्य समाजे योग्यतां -गौरवं च कल्पयति ।विधेयता च वृद्धोपसेवनम् ।

"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि सम्प्रवर्धन्ते आयुः विद्या यशो बलम् ।। "

अत्र श्रद्धा -भक्ति -विनय -विधेयता-गुणाः मानवाभ्युदयाय आवश्यकाः।तेषाम् अध्ययनम् अध्यापनञ्च श्रेयसे कल्प्यते।एतत्पाठ्यांशस्य अध्ययनेन-

- सुदक्षिणा -दिलीपयोः नन्दिन्याः अर्चनं प्रति ज्ञातुं प्रभवति ।
- श्रुति-स्मृत्योः स्वरूपं अवगन्तुं समर्थो भवति।
- दिलीपस्य नन्दिन्याः रक्षणं प्रति भाषितुं समर्थो भवति।
- मनुसन्ततेः पराक्रमं लिखितुं समर्थो भवति।
- आश्रमे दिलीपस्य नन्दिन्याः सेवनं प्रति पठितुं समर्थो भवति।

## २. २.नन्दिन्याः प्रभातसेवनम्

### २.२.१. नन्दिन्याः अर्चनम्

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम्।
वनाय पीतप्रतिबद्धवत्साम् यशोधनो धेनुमृषेः मुमोच।। १ ।।

श्लोकपरिचयः -अयं श्लोकः रघुवंशे च महाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः - निशायाः यापनानन्तरं राजदम्पती सुदक्षिणादिलीपौ नन्दिन्याः सेवाव्रताचरणे उद्युक्तौ। 'सुदक्षिणा च नन्दिनीं अर्चितवती' इत्यंशं निरूपयन् अयं श्लोकः"नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे,नन्दिन्याः प्रभातसेवनम्" इति पाठ्यांशे वर्तते।

पदविभागः अथ, प्रजानाम्, अधिपः,प्रभाते, जायाप्रतिग्राहितगन्धमाल्याम्।
वनाय, पीतप्रतिबद्धवत्साम्, यशोधनः धेनुम्, ऋषेः मुमोच ।।

अन्वयक्रमः अथ,प्रभाते,यशोधनः,प्रजानाम्,अधिपः,जायाप्रतिग्राहितगन्धमाल्याम्,पीतप्रतिबद्धवत्साम् ऋषेः ,धेनुम्, वनाय, मुमोच।

प्रतिपदार्थः -अथ = निशायाः यापनानन्तरम्, प्रभाते = प्रातः काले, यशोधनः = कीर्तिसम्पन्नः, प्रजानाम् = जनानाम्, अधिपः = पालकः राजा दिलीपः, जाया-प्रतिग्राहित-गन्धमाल्याम्, जाया = भार्यया सुदक्षिणया, प्रतिग्राहित = समर्पितः, गन्ध = सुगन्धः, माल्याम् = पुष्पमाला च यस्याः ताम्, पीत = चूषिता, प्रतिबद्ध = अनन्तरं आश्रमे एव गोशालायां प्रतिबन्धिता,वत्साम्= वत्सा यस्याः ताम्, मुनेः = वसिष्ठस्य, धेनुम् = नन्दिनीम्, वनाय = अरण्यं गन्तुम्, मुमोच = विससर्ज।

श्लोकभावः - इक्ष्वाकूणां गुरुः वसिष्ठः । सः तेषाम्, मानवीयानां दैविकानां च आपदां प्रति-कर्ता । अतः सुदक्षिणादिलीपौ वसिष्ठस्य आदेशं शिरसि धृतौ । आश्रमे समायोजितम् आवासं एव स्वीकृतौ । नन्दिन्याः सेवाव्रताचरणाय उद्युक्तौ च आस्ताम् । ताभ्यां हि निशा यापिता। प्रातश्च भवति । सुदक्षिणा भक्त्या श्रद्धया च नन्दिनीं सम्पूजयति। मुखं चन्दनेन लिम्पति।

कण्ठं च मालया अलङ्करोति। वत्सश्च प्रातः कालिकं पयः पायितः। तत्रैव गोशालायाः प्रतिबन्धितश्च। एवं दिलीपः आश्रमे नन्दिनीसम्बन्धितान् लाञ्छनान् समाप्य,समाराधयितुं नन्दिनीं वनाय मुञ्चति।

व्याकरणांशाःसमासः -यशोधनः यशः एव धनं यस्य सः = बहुव्रीहिसमासः.।

| **स्वावलोकनप्रश्नाः -** |
|---|
| १. प्रजानाम् अधिपः कः ? |
| २.ऋषेः धेनुः का ? |

## २.२.२ नन्दिन्याः अनुसरणम्

तस्याः खुरन्यासपवित्रपांशुम्-अपाशुलानां धुरि कीर्तनीया।
मार्ग मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।। २ ।।

श्लोकपरिचयः-अयं श्लोकः रघुवंशे महाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम्। अस्य च रचयिता कालिदासः।अस्य विषये'उपमा कालिदासस्य' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः-"दिलीपः नन्दिनीं वनाय मुञ्चति। तां च सुदक्षिणा अनुसरति"इत्यंशं निरूपयन् अयं श्लोकः'नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे,नन्दिन्याः प्रभातसेवनम्"इति पाठ्यांशे वर्तते।

पदविभागः ; तस्याः ,खरन्यासपवित्रपांसुम्, अपांसुलानाम् ,धुरि, कीर्तनीया, ।
मार्गम्, मनुष्येश्वरधर्मपत्नी, श्रुतेः, इव ,अर्थम्, स्मृतिः, अन्वगच्छत् ।।

अन्वयक्रमः ; अपांसुलानाम्, धुरि, कीर्तनीया, मनुष्येश्वरधर्मपत्नी, खुरन्यासपवित्रपांसुम्, तस्याः मार्गम्, श्रुतेः, अर्थम्, स्मृतेः, इव, अन्वगच्छत्।

प्रतिपदार्थः ; अपांसुलानाम् = पतिव्रतानाम्; धुरि = अग्रे, पुरतः. प्रथमम्; कीर्तनीया = प्रशंसनीया, मनुष्येश्वरधर्मपत्नी; मनुष्येश्वर = प्रजानामधिपस्य दिलीपस्य; धर्मपत्नी = भार्या सुदक्षिणा; खुरन्यासपवित्रपांसुम्; खुरन्यास = पादानां अर्पणेन; पवित्र = पवित्रीकृता; पांसुम्= धूलिः यस्य तम्; तस्याः = नन्दिन्याः; मार्गम् = पन्थानम्; श्रुतेः =वेदस्य; अर्थम् =अभिप्रायम्; स्फूर्तिम्; स्मृतिः = पराशर-याज्ञवल्क्य-मनु प्रभृतीनां स्मृतिग्रन्थः; इव = यथा; अन्वगच्छत् = अनुसृता ; श्लोकभावः ;दिलीपः प्रजाभिमतः पालकः । तस्य धर्मपत्नी सुदक्षिणा । सा च स्वीयप्रवर्तनेन, श्रद्धा - आसक्तिभ्यां च पतिव्रतानां मध्ये प्रथमं परिगणनीया जाता । समाराधनाय च दिलीपः नन्दिनीं वनाय च मुञ्चति।तत्र च आश्रममार्गः नन्दिन्याः पादार्पणेन पवित्रः सम्पन्नः। तं च मार्गम् अनन्यभक्त्या सुदक्षिणा अनुसृतवती ।

**रघुवंशः द्वितीयसर्गः**

श्रुतिः वेदग्रन्थः।स च सर्वत्र सूक्ष्मभूतः, तदर्थश्च विवरणं विश्लेषणं च विना अवगन्तुं नैव शक्यते। अतः तदाशयस्य बहिरानयनार्थं अवतीर्णः ग्रन्थसमुदायः स्मृतिः। स च सर्वदा वेदोक्तार्थपरतयैव विषयान् उपस्थापयति । एवं प्रकृते स्मृतिः यथा वेदोक्तार्थम् एव अनुगच्छति, तथा सुदक्षिणा अपि नन्दिनीक्षुण्णं मार्गम् एव अनुगच्छति इति भावः।

व्याकरणांशाः ;-सन्धयः ;मनुष्येश्वर...; मनुष्य + ईश्वर...(अ + ई = ए) गुणसन्धिः।

अन्वगच्छत्; अनु + अगच्छत् (उ + अ = व् )यणादेशसन्धिः।

समासाः ;मनुष्येश्वरः;मनुष्याणाम् ईश्वरः =षष्ठीतत्पुरुषसमासः।

मनुष्येश्वरधर्मपत्नी;मनुष्येश्वरस्य धर्मपत्नी =षष्ठीतत्पुरुषसमासः।

कोशः; -पांसुला; स्वैरिणी पांसुला इति अमरः ।

**स्वावलोकनप्रश्नाः;**

१.. अपांसुलानां धुरि कीर्तनीया का ?

२. सुदक्षिणा नन्दिनीं कथम् अन्वगच्छत् ?

## २.२.३ नन्दिन्याः रक्षणम्

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुस्समुद्राम् जुगोप गोरूपधरामिवोर्वीम् ।। ३ ।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशे महाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य च रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः जाता । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः; - नन्दिन्याः पादन्यासेन पवित्रितं यावदरण्यभागं अनुसर्तुं सुदक्षिणा साभिलाषेव दृश्यते । तां च दिलीपः वारयति । नन्दिनीं च रक्षति । इत्येतन्निरूपणसन्दर्भे अयं श्लोकः ' नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे,नन्दिन्याः प्रभातसेवनम्" इति पाठ्यांशे वर्तते।

पदविभागः; - निवर्त्य,राजा,दयिताम्,दयालुः, ताम्, सौरभेयीम्, सुरभिः यशोभिः।
पयोधरीभूतचतुस्समुद्राम्, जुगोप,गोरूपधराम्, इव, उर्वीम्।।

अन्वयक्रमः; - दयालुः, यशोभिः.सुरभिः, राजा,दयिताम्, निवर्त्य, सौरभेयीम्, पयोधरीभूतचतु-स्समुद्राम्, गोरूपधराम्, उर्वीम् इव जुगोप।

प्रतिपादार्थः; दयालुः = दयार्द्रहृदयः; यशोभिः = कीर्तिभिः; सुरभिः = मनोहरः; राजा = दिलीपः; दयिताम् = भार्यां सुदक्षिणाम्; निवर्त्य = अपवार्य; सौरभेयीम् = सुरभेः स्त्री अपत्यं ताम् = नन्दिनीम्; पयोधरीभूतचतुस्समुद्राम्, पयोधरीभूत=स्तनतामापन्नाः; चतुस्समुद्राम्=चत्वारः सागराः यस्याः ताम्;गोरूपधराम्=नन्दिनीरूपं धृत्वा अवतरिताम् ; उर्वीम् इव=भूमिमिव; जुगोप = ररक्ष।

श्लोकभावः; - राजा दिलीपः परक्लेशाभिज्ञः । अत एव च अयं कारुणिकः सम्पन्नः । सुदक्षिणादिलीपौ गोसेवाव्रताचरणाय उद्युक्तौ भवतः। सेवनाय दिलीपः नन्दिनीम् अरण्यं विसृजति। सुदक्षिणा च तस्याः खुरक्षुण्णमार्गं अनुसरति। सन्ततिप्राप्तौ सोत्कण्ठा खलु सुदक्षिणा । अतः धर्मलोपभयात् नन्दिन्याः खुरक्षुण्णं यावदरण्यमार्गं अनुसर्तुं साभिलाषेव दृश्यते । सुदक्षिणा राजपुत्री,कोमलाङ्गी, सुकुमारवती च । आरण्यकः मार्गश्च क्लेशभूयिष्ठः। दिलीपः एतत् उभयम् जानाति। अतः 'वनमार्गगतानां क्लेशानां अनभिज्ञा इयं कष्टं न सहते' इति मत्वा सुदक्षिणां वारयति । दिलीपः चतुस्सागरपर्यन्तं भूमेः पालकः । सः भूमिं सर्वं एकच्छत्राधिपत्येन अवलीलया पालयति । प्रकृते - चत्वारः समुद्राः - चत्वारः स्तनाः जाताः, भूमिश्च गौः (नन्दिनी)सम्पन्ना।एवं साक्षात् गोरूपधराम् उर्वीमिव दिलीपः नन्दिनीम् अनायासेन पालयति।

व्याकरणांशाः;समासाः; -पयोधर... पयसां धराः = षष्ठीतत्पुरुषसमासः।

गोरूपधराम्; गोरूपस्य धराम् = षष्ठीतत्पुरुषसमासः।

कोशः - दयालुः ; स्याद्दयालुः कारुणिकः (अमरकोशः)

उर्वी ; वसुधोर्वी वसुन्धरा (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१. सौरभेयी का ?

२. दयालुः कः ?

## २.२.४ मनुवंशसन्ततेः पराक्रमः

व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।।४ ।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशे महाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य च रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः; निबद्धतया ,समाराधनीयेषु, महनीयेषु, अन्येषु, सत्सु, मनुवंशीयाः, स्वीयपरिरक्षणं नैव विशेषं भावयन्ति' इत्येतदंशं निरूपयन् अयं श्लोकः 'नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे,"नन्दिन्याः प्रभातसेवनम्" इति पाठ्यांशे वर्तते।

पदविभागः; व्रताय, तेन, अनुचरेण, धेनोः,न्यषेधि, शेषः, अपि, अनुयायिवर्गः।
न, च, अन्यतः, तस्य, शरीररक्षा, स्ववीर्यगुप्ता, हि, मनोः ,प्रसूतिः।।

अन्वयक्रमः; व्रताय, धेनोः, अनुचरेण, तेन शेषः अपि, अनुयायिवर्गः, न्यषेधि । तस्य शरीररक्षा च, अन्यतः, न, मनोः प्रसूतिः स्ववीर्यगुप्ता,हि,

प्रतिपदार्थः - व्रताय = सेवाव्रताचरणाय; धेनोः = नन्दिन्याः; अनुचरेण = अनुगामिना; तेन = दिलीपेन; शेषः अपि = अवशिष्टः अपि (सुदक्षिणापेक्षया); अनुयायिवर्गः = अनुचरगणः; न्यषेधि = निवर्तितः; तस्य = दिलीपस्य; शरीररक्षा = देहपालनम् आत्मरक्षणम् च ; अन्यतः= इतरेभ्यः; न = न सम्भवति; मनोः = वैवस्वतस्य; प्रसूतिः = सन्ततिः ; स्ववीर्यगुप्ता , स्व = आत्मनः; वीर्य = पराक्रमेण; गुप्ता = रक्षितुं समर्था; हि = खलु;।

श्लोकभावः; पालनं हि रक्षणम् । तच्च राज्ये राजाधीनम् । भद्रतां परिकल्प्य भूतानां रक्षणं राज्ञः कर्तव्यम् । तदनुष्ठानाय राजा इतरेषु आधारितो नैव भवेत् । प्रकृते समाराधनाय नन्दिन्याः अनुयायी दिलीपः, कृपाबुद्ध्या सुदक्षिणाम्, अनावश्यकमिति बुद्ध्या अवशिष्टं च अनुयायिवर्गं निवारयति । एकस्सन् एव नन्दिन्याः व्रतानुष्ठानपरो भवति । तथाहि - निबद्धतया परिरक्षणीयेषु अन्येषु महनीयेषु सत्सु मनुवंशीयानाम् आत्मसंरक्षणविषये अनास्था। स्वपरिरक्षणार्थं ते प्रत्येकं यन्त्राङ्गं नानुमन्यन्ते । यदि कदाचित् विधिवशात् स्वपरिरक्षणावश्यकता समापतति, तदा स्वीयेनैव पराक्रमेण आत्मानं अपि रक्षितुं मनुवंशसन्ततिः समर्था भवति।

विशेषांशः; अत्र दिलीपस्य पराक्रमः चित्रितः।

व्याकरणांशाः; सन्धयः; तेनानुचरेण ; तेन+अनुचरेण(अ + अ = आ)सवर्णदीर्घसन्धिः।

समासाः ;शरीररक्षा ; शरीरस्य रक्षा = षष्ठीतत्पुरुषसमासः।

स्ववीर्यगुप्ता ; स्ववीर्येण गुप्ता = तृतीयातत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः ;**

१. दिलीपेन कः न्यषेधि ?

२. मनोः प्रसूतिः कीदृशी ?

## २.२.५ नन्दिन्याः समाराधनम् -१

आस्वादवद्भिः कबलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत्।। ५ ।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशे महाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य च रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः जाता । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः; नन्दिन्याः समाराधने दिलीपस्य तत्परतां निबद्धतां च निरूपयन् अयं श्लोकः 'नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे,"नन्दिन्याः प्रभातसेवनम्" इति पाठ्यांशे वर्तते।

पदविभागः; आस्वादवद्भिः, कबलैः, तृणानाम्, कण्डूयनैः,दंशनिवारणैः, च,।
अव्याहतैः, स्वैरगतैः, च, तस्याः, सम्राट्, समाराधनतत्परः, अभूत्।।

अन्वयक्रमः; सम्राट्, आस्वादवद्भिः, तृणानाम्, कबलैः, कण्डूयनैः, दंशनिवारणैः ,च, अव्या-हतैः, स्वैरगतैः, तस्याः, समाराधनतत्परः, अभूत्।

प्रतिपदार्थः;सम्राट् = सार्वभौमः ादिलीपः; आस्वादवद्भिः = रुचिकरैः रसवद्भिः; तृणानां = घासानाम्; कबलैः = मुष्टिभिः; कण्डूयनैः = उष्णदायकैः करस्पर्शैः; दंशनिवारणैः, दंश = वन- मक्षिकाणां; निवारणैः = अपसरणैः; अव्याहतैः = अप्रतिहतैः, अनिरुद्धैः; स्वैरगतैः=स्वेच्छागमनैः; च = अपि; तस्याः = नन्दिन्याः; समाराधन = श्रद्धापूर्वकं सेवने; तत्परः = निरतः निबद्धः आसक्तः; अभूत् = आसीत्।

श्लोकभावः;दिलीपः चतुस्सागरपर्यन्तां भूमिं एकच्छत्राधिपत्येन पालयति । अतः सः सम्राट् जातः। एवमपि दिलीपः निबद्धस्सन् श्रद्धया नन्दिन्याः सेवाम् आरचयति । श्रद्धावान् पुरुषः यत्र यदा अवकाशः अवतरति, तत्र तदा तेनैव प्रकारेण तं अवकाशं समर्थतया सद्विनियोगं करोति । तथाहि- राजा दिलीपः सुदक्षिणाम् अनुयायिवर्गं च निवर्त्य नन्दिन्याः अनुयायी भवति ।अरण्यं प्रविशति। तत्र रुचिकरः बालतृणः वर्तते। तम्,उत्पाट्य कण्टकादीन् अपसार्य, शुभ्रं कृत्वा, कबलान् आरचय्य मुखाय अर्पयति ।नन्दिनी च तान् आस्वादनपुरस्सरं खादति। तत् च अरण्यं खलु, तत्र वनमक्षिकाः अधिकाः भवन्ति ।शरीरं,मुखं च आवृत्य पशूनां असौकर्यं आचरन्ति। शरीरे निपत्य रक्तं पिबन्ति । रक्तपानसमये शरीरे तत् स्थले कण्डूतिः जायते । तं जानन् दिलीपः समुचित उष्णदायकैः करस्पर्शैः तदसौकर्यं दूरीकरोति। यदा पतनोत्सुकाः सन्तः आवृताः भवन्ति तदा तान् हस्तप्रसरणैः निवारयति ।नन्दिनी तु तत् सुखम् अनुभवति। सामान्यतः पशवः स्वेच्छानुसारिणः भवन्ति। पशुपालकास्तु पशूनां स्वेच्छागमनं नैव सहन्ते । स्वेच्छागमनं अवरुद्ध्य पशून् ताडयन्ति च । प्रकृते - नन्दिनी पशुजातीया खलु । तथापि दिलीपः पशुपालकपात्रं अस्वीकृत्य नन्दिन्याः स्वेच्छा सञ्चरणं कल्पयति ।एवं दिलीपः रुचिकराणां बालतृणानां मुखादानैः, उष्णदायकैः करस्पर्शैः, वनमक्षिकाणाम् अपसरणैः अप्रतिहतैः स्वेच्छागमनैश्च, नन्दिन्याः समाराधनासक्तः भवति।

विशेषांशः; अत्र पद्ये दिलीपस्य श्रद्धा अभिवर्णिता।

व्याकरणांशाः;

समासाः;दंशनिवारणैः ; दंशानां निवारणम्,तैः = तृतीयातत्पुरुषसमासः।

समाराधनतत्परः ; सम्यक् आराधने तत्परता यस्य सः = बहुव्रीहिसमासः।

कोशः; दंशः ;दंशस्तु वनमक्षिका (अमरकोशः)

साम्राट् ; शास्ति यश्चाज्ञया राज्ञः स साम्राट् (अमरकोशः)

**स्वावलोकनप्रश्नाः ;**

१. दिलीपस्य समाराधनतत्परता कीदृशी ?

२. दिलीपस्य समाराधनतत्परतया किं ज्ञातुं शक्यते ?

## २.२.६ नन्दिन्याः समाराधनम् -२

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ।। ६ ।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशे महाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य च रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः जाता । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः; नन्दिन्याः समाराधने दिलीपस्य तत्परतां निरूपयन् अयं श्लोकः 'नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे,"नन्दिन्याः प्रभातसेवनम्" इति पाठ्यांशे वर्तते।

पदविभागः; स्थितः ,स्थिताम्, उच्चलितः,प्रयाताम्,निषेदुषीम्,आसनबन्धधीरः ।
जलाभिलाषी, जलम्, आददानाम्, छाया, इव ताम्, भूपतिः, अन्वगच्छत् ।।

अन्वयक्रमः; भूपतिः स्थिताम् स्थितः, प्रयाताम् उच्चलितः, निषेदुषीम्,आसनबन्धधीरः, जलाभिलाषी जलम्, आददानाम्, छाया इव ताम् भूपतिः अन्वगच्छत् ।

प्रतिपदार्थः; भूपतिः = भूपालकः दिलीपः; स्थिताम् = उत्थिताम् अनुसृत्य; स्थितः = उत्थितः सन्; प्रस्थिताम् = प्रचलिताम् अनुसृत्य; उच्चलितः = उत्थाय प्रस्थितः सन्; निषेदुषीम् = प्रसार्य भूमौ उपविष्टां अनुसृत्य; आसनबन्धधीरः, आसन = उपवेशनस्य; बन्ध=कल्पने समयोजने; धीरः = दृढः सन्; जलम् = सलिलम्;आददानाम् = स्वीकुर्वतीम् अनुसृत्य; जलाभिलाषी = जलं पातुं इच्छुश्च सन्; ताम् = नन्दिनीम्; छाया = प्रतिबिम्बम् इव; अनु+अवगच्छत्= अन्वसरत्।

श्लोकभावः; - दिलीपः राज्यानाम् अधिनेता । अतश्च सः सम्राट् जातः । तथाऽपि अयं नन्दिनीं छाया इव अनुगच्छति । तथाहि - दिलीपस्यापि शारीरकाः अवसराः भवन्त्येव । तान् अपि अवश्यं अयं संसाधयेत् । परन्तु तान् सर्वान् स्तगयति ।नन्दिनी यावत् उत्थिता भवति तावदयमपि उत्तिष्ठन् एव तं पालयति । यदा तृणखादनाय वा,स्वेच्छागमनाय वा अन्यत्र चलति, शरीरस्य स्तब्धतामपि निराकृत्य तदैव उच्चलितस्सन् नन्दिनीम् अनुसरति। यदा यावत् नन्दिनी भूमौ शरीरं प्रसार्य उपविशति, तदैव, तावदेव दिलीपोऽपि अवसराण्यपि निराकृत्य उपविशति । यदा वा जलं पातुं इच्छति नन्दिनी, तदैव जलं च स पिबति । एवं नन्दिनीं स्वस्याः छाया यथा अनुसरति तथा दिलीपः नन्दिनीं अनुगच्छति । नन्दिन्याः स्वच्छायानुसरणं सहजमेव, तत्र विशेषो न विद्यते । परन्तु, स्वच्छायायाः अनुसरणमिव , दिलीपस्य अनुसरणं तु प्रशस्तम् इति भावः ।

विशेषांशः ; अत्र पद्ये नन्दिन्याः समाराधने दिलीपस्य सहनशीलता सूचिता भवति।

व्याकरणांशाः ; सन्धयः ; छायेव ; छाया + इव ( आ + इ = ए) गुणसन्धिः।
अन्वगच्छत् ; अनु + अगच्छत् (उ + अ = व्) यणादेशसन्धिः।
समासाः ; आसनबन्धधीरः ; आसनबन्धे धीरः = सप्तमीतत्पुरुषसमासः।
भूपतिः ; भुवः पतिः = षष्ठीतत्पुरुषसमासः।

## २.३. उपसंहारः

एवम् अत्र प्रशस्तं गोसेवाव्रताचरणविधानम् अभिवर्णितम्। आश्रमे सुदक्षिणायाः अर्चनम्, खुरक्षुण्ण मार्गानुसरणम्,अरण्ये दिलीपस्य नन्दिनीसेवनम् समाराधनम् च श्रद्धाम्, आसक्तिम् ,सहनशीलतां च आलोचयितुं पाठकान् प्रेरयन्ति। खुरक्षुण्णस्य यावदरण्यमार्गस्य अनुसरणात् सुदक्षिणायाः निवर्तनम्, दिलीपस्य परानुकूलप्रवर्तनम्, अनुयायिवर्गस्य निषेधनम् ,नन्दिन्यां दिलीपस्य विधेयताम्,नन्दिन्याश्च रक्षणे दिलीपस्य आत्मविश्वासं च ज्ञापयन्ति। कालिदासस्य अभिनिवेशः, निबद्धता च प्रस्फुटा भवति।

## २.४ अभ्यासः

श्लोकद्वयं व्याख्यात -

(१). स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ।।

(२). तस्याः खुरन्यासपवित्रपांशुम् -अपाशुलानां धुरि कीर्तनीया।
मार्ग मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरर्वगच्छत्।।

* * *

# अंशः.III; वने दिलीपस्य लब्धं समादरणम्


३.० परिचयः
३.१ लक्ष्याणि
३.२ वने दिलीपस्य लब्धं समादरणम्
३. २.१.दिलीपस्य वर्णनम्
३. २.२. दिलीपस्य वनविचरणम्
३. २.३. स्वागतवचनम्
३.२.४ आचारलाजानाम् विकिरणम्
३.२.५ हरिणीनां निर्भयं सञ्चरणम्
३.२.६ स्वीययशसः श्रवणम्
३.२.७ वायोः सेवनम्
३.२.८ दिलीपस्य प्रभाववर्णम्
३.३ उपसंहारः
३.४ अभ्यासः


## ३.० परिचयः

"वने दिलीपस्य लब्धं समादरणम्" इत्ययं पाठ्यांशः रघुवंशे- द्वितीयसर्गे वर्तते । तत्र च अयं पाठ्यांशः सप्तमश्लोकात् आरभ्य चतुर्दशश्लोकपर्यन्तं (७-१४) परिमितः भवति। अत्र च प्रधानतया अरण्यं प्रविष्टस्य दिलीपस्य वर्णनम्, दिलीपस्य वनविचरणम्,आरण्यकं स्वागतवचनम्, आरण्यकम् आचारलाजानाम् विकिरणम्, हरिणीनां निर्भयं सञ्चरणम्, स्वीययशसः श्रवणम्, वायोः सेवनम्,दिलीपस्य प्रभाववर्णम् इत्येताः विषयाः अत्र बोधिताः।

अयं च पाठ्यांशः भावनाप्रधानः। भाव्यत इति भावना,अस्य एव सम्भावना इति प्रसिद्धं नाम (Imagination)। अत्र अतथाभूतः विषयः वा सन्निवेशः वा तथात्वेन सम्भाव्यते। भावनाप्रक्रियायां अतथाभूतः विषयः सन्निवेशो वा नीरसो भवति। कापि चमत्काराधायकता तत्र न विद्यते। परं स एव नीरसः विषयः कवेः भावनामहिम्ना अपूर्वशोभां सरसताम् आपद्य हृदयाह्लादकः भवति,सहृदयान् रञ्जयति,कवितायाः रमणीयतां च साधयति।

इयं च भावनात्मिका कविताशैली उद्दिष्टं सन्देशं प्रियायाः वचनमिव पाठकजनमनांसि आकर्षति। पाठकजननां मनांसि आलोचनाय प्रेरयति च।पाठकः प्रकृतिं सेवते।पर्यावरणं च परिरक्षति।प्रकृत्या सेव्यते।पर्यावरणपरिरक्षणसुखं च अनुभवति।

एषा एव प्रक्रिया अलङ्कारशास्त्रे "सम्भावना" नम्ना उत्प्रेक्षालङ्कारः भवति। इव, ननु, मन्ये इत्यादयःसम्भावना वाचकाः भवन्ति। कवितापरतया सम्भावनात्मकतानुशीलनम् अत्र उद्दिष्टम् अस्ति।

## ३.१ लक्ष्याणि

पञ्चभूतात्मकं हि प्रकृतिः । अरण्यानि, वृक्षाः, लताः, गिरयः, निर्झराः, नद्यः, फलानि निर्मलं वातावरणम्, पुष्पवृद्धिः, फलवृद्धिः एते तद्विकृतयः एव। सर्वोऽपि मानवः प्रकृतेः परिरक्षकः भवेत् । पञ्चभूतात्मिका प्रकृतिः नैव अपवित्रीकार्या । अपवित्रकरणं च कलुषितीकरणम् ।नैव दुरुपयोगः कार्यः ।प्रकृतिपरिणामभूतस्य पदार्थस्य वा ,वस्तुनः वा यथावसरम् उपयोगः एव प्रकृतेः रक्षणं भवति। यदि प्रकृतेः सम्पत्तिः परिरक्षिता भवति, तदा प्रकृतिः जीवनदानेन, आरोग्यदानेन, उपाधिकल्पनेन अस्मान् रक्षति । एवं बहुप्रकारैः अस्मान् पोषयति, अस्माकं हितम् आधास्यति, अस्मान् प्रख्यापयति च ।

प्रकृते दिलीपः सार्वभौमः, अरण्यानाम् अपि संरक्षकः। अरण्यानां परिरक्षणाय जलसौकर्यं प्रकल्पयति । परिवर्धनाय वृक्षच्छेदनं च वारयति ।अटवीसम्पदः चौर्यं निवारयति ।एवं दिलीपः अरण्यानां परिरक्षकः भवति। अतः सः इदम्प्रथमतया वा, गोसंरक्षणव्याजेन आलस्यतया वा अरण्यं समायातः । स्वीयपरिरक्षणाय परिवर्धनाय च व्यवसायं आरचयतः दिलीपस्य स्वेषाम् आदरः समर्पणीयः इति दिलीपम् अरण्यानि समादरन्ति । एवं दिलीपः प्रकृतिम्, प्रकृतिश्च दिलीपं परस्परं भावयतः। पर्यावरणं परिरक्षतः च ।

एवं पाञ्चभौतिकः प्रकृतिपदार्थः संरक्षितस्सन् समाजं संरक्षति इत्येवमात्मकं प्रकृति-संरक्षणम् अत्र सूचितम्।

## ३.२ वने दिलीपस्य लब्धं समादरणम् (७-१४)

### ३.२.१ दिलीपस्य वर्णनम्

सन्यस्तचिह्नामपि राज्यलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानाराजिः अन्तर्मदावस्थ इव द्विपेन्द्रः ।। ७ ।।

श्लोकपरिचयः;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः जाता । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः;"अरण्यं प्रविष्टः दिलीपः द्विपेन्द्रं स्मारयति"इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिन्याःवरप्रदान"नामके द्वितीयसर्गे "वने दिलीपस्य लब्धं समादरणम्" इति पाठ्यांशे वर्तते।

पदविभागः; सन्यस्तचिह्नम्, अपि, राज्यलक्ष्मीम्, तेजोविशेषानुमिताम्, दधानः ।
आसीत्, अनाविष्कृतदानराजिः, अन्तर्मदावस्थः, इव, द्विपेन्द्रः ।।

अन्वयक्रमः;- सन्यस्तचिह्नाम् अपि, तेजोविशेषानुमिताम्, राज्यलक्ष्मीं दधानः, सः अनाविष्कृत-दानराजिः, अन्तर्मदावस्थः द्विपेन्द्रः इव आसीत् ।

प्रतिपदार्थः - सन्यस्तचिह्नाम्, सन्यस्त = त्यक्त; चिह्नाम् = छत्र-चामरादिराजलाञ्छनाम् ; अपि = तथा भूतामपि; तेजोविशेषानुमिताम्, तेजोविशेष = अतिशयितमुखवर्चसा; अनुमिताम्= निर्धारिताम्; राज्यलक्ष्मीं = प्रभुत्वाधिकारपदवीम्; दधानः = ध्रियमाणः; सः = राजा दिलीपः;

**रघुवंशः द्वितीयसर्गः**

अनाविष्कृतदानराजिः, अनाविष्कृत = बहिः अप्रसारित; दानराजिः = मदरेखः , , अन्तर्मदावस्थः, अन्तः = अभ्यन्तरे एव; मदावस्थः = मददशाम् आपन्नः; द्विपेन्द्रः = गजेन्द्रः; इव = यथा; आसीत् = आभासत;

श्लोकभावः; विनीतवेषेण प्रवेश्यानि तपोवनानि। अतः सार्वभौमोऽपि दिलीपः छत्रचामरादीनि सकलानि लाञ्छनानि अपहायैव आश्रमं प्रविष्टः। नन्दिनीं समाराधयितुं तथैव अरण्यमपि गतः। अरण्येषु च युवावस्थामापन्नाः गजेन्द्राः वर्तन्ते । ते च मदेन पूर्णाः सन्तः बलिष्ठाः भवन्ति । परं मदं तु न आविष्कुर्वन्ति । प्रकृते - अरण्ये राजचिह्नानि अपहाय तेजोविशेषानुमितया मुखकान्त्या राज्याधिकारी 'क्षत्रियः' अयम् इति ज्ञायमानः दिलीपः, मदम् अनाविष्कुर्वन् अन्तः एव मदपूर्णः द्विपेन्द्रः इव अक्ष्णाम् आनन्दं जनयति ।

व्याकरणांशाः; सन्धयः; द्विपेन्द्रः; द्विप + इन्द्रः (अ + इ = ए) गुणसन्धिः।

मदावस्थः; मद+अवस्थः(अ + अ = आ) सवर्णदीर्घसन्धिः।

समासाः;राज्यलक्ष्मीः; राज्ञः लक्ष्मीः,ताम् = षष्ठीतत्पुरुषसमासः।

द्विपेन्द्रः; द्विपानाम् इन्द्रः = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः ;**

१. तपोवनानि कीदृशानि ?

२. द्विपेन्द्रः कथं भाति ?

## ३.२.२ दिलीपस्य वनविचरणम्

लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम्।
रक्षापदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्त्वान्।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः ;"नन्दिन्याः संरक्षणव्याजेन दिलीपः सर्वम् अरण्यं सविस्तरं पर्यटितवान् "इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे"वने दिलीपस्य लब्धं समादरणम्" इति पाठ्यांशे वर्तते।

पदविभागः ; लताप्रतानोद्ग्रथितैः, सः , केशैः, अधिज्यधन्वा, विचचार, दावम्।
रक्षापदेशात् , मुनिहोमधेनोः, वन्यान्, विनेष्यन्, इव, दुष्टसत्त्वान्।।

अन्वयक्रमः ; लताप्रतानोद्ग्रथितैः केशैः , सः अधिज्यधन्वा सन्, मुनिहोमधेनोः रक्षापदेशात्, वन्यान् दुष्टसत्त्वान् विनेष्यन् इव, दावम् विचचार।

प्रतिपदार्थः ; लताप्रतानोद्ग्रथितैः, लता =वल्लीनाम्; प्रतान = कुटिलतन्तुभिः;उद्ग्रथितैः=ऊर्ध्वं बद्धैः; केशैः = कचैः; सः = दिलीपः; अधिज्यधन्वा सन्, अधिज्य = मौर्व्या आरोपित;

धन्वा = धनुष्कः सन्; मुनिहोमधेनोः, मुनि = वसिष्ठस्य; होम = यज्ञयागादेः निमित्तभूतायाः; धेनोः = नन्दिन्याः; रक्षापदेशात् = संरक्षणम् इति नाम्ना; वन्यान् = आरण्यकान्; दुष्टसत्त्वान् = क्रूरमृगान्;विनेष्यन् इव =दमयन् इव; दावम् = अरण्यम्; विचचार = सविस्तरं निश्शेषं पर्यटितवान्।

श्लोकभावः;साधारणतःअरण्ये मृगयार्थं किरताः चरन्ति।ते च केशान् उन्नम्य बध्नन्ति।सन्धितं धनुश्च ते हस्ते धरन्ति।मृगान् च हन्तुं वनं तीक्ष्णं चरन्ति।परिशीलनदृशःच भवन्ति। तत्र दिलीपश्च विना किरीटं विनीतेन वेषेण आश्रमं प्रविशति । अतः विकीर्णतां परिहर्तुम्, अरण्ये कुटिलाभिः तन्तुभिः केशान् ऊर्ध्वं बध्नाति।दिलीपः नन्दिन्याः समाराधनाय तदनु रक्षकत्वेन आगच्छति । तत्र वन्येभ्यः नन्दिन्याः रक्षणार्थं सन्धितं धनुश्च धरति। प्रकृते - अरण्ये कुटिललताभिः केशान् ऊर्ध्वं आबध्य अधिज्यधन्वा सन्, नन्दिन्याः पालकत्वेन अरण्यं प्रविष्टः दिलीपः,क्रूरजन्तूनाम् मदं दमयन् शिक्षयन् इव च सर्वमरण्यम् अतिविस्तृतं, सुसूक्ष्मं परितः चरति इव भासते।

व्याकरणांशाः;सन्धयः ;...अपदेशान्मुनि...; अपदेशात्+मुनि ...(त्+म्=न्) अनुनासिकसन्धिः।

समासाः ; मुनिहोमधेनुः; मुनेः होमस्य धेनुः = षष्ठीतत्पुरुषसमासः।

लताप्रतान... ; लतानां प्रतानानि, तै,= षष्ठीतत्पुरुषसमासः।

कोशः ;सत्वम् ; "द्रव्येषु व्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इति अमरः।

**स्वावलोकनप्रश्नाः ;**

१..मुनिहोमधेनुः का ?

२. दिलीपः दावं कथं विचचार ?

## ३.२.३ स्वागतवचनम्

विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः।। ९।।

श्लोकपरिचयः;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; नन्दिन्याः समाराधनाय अरण्यं प्रविष्टस्य दिलीपस्य ' स्वागतवचनम् ' लब्धम्। इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिन्याः वरप्रदान"नामके द्वितीयसर्गे, "वने दिलीपस्य लब्धं समादरणम्" इति पाठ्यांशे वर्तते।

पदविभागः; विसृष्टपार्श्वानुचरस्य, तस्य, पार्श्वद्रुमाः, पाशभृता, समस्य।
उदीरयामासुः, इव, उन्मदानाम्, आलोकशब्दम्, वयसाम्, विरावैः।।

अन्वयक्रमः; विसृष्टपार्श्वानुचरस्य पाशभृता समस्य तस्य ,पार्श्वद्रुमाः,उन्मदानाम् वयसाम्,

विरावैः, आलोकशब्दम् उदीरयामासुः, इव, आसीत् ।

प्रतिपदार्थः; विसृष्टपार्श्वानुचरस्य, विसृष्ट = निवर्तित ; पार्श्व = वामदक्षिण उभयपार्श्वस्थ ; अनुचरस्य = अनुयायिवर्गस्य ; पाशभृता = वरुणेन ; समस्य = समानस्य ;तस्य = दिलीपस्य; पार्श्वद्रुमाः = उभयतः स्थिताः आरण्यकाः वृक्षाः ; उन्मदानाम् = प्रकामं मत्तानाम् ; वयसाम् = पक्षिणाम् ; विरावैः = कूजितैः; आलोकशब्दम् = जय!महाराज! पदम् अवधार्यताम्, इति स्वागतवचनम् ; उदीरयामासुः इव = कथयामासुः इव ; आसीत्=अभासत।

श्लोकभावः; दिलीपः नन्दिन्याः समाराधको भवति। अरण्यं प्रविशति।। तत्र दिलीपस्य मार्गं उभयतः वृक्षाः सन्ति।तेषां शाखासु उन्मत्ताः पक्षिणश्च वसन्ति। ते पक्षिणश्च किलकिलरवं कुर्वन्ति।अयं च सन्निवेशः, वामदक्षिणोभयपार्श्वस्थम् अनुचरवर्गं विहाय नन्दिन्याः संरक्षण व्याजेन अरण्यं प्रविष्टस्य दिलीपस्य,पार्श्वस्थाः आरण्यकाः वृक्षाः वयसां विरावैः "जय! महाराज! पदम् अवधार्यताम्"इति स्वागतवचनं व्याहरन्तीव वर्तते।अत्र वनस्थानां वयसाम् किलकिलरवः, वृक्षाणां स्वागतवचनव्याहरणत्वेन सम्भावितः।

व्याकरणांशाः;समासाः;आलोकशब्दः; आलोकस्य शब्दः,तम् = षष्ठीतत्पुरुषसमासः।

पार्श्वद्रुमाः; पार्श्वयोः द्रुमाः = षष्ठीतत्पुरुषसमासः।

कोशः; वयः; "खग-बाल्यादिनोर्वयः" इत्यमरः।

**स्वावलोकनप्रश्नाः;**

१. पाशभृता समः कः ?

२. वयसाम् विरावः कथं सम्भावितः?

## ३.२.४ आचारलाजानां विकिरणम्

मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानम्।
अवाकिरन् बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः।। १०।।

श्लोकपरिचयः;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; नन्दिन्याः समाराधनाय अरण्यं प्रविष्टस्य दिलीपस्य'सम्प्रदायलाजानां विकिरणम्' लब्धम् इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे,"वने दिलीपस्य लब्धं समादरणम् "इति पाठ्यांशे वर्तते।

पदविभागः; मरुत्प्रयुक्ताः, च, मरुत्सखाभम्, तम्, अर्च्यम्, आरात्, अभिवर्तमानम्।
आवाकिरन्, बाललताः, प्रसूनैः, आचारलाजैः, इव, पौरकन्याः।।

अन्वयक्रमः; मरुत्प्रयुक्ताः बाललताः , आरात् आभिवर्तमानम्, मरुत्सखाभम् अर्च्यम् तम्,

प्रसूनैः, पौरकन्याः आचारलाजैः इव, अवाकिरन्।

प्रतिपदार्थः;मरुत्प्रयुक्ताः,मरुत् = वायुना; प्रयुक्ताः = प्रचालिताः; बाललताः = लतिकाः; आरात्= सकाशम्; अभिवर्तमानम् = अभिमुखम् आगच्छन्तम्; मरुत्सखाभम्, मरुत् = वायोः; सखा=स्नेहितस्य अग्नेः; आभम् = समानतेजस्कम्; अर्च्यम् = पूज्यम्; तम् = दिलीपम्; प्रसूनैः= कुसुमैः; पौरकन्याः =पुरस्त्रियः; आचारलाजैः = सम्प्रदायलाजैः; इव = यथा; अवाकिरन् = व्यकिरन्;

श्लोकभावः; दिलीपः तेजसा स्वभावेन च अग्निसदृशः। तेजसा कान्तिमान्।स्वभावेन च पवित्रः। अतः पूजनीयश्च भवति।प्रकृते च नन्दिन्याः समाराधनव्याजेन अरण्यं प्रविशति। अरण्ये च वायुः प्रसरति।बाललताश्च ईषत् चलन्ति।तासां पुष्पाणि दिलीपे च पतन्ति।अयं च सन्निवेशः नन्दिन्याः समाराधनव्याजेन अरण्यं प्रविश्य आरात् अभिमुखम् आगच्छन्तं दिलीपं बाललताः,प्रसूनैः पुरप्रवेशे पौरकन्याः आचारलाजैः इव,अवाकिरन्।दिलीपस्य पुरः प्रवेशे पौरकन्याः लाजान् विकिरन्ति। एषः कश्चन आचारः।स च आचारः अरण्येऽपि सम्पादितः इति भावः।

व्याकरणांशाः;समासाः; मरुत्प्रययुक्तः;मरुता प्रयुक्तः = तृतीयातत्पुरुषसमासः।

मरुत्सखा;मरुतः सखा = षष्ठीतत्पुरुषसमासः।

कोशः; आरात्; "आराद्दूरसमीपयोः" (अमरकोशः)

| **स्वावलोकनप्रश्नाः;** |
|---|
| १.मरुत्सखा कः ? |
| २.दिलीपस्य पुरः प्रवेशे स्थितः आचारः कः? |

## ३.२.५ हरिणीनां निर्भयं सञ्चरणम्

धनुर्भृतोऽप्यस्य दयार्द्रभावम् आख्यातमन्तःकरणैर्विशङ्कैः।
विलोकयन्त्यो वपुरापुरक्ष्णाम् प्रकामविस्तारफलं हरिण्यः।।११।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ’ उपमा कालिदासस्य ’ इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; - "धनुर्धारिणं दिलीपं दृष्ट्वाऽपि, अरण्ये हरिणाः निर्भयं सोल्लासं सञ्चरन्ति"। इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिन्याः वरप्रदान" नामके द्वितीयसर्गे,"वने दिलीपस्य लब्धं समादरणम्" इति पाठ्यांशे वर्तते।

पदविभागः; धनुर्भृतः, अपि, अस्य, दयार्द्रभावम्, आख्यातम्, अन्तकरणैः, विशङ्कैः।
विलोकयन्त्यः, वपुः, आपुः, अक्ष्णाम्, प्रकामविस्तारफलम्, हरिण्यः।।

अन्वयक्रमः; धनुर्भृतः, अपि, दयार्द्रभावम्, विशङ्कैः अन्तःकरणैः, आख्यातम्, अस्य, वपुः विलोकयन्त्यः,हरिण्यः,अक्ष्णाम्, प्रकामविस्तारफलम्, आपुः।

प्रतिपदार्थः; धनुर्भृतः अपि = धनुर्धारिणः अपि ; विशङ्कैः = निर्भयैः; अन्तःकरणैः = मनोभिः; आख्यातम् = कथितम् ;दयार्द्रभावम्, दया = कृपारसेन; आर्द्र = सिक्त; भावम् = अभिप्रायम्; अस्य = एतस्य राज्ञः दिलीपस्य ; वपुः = शरीरम् ; विलोकयन्त्यः = पश्यन्त्यः; हरिण्यः = मृग्यः; अक्ष्णाम् = नेत्राणाम्; प्रकामविस्तारफलम्, प्रकाम = अतीव ; विस्तार = विस्तृतस्य; फलम् = फलितम् , प्रयोजनम् ; आपुः = प्रापुः;।

श्लोकभावः; दिलीपः नन्दिन्याः पालनार्थं खलु अरण्यं प्रविशति ।अतः धनुः धृत्वा एव वनम् आगतः। सामान्यतः धनुर्धारिणं दृष्ट्वा सर्वे मृगाः भयम् आप्नुवन्ति। तथैव हरिणाश्च। तत्रापि हरिण्यः,स्त्रीहरिणाः खलु,इतः अपि अधिकं भयं यान्ति । परन्तु दिलीपः अभिगमनशीलः निर्मलः प्रसन्नः च। एते भावाः दिलीपस्य करुणान्तरङ्गं दयार्द्रभावं च प्रकटयन्ति। अतश्च दिलीपः अभिगम्य एव इति निर्भयं सानन्दं सोत्साहं सुदीर्घं दिलीपं पश्यन्ति। सहजतया हरिणीनां नेत्राणि प्रकामं विस्तृतानि भवन्ति खलु। प्रकृते धनुर्धारिणमपि दिलीपं दृष्ट्वा स्वेषां नेत्राणां प्रकामं विस्तारस्य फलं प्राप्नुवन्ति इव सुदीर्घं पश्यन्ति।

व्याकरणांशाः; समासाः; ...विस्तारफलम्; ...विस्तारस्य फलम् = षष्ठीतत्पुरुषसमासः।

कोशः; भावः; "भावः सत्ता स्वभावाभिप्रायचेष्टात्मजन्मनि " (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१. दिलीपस्य दयार्द्रभावः कैः आख्यायते ?

२. हरिण्यः किम् आपुः ?

## ३.२.६ स्वीययशसः श्रवणम्

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्।
शुश्राव कुञ्जेषु यशः स्वमुच्चैः उद्गीयमानं वनदेवताभिः।। १२।।

श्लोकपरिचयः;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"नन्दिन्याः व्रताचरणाय अरण्यं प्रविष्टः दिलीपः, तत्र स्वीयं यशसः गानं श्रुतवान्"इत्येतदंशं निरूपयन् अयं श्लोकः"नन्दिन्याः वरप्रदान"नामके द्वितीयसर्गे,"वने दिलीपस्य लब्धं समादरणम्" इति पाठ्यांशे वर्तते।

पदविभागः; सः, कीचकैः, मारुतपूर्णरन्ध्रैः, कूजद्भिः, आपादितवंशकृत्यम्।
शुश्राव, कुञ्जेषु, यशः, स्वम्, उच्चैः, उद्गीयमानम्,वनदेवताभिः।।

अन्वयक्रमः;     सः.मारुतपूर्णरन्ध्रैः, कीचकैः, आपादितवंशकृत्यम् (सत्), कुञ्जेषु, वन-देवताभिः, उच्चैः, उद्गीयमानम्, स्वम्, यशः,(इव ) शुश्राव।

प्रतिपदार्थः;सः= दिलीपः;मारुतपूर्णरन्ध्रैः,मारुत = वायुना; पूर्ण = पूरित; रन्ध्रैः = ईषत्  छिन्न रेखामर्गैः; कूजद्भिः = नादं कुर्वद्भिः; कीचकैः = वंशवृक्षैः; आपादितवंशकृत्यम्,आपादित= आरोपित ; वंश = वेणुनादस्य ; कृत्यम् = कर्म;(वेणुनादस्य स्मारकम्); कुञ्जेषु =लतागृहेषु; वनदेवताभिः,वन = अरण्यस्य; देवताभिः = अधिष्ठातृदेवीभिः; उच्चैः = तारस्वरेण; उद्गीयमानम्= आलप्यमानम् गीयमानम्;स्वम् = स्वकीयम्; यशः = कीर्तिम्;(इव= यथा) शुश्राव = श्रुतवान्;।

श्लोकभावः; दिलीपः नन्दिन्याः समाराधनाय अरण्यं प्रविशति। तत्र च वंशवृक्षाः सन्ति। ते च आतपकारणतः शुष्काः। अत एव रेखा मात्रं  छिन्नाश्च भवन्ति। ईषत् छिन्नरेखामार्गैः अन्तः वायुना पूरितः अस्ति । पुनश्च सः एव पूरितः वायुः ईषच्छिन्नरेखामार्गाच्च बहिः आगच्छति् उच्चैः ध्वनिः भवति स च वंशीरवं स्मारयति।अयं च सन्निवेशः -दिलीपस्य वनप्रवेशः वनदेवतानां सन्तोष दायकः सन्दर्भः। तं सन्तोषसन्दर्भं पुरस्कृत्य कुञ्जेषु वनदेवताः उच्चैः

दिलीपस्य कीर्तिम् गायन्ति इव वर्तते। तथा उच्चैः गीयमानं स्वीयं  यशः दिलीपः शृणोति। अरण्ये पुरतः गच्छति। एवम् अत्र वंशीरवः दिलीपस्य कीर्तिगानत्वेन सम्भावितः=उत्प्रेक्षितः।

व्याकरणांशाः;समासाः; वंशकृत्यम्;वंशस्य कृत्यम् =षष्ठीतत्पुरुषसमासः।

मारुतपूर्णरन्ध्राः; मारुतेन पूर्णानि रन्ध्राणि येषां तैः,= बहुव्रीहिसमासः।

कोशः; कुञ्जः;"निरुञ्ज - कुञ्जौ वा क्लीबे लतादपिहितोदरः" (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१. दिलीपः किं शुश्राव ?

२. कीर्तिगानत्वेन सम्भावितः कः ?

## ३.२.७ वायोः सेवनम्

पृक्तस्तुषारैर्गिरिनिर्झराणाम् अनोकहाकम्पितपुष्पगन्धी।
तमातपक्लान्तमनातपत्रम् आचारपूतं पवनः सिषेवे।। १३।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम्।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः  अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "नन्दिन्याः समाराधनाय अरण्यं प्रविष्टं दिलीपं पवनः सेवितवान्"इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिन्याः वरप्रदान "नामके द्वितीयसर्गे, वने दिलीपस्य लब्धं समादरणम्" इति पाठ्यांशे वर्तते।

पदविभागः;     पृक्तः, तुषारैः, गिरिनिर्झराणाम्, अनोकहाकम्पितपुष्पगन्धी।

तम्, आतपक्लान्तम्, अनातपत्रम्, आचारपूतम्, पवनः, सिषेवे।।

अन्वयक्रमः; गिरिनिर्झराणाम्,तुषारैः, पृक्तः, अनोकहाकम्पितपुष्पगन्धी, पवनः, अनातपत्रम्, आचारपूतम्, आतपक्लान्तम् तम्, सिषेवे।

प्रतिपदार्थः; गिरिनिर्झराणाम्, गिरि = पर्वतेषु स्थितानाम्; निर्झराणाम् = जलप्रवाहानाम्; तुषारैः=बिन्दुभिः; पृक्तः=सम्पर्कं समायातः; अनोकहाकम्पितपुष्पगन्धी,अनोकहा=वृक्षाणाम्; कम्पित=कम्पनेन; (जातः यः), पुष्प = कुसुमानाम्; गन्धी = गन्धः तद्वान्(सुगन्धी);पवनः=वायुः; अनातपत्रम् = (त्यक्तराजचिह्नत्वात् )छत्ररहितम्; आचारपूतम्,आचार = (औष्ण्यम् अपि अपरिगणय्य) निबद्धतया गोसेवाधर्मानुष्ठानेन; पूतम् =पवित्रम्; आतपक्लान्तम्, आतप=(छत्रम् विहाय गोसेवा धर्मानुष्ठानकारणतः) औष्ण्येन ; क्लान्तम् = म्लानम् ; तम् = राजानम् दिलीपम् ; सिषेवे = सेवितवान्।

श्लोकभावः; नन्दिन्याः समाराधनाय दिलीपः अरण्यं प्रविष्टः खलु। तत्र अरण्ये गिरयः सन्ति,निर्झराः प्रवहन्ति। जलपाताश्च भवन्ति। अनिलश्च निष्कलुषस्सन् प्रसरति।

वृक्षाश्च वर्तन्ते। ते च कम्पिताः सन्तः, स्वयं सुमनोहरं सुगन्धं प्रसारयन्ति। स च शरीरस्य सुखस्पर्शं च कल्पयति। अयं च सन्निवेशः व्रताचरणाय खलु दिलीपः अरण्यं प्रविष्टः। स च साम्राट् , तथापि नन्दिन्याः समाराधनं विनीतेनैव वेषेण कार्यं खलु। अतः आतपत्रं विनैव अरण्यम् आगतः। छत्रं नास्तीति कृत्वा स्वयं गोसेवाधर्मानुष्ठाने अनासक्त्या वा, अलसतया वा न प्रवृत्तः।किन्तु श्रद्धया एव भागस्वामी भवति।एवम् अनातपत्रः सन् अपि, स्वीयं धर्मं नन्दिन्याः समाराधनम् , निबद्धतया अनुतिष्ठति। एवं श्रद्धया स्यीयधर्माचरणेन दिलीपः पवित्रः भवति। नन्दिन्याः अनुयायी भूत्वा आतपे च क्लान्तः। एवम् सम्राट् भूत्वापि, श्रमाम् अनुभूय ,धर्मानुष्ठानाय निबद्धतया प्रयतन्तं दिलीपं , गिरिनिर्झराणाम् तुषारैः पृक्तः सुगन्धभरितश्च वायुः, संसेव्य आत्मानं चरितार्थं करोति ।

व्याकरणांशाः; सन्धयः;पृक्तस्तुषारैः;पृक्तः तुषारैः(विसर्गः + त् = स्)विसर्गसन्धिः।

समासाः;गिरिनिर्झराणाम् ; गिरेः निर्झराः,तेषाम् = षष्ठीतत्पुरुषसमासः।

आतपक्लान्तम् ; आतपेन क्लान्तः,तम् = तृतीयातत्पुरुषसमासः।

अनातपत्रम् ; न विद्यते आतपत्रं यस्य सः = बहुव्रीहिसमासः।

कोशः; तुषारः; "तुषारौ हिमशीकराः" (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१.वायुः दिलीपं कथं सिषेवे ?

२.दिलीपः अनातपत्रः किमर्थं जातः ?

## ३.२.८ दिलीपस्य प्रभाववर्णनम्

शशाम वृष्ट्यापि विना दवाग्निः, आसीद्विशेषा फलपुष्पवृद्धिः।
ऊनं न सत्त्वेष्वधिको बबाधे, तस्मिन् वनं गोप्तरि गाहमाने।। १४।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति ।अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः ; "नन्दिन्याः समाराधनाय दिलीपः अरण्यं आगतः। तदा वनं प्रभावपूर्णं जातम्" इत्येतदंशं निरूपयन् अयं श्लोकः"नन्दिन्याः वरप्रदान"नामके द्वितीयसर्गे,वने दिलीपस्य लब्धं समादरणम्" इति पाठ्यांशे वर्तते।

पदविभागः ;  शशाम, वृष्ट्या, अपि, विना, दवाग्निः, आसीत्, विशेषा, फलपुष्पवृद्धिः।
ऊनम्, न, सत्त्वेषु, अधिकः, बबाधे, तस्मिन्, वनम्, गोप्तरि, गाहमाने ।।

अन्वयक्रमः ; गोप्तरि वनं गाहमाने, दवाग्निः वृष्ट्या विना अपि ,शशाम, फलपुष्पवृद्धिः विशेषा आसीत्, सत्त्वेषु अधिकः ऊनं न बबाधे।

प्रतिपदार्थः ; गोप्तरि = पालके; तस्मिन् = दिलीपे; वनम् = अरण्यम्; गाहमाने = प्रविशति; (सति) दवाग्निः, दव = वनस्य; अग्निः = वह्निः; वृष्ट्या = वर्षेण; विना अपि= अन्तरा अपि ; शशाम = शान्तिं ययौ;फलपुष्पवृद्धिः,फल = फलानाम् ; पुष्प = पुष्पाणाम्; वृद्धिः = अभिवृद्धिः;विशेषा = अधिका, आसीत् = अभवत्;सत्त्वेषु = जन्तुषु, अधिकः = क्रूरः सिंहव्याघ्र समुदायः;ऊनम् = दुर्बलं (साधुजन्तुसमुदायम्) हरिणादिकम् ;न बबाधे = न पीडयामास।

श्लोकभावः; राजा गोसेवा व्रताचरणाय अरण्यं प्रविशति। अरण्ये तस्य च प्रवेशनं प्रभावपूर्णं महिमान्वितं च भवति। तथाहि - दिलीपे अरण्यं प्रविशति सति, विनैव वर्षं दवाग्निः शमनं प्राप्नोति ।अरण्ये वृक्षाः अधिकं फलन्ति ।अधिकं पुष्प्यन्ति च ।सामान्यतः अरण्येषु क्रूरजन्तवः साधुजन्तून् बाधन्ते। परं दिलीपे प्रविशति तु जन्तुषु अधिकाः सिंह-व्याघ्र-भल्लूकादयः ऊनान् हरिणादीन् साधुजन्तून् न बाधन्ते। उदारचरितवतः दिलीपस्य प्रवेशेन वनम् एवं महिमान्वितं जातम् इति भावः।

व्याकरणांशाः; सन्धयः;आसीद्विशेषा ; आसीत् + विशेषा (त् + पदान्त = द्) जश्त्वसन्धिः।
सत्वेष्वधिकः ; सत्वेषु + अधिकः( उ + अ = व्) यणादेशसन्धिः।

समासाः; दवाग्निः; दवस्य अग्निः = षष्ठीतत्पुरुषसमासः।

फलपुष्पवृद्धिः; फलपुष्पयोः वृद्धिः = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः ;**

१. दवाग्निः कथं शशाम ?

२. "तस्मिन् वनं गोप्तरि गाहमाने" अत्र "तस्मिन्" शब्दः कं सम्बन्धयति?

## ३.३ उपसंहारः

एवम् अयं पाठ्यांशः भावनात्मककविताप्रधानः ।दिलीपस्य नन्दिन्याः अनुसरणं दुष्ट सत्वानां दमनत्वेन सम्भवितम्।वयसां विरावः आलोकशब्दस्य उदीरणमिव भावितः।बाललताभ्यः पुष्पपतनं आचारलाजानां विकरणत्वेन उत्प्रेक्षितम्। एवम् अत्र निबद्धः भावनात्मककवितागुणः पाठकानाम् भावनात्मकदृष्टिं साधयितुं, वर्धयितुं च प्रभवति। पाठकजनमनांसि अबाधयित्वा, भावनात्मकताव्याजेन पाठकानां (रक्षितं सत् पर्यावरणम् = प्रकृतिः, अस्मान् रक्षिति इति) सन्देशस्य दानम् कवितायाः उत्तमत्वं ज्ञापयति।अपि च अत्र प्रकृतेः व्यक्तित्वम् आपाद्य दिलीपस्य समादरणप्रक्रिया निरूढा। तच्च अतिथौ,अभ्यागते च,समादरणरीतिं कमनीयपद्धत्या पाठकानां शिक्षयति। अयं च पाठ्यांशः पाठकानां किं वयं अरण्ये आदरणं प्राप्नुमः इति अनुभूतिं च जनयति।

## ३.४.अभ्यासः

श्लोकद्वयं व्याख्यात ?

(१). सन्यस्तचिह्नामपि राज्यलक्ष्मीम् तेजोविशेषानुमितां दधानः।
आसीदनाविष्कृतदानाराजिः अन्तर्मदास्थ इव द्विपेन्द्रः।।

(२). पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पित पुष्फगन्धी।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे।।

# अंशः-IV; निलयाय गन्तुं नन्दिन्याः उपक्रमणम्

संरचना

४.० परिचयः
४.१ लक्ष्याणि
४.२ निलयाय गन्तुं नन्दिन्याः उपक्रमणम्
४.२.१ नन्दिन्याः उपक्रमणम्
४.२.२ दिलीपस्य अनुसरणम्
४.२.३ वनप्रदेशानां वर्णनम्
४.२.४ तपोवनावृत्तिपथाधिष्ठानम्
४.२.५ सुदक्षिणायाः निरीक्षणम्
४.२.६ नन्दिन्याः वर्णनम्
४.२.७ नन्दिन्याः सायङ्कालपूजनम्
४.२.८ पूजायाः परिग्रहणम्
४.२.९ गुरवे निवेदनम्
४.२.१० नन्दिन्याः समीपे एव शयनम्
४.२.११एकविंशति दिनानि.यावत् नन्दिन्याः सेवनम्
४.३ उपसंहारः
४.४ अभ्यासः

## ४.० परिचयः

निलयाय गन्तुं नन्दिन्याः उपक्रमणम् इत्ययं पाठ्यभागः रघुवंशम्-द्वितीयसर्गे वर्तते। द्वितीयसर्गस्यैव कथापरतया नन्दिनीवरप्रदानम् इत्यपि नाम विद्यते। पाठ्यभागश्चायं तत्र पञ्चदशतमश्लोकतः आरभ्य पञ्चविंशतितमश्लोकपर्यन्तं (१५-२५)परिमितः अस्ति । अत्र प्रधानतया निलयाय गन्तुं नन्दिन्याः उपक्रमणम्, दिलीपस्य नन्दिन्याः अनुसरणम् , सायंकालीनानां वनप्रान्तानां वर्णनम्,नन्दिनी-दिलीपयोः तपोवनावृत्तिपथाधिष्ठानम् , आश्रमे सुदक्षिणायाः निरीक्षणम्, आश्रमम् आगतायाः नन्दिन्याः वर्णनम् ,नन्दिन्याः प्रदोषपूजनम्, नन्दिन्याः समीपे एव शयनम् इत्येवं क्रमेण विषयाः वर्णिताः। अत्र च सुदक्षिणायाः नन्दिन्याराधनम् अभिवर्णितम्।

अत्र नन्दिन्याराधने सुदक्षिणायाः श्रद्धा भक्तिः आसक्तिश्च निरूपिता।

## ४.१ लक्ष्याणि

मानवः बुद्धिजीवः। सः स्वीयबुद्ध्या विवेकसम्पन्नो भवेत्। विवेकेन च आत्मानं विकसितं कुर्यात्। महनीयं व्यक्तित्वं च संसाधयेत्।उद्धरेत् आत्मना आत्मानम् इतिभगवद्-

गीतावाक्यम् जीवने आत्मनः श्रेयस्साधकेषु विवेकवर्धनस्य प्रामुख्यं प्रस्तौति। बुद्ध्या विवेकं,विवेकेन च विनयम्,विनयेन विधेयताम्,विधेयतया च व्यक्तित्वम्, व्यक्तित्वेन च,सदाचरणम्, तेन च प्रतिष्ठाम् सम्पाद्य मानवः पुण्यश्लोकी भवेत्। काव्यपठनम्-काव्यपाठनञ्च श्लोके श्लोके इममेव मानवाभ्युदयकरसन्देशम् सरसतया मानवमनस्सु निदधाति। अयमपि पाठ्यांशः श्रेयस्साधकान् बहून् विषयान् प्रस्तौति। एतत् पाठ्यांशस्य अध्ययनेन -

- नन्दिन्याः सन्ध्यायाश्च साम्यं ज्ञातुं प्रभवति।
- दिलीपस्य नन्दिन्यनुसरणं प्रति भाषितुं पारयति।
- सन्ध्याकालिकां प्रकृतिरामणीयकतां लिखितुं समर्थो भवति।
- नन्दिनी-दिलीपयोः मन्दगमने कारणं पठितुं प्रभवति।
- सुदक्षिणायाः नन्दिनीप्रत्युद्गमनविधानं अवगन्तुं प्रभवति।
- आश्रमे सुदक्षिणायाः नन्दिनीसमाराधनवृत्तान्तं लिखितुं पारयति।
- नन्दिन्याः पूजास्वीकरणविधानम् अवगन्तुं समर्थो भवति।
- सुदक्षिणा-दिलीपयोः अहर्निशं नन्दिन्याः समाराधनं लिखितुं पारयति।

## ४.२.निलयाय गन्तुं नन्दिन्याः उपक्रमणम् (१५-२५)

### ४.२.१ नन्दिन्याः उपक्रमणम्

सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः।। १५।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; -"प्रातः प्रभृति दिलीपः नन्दिनीं छायेव अन्वगच्छत्।सायम् आसीत्।नन्दिनी च निलयं गन्तुम् सङ्कल्पिता "इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिनीवरप्रदान"नामके द्वितीयसर्गे, "निलयाय गन्तुं नन्दिन्याः उपक्रमणम्"इति पाठ्यांशे वर्तते।

पदविभागः; - सञ्चारपूतानि, दिगन्तराणि, कृत्वा, दिनान्ते, निलयाय, गन्तुम्।
प्रचक्रमे, पल्लवरागताम्रा, प्रभा, पतङ्गस्य, मुनेः च, धेनुः, ।।

अन्वयक्रमः; - पल्लवरागताम्रा,पतङ्गस्य प्रभा, मुनेः, धेनुश्च,दिगन्तराणि,सञ्चारपूतानि,कृत्वा, दिनान्ते, निलयाय, गन्तुम् प्रचक्रमे।

प्रतिपदार्थः;पल्लवरागताम्रा,पल्लव = किसलयस्य; राग = रात्तिमायाः इव; ताम्रा = अरुणवर्णा; पतङ्गस्य = सूर्यस्य; प्रभा = कान्तिः; मुनेः = वसिष्ठस्य; धेनुः च = नन्दिनी च; दिगन्तराणि= दिशां मध्यभागानि; सञ्चारपूतानि, सञ्चार = पर्यटनेन; पूतानि = पवित्राणि; कृत्वा = विधाय; दिनान्ते, दिन = दिवसस्य; अन्ते = अवसाने,सायङ्काले; निलयाय = स्वस्य आवासाय , वसिष्ठस्य आश्रमाय; गन्तुम् = यातुम्; प्रचक्रमे = प्रतस्थे।

श्लोकभावः;नन्दिन्याः समाराधनाय दिलीपः अरण्यम् आगतः, स च श्रद्धया नन्दिन्याः

सेवायाम् आसक्तश्च जातः। दिलीपेन सेव्यमाना नन्दिनी च ताम्रा, अरुणवर्णा।सा च पर्यटनेन दिशां मध्यभागान् पावितवती। सायं आसीत्, निलयाय गन्तुं च उद्युक्ता। एवमेव सूर्यस्य सायं प्रभाऽपि अरुणा। सा च किरणव्यापनेन दिगन्तराणि शुद्धं शुभ्रं च कृतवती। ततश्च सायं अस्ताद्रिं गन्तुं च उद्युक्तवती।

अत्र सूर्यप्रभा-नन्दिन्योः निलयाय गमनोपक्रमणं ,श्लेषमहिम्ना वर्णयति।तथाहि- सन्ध्यारुणा सूर्यप्रभा स्वीयव्यापनेन दिगन्तराणि पूतानि कृत्वा दिनान्ते अस्ताद्रिं गन्तुं यथा प्रक्रमते तथा पाटलारुणा नन्दिनी अपि स्वीयपर्यटनेन अरण्यस्य चतुरः भागान् पवित्रं कृत्वा दिनान्ते मुनेः आश्रमं गन्तुं प्रचक्रमे इति भावः।

व्याकरणांशाः; सन्धयः; दिनान्ते; दिन + अन्ते (अ + अ = आ) सवर्णदीर्घसन्धिः।

मुनेश्च; मुनेः+ च (विसर्गः + च् = श्) विसर्गसन्धिः।

समासाः;पल्लवराग...; पल्लवस्य राग... = षष्ठीतत्पुरुषसमासः।

दिनान्ते ; दिनस्य अन्ते = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः;**

१. वसिष्ठस्य होमधेनुः का ?

२. नन्दिनी कीदृशी ?

## ४.२.२ दिलीपस्य अनुसरणम्

तां देवतापित्रतिथिक्रियार्थाम् अन्वग्ययौ मध्यमलोकपालः।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना।। १६।।

श्लोकपरिचयः ; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "निलयाय गन्तुं सङ्कल्पितां नन्दिनीं दिलीपः अनुसृतवान्"इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिनीवरप्रदान"नामके द्वितीयसर्गे "निलयाय गन्तुं नन्दिन्याः उपक्रमणम्"इति पाठ्यांशे वर्तते।

पदविभागः ; ताम्, देवता-पितृ-अतिथि-क्रियार्थाम्, अन्वग्ययौ, मध्यमलोकपालः।
बभौ, च, सा, तेन, सताम्, मतेन, श्रद्धा, इव, साक्षात्, विधिना, उपपन्ना।।

अन्वयक्रमः ; मध्यमलोकपालः, देवता-पितृ-अतिथि-क्रियार्थाम्, ताम्, अन्वग्ययौ। सताम् मतेन तेन उपपन्ना सा, विधिना उपपन्ना साक्षात् श्रद्धा इव बभौ।

प्रतिपदार्थः ; मध्यमलोकपालः, मध्यमलोक = भूलोकस्य ; पालः = पालकः दिलीपः; देवता-पितृ-अतिथि-क्रियार्थाम्,देवता = देवतानाम् (यज्ञ-यागादीनाम्) ; पितृ = पितृदेवतानाम्(श्राद्धादीनाम्)

; अतिथि = सन्दर्शनार्थम् आगच्छताम्(भोजनादि) ;क्रिया = कर्माणाम् ; अर्थाम् = उपयोगिनीम्; ताम् = नन्दिनीम्;अन्वक् = अनुसृत्य;ययौ = जगाम;सताम् = मनीषिणाम्; मतेन = पूजनीयतया सम्मतेन; तेन = दिलीपेन;उपपन्ना = युक्ता;सा= नन्दिनी ; विधिना =शास्त्रविहितकर्मणा ; उपपन्ना = युक्ता; साक्षात् = नैसर्गिकी; श्रद्धा = त्रिकरणशुद्धिः; इव = यथा, बभौ= शुशुभे। श्लोकभावः; दिलीपेन सेव्यमाना नन्दिनी च बहुलार्थसाधिका। सा च देवताकार्याणां यज्ञ-यागादीनाम् अपेक्षितं हविरादिकम् आरचयति। पितृकार्याणां श्रद्धादीनां निर्वर्तनाय आवश्यकं पयः दधि आज्यादिकं साक्षात् साधयति। आश्रमम् आगच्छतां अतिथीनाम् अभ्यागतानां च आवश्यकं भोजनादिकं आयोजयति। सायं नन्दिन्याः आश्रमगमने यदि कालातिपातः सर्वेषां एषां क्रियाणाम् अन्तरायः आपतति। नन्दिनी एतत् सर्वं जानाति। अतः सायं जाते एव निलयाय गन्तुम् उद्युक्ता।

दिलीपश्च आश्रमे नन्दिन्याः उपयोगिताम् आलोच्य अनुपदम् एव ताम् अनुसृतवान्। अत्र च दिलीपेन अनुगम्यमानां नन्दिनीं वर्णयति। तथाहि- विधिर्नाम वेदविहितं कर्म। श्रद्धा नाम अत्र मनोवाञ्छायाम् आसक्तिः।वेदविहितकर्मसु बलवदाचरणमेव अधिकं दृश्यते।तत्र मनःपूर्वकं आचरणं प्रायः अल्पम् एव। कदाचित् कस्यचित् वेदविहितकर्मसु श्रद्धा अपि उपपन्ना भवति। सा च श्रद्धा प्रशस्ता, तत् वेदविहितं कर्म च प्रशस्तम्। प्रकृते - दिलीपेन अनुगम्यमाना नन्दिनी, वेदविहितकर्मणा संलग्ना(मनोवाञ्च्छा) श्रद्धा इव बभौ।

व्याकरणांशाः;सन्धयः; साक्षाद्विधिना ; साक्षात् + विधिना(त् + व् = द्) जश्त्वसन्धिः।

विधिनोपपन्ना ; विधिना + उपपन्ना(आ + उ = ओ) गुणसन्धिः।

श्रद्धेव ; श्रद्धा + इव (आ + इ = ए) गुणसन्धिः।

समासाः; मध्यमलोकपालः; मध्यमलोकस्य पालः =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः;**

१. मध्यमलोकः कः ?

२. देवतापित्रतिथिक्रियार्था का ?

## ४.२.३ वनप्रदेशानां वर्णनम्

स पल्वलोत्तीर्णवराहयूथानि आवासवृक्षोन्मुखबर्हिणानि।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन्।।१७।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "सायं भवति ।नन्दिनी आश्रमागन्तुम् उद्युक्ता भवति।।दिलीपश्च ताम्

अनुसरति।

नन्दिन्या सह आश्रममागच्छन् दिलीपः सादरं वनानि पश्यति" इत्येतदंशं निरूपयन् अयं श्लोकः "नन्दिनीवरप्रदान"नामके द्वितीयसर्गे "निलयाय गन्तुं नन्दिन्याःउपक्रमणम्"इति पाठ्यांशे वर्तते।

पदविभागः; - सः,पल्वलोत्तीर्णवराहयूथानि, आवासवृक्षोन्मुखबर्हिणानि।
ययौ, मृगाध्यासितशाद्वलानि, श्यामायमानानि, वनानि, पश्यन्।।

अन्वयक्रमः; - सः,पल्वलोत्तीर्णवराहयूथानि, आवासवृक्षोन्मुखबर्हिणानि, मृगाध्यासितशाद्वलानि, श्यामायमानानि, वनानि, पश्यन् ययौ,।

प्रतिपदार्थः; - सः = दिलीपः; पल्वलोत्तीर्णवराहयूथानि, पल्वल = अल्पजलाशयेभ्यः; उत्तार्ण = निर्गतानि; वराह = सूकराणाम्; यूथानि = समूहः येषु तानि,तादृशानि ; आवासवृक्षोन्मुखबर्हिणानि, आवास = निवासभूतानाम् ; वृक्ष = पादपानाम्; उन्मुख = अभिमुखं आगच्छत् ;बर्हिणानि = मयूराः येषु तानि, तथाभूतानि; मृगाध्यासितशाद्वलानि, मृग = हरिणैः ; अध्यासित = अधिष्ठिताः; शाद्वलानि = हरिततृणभूमयः येषु तानि तथाविधानि ; श्यामायमानानि = सन्निहित रात्रित्वात् किंचिदन्धकारावृतानि; वनानि = अरण्यानि; पश्यन् = विलोकयन् ; ययौ = जगाम।

श्लोकभावः; सायं भवति। नन्दिनी निलयाय गन्तुं सङ्कल्पते । निवृत्तां नन्दिनीं दिलीपः अनुसरति। दिलीपः महानगरवासी खलु। प्राकृतिकसौन्दर्यस्य परोक्षवेत्ता एव सः। आरण्यकानां जीवनविधानम्, आरण्यकं सहजसौन्दर्यं द्रष्टुम् अवकाशः इदानीमेव जातः।तदेव वर्णयति,तथाहि-
सायं भवति , मध्याह्नं यावत् सूर्यातपे पर्यटिताः आरण्यकाः वराहाः सूर्यातपं सोढुम् अशक्नुवन्तः, अल्पेषु पङ्कभूयिष्ठेषु जलाशयेषु निपत्य निपत्य शरीरतापं परिहरन्ति। ते सायम् आसीत् इति वराहाः समूहं समूहं पङ्कजलाशयतः तापं अपवार्य सानन्दं बहिरागच्छन्ति। तान् सोत्साहं राजा पश्यति।

मयूराः दिवा आहारार्थं परिभ्रमन्ति।सायं जातमिति इति बुद्ध्या निवासभूतानां वृक्षाणाम् अभिमुखम् आगच्छन्ति। ते च सोल्लासं आवासाय उन्मुखाः भवन्ति। आवासात् गमनसमये 'आहारो लभ्यते वा न वा इति' चिन्ता। आगमनसमये तु आवासं प्रति आगमनम् इति कृत्वा सोत्साहं आगच्छन्ति। तान् च पश्यति दिलीपः। हरिणाश्च प्राकृतिकाः बालतृणभूमीः अध्यास्य, रोमन्थम् अभ्यस्यन्ति।रोमन्थं च कुर्वन् आस्वादने तत्पराः आनन्दं अनुभवन्ति। तान् च पश्यति।आसन्नरात्रित्वात् अन्धकारश्च मन्दं मन्दं पदं क्षिपति। तेन च श्यामता अरण्ये किञ्चित् किञ्चित् आवृता भवति। तादृशानि अरण्यानि पश्यन् दिलीपः ,नन्दिन्या सह आश्रमं गच्छतै।

व्याकरणांशाः;

सन्धयः; - पल्वलोत्तीर्ण...;पल्वल + उत्तीर्ण... (अ + उ = ओ)गुणसन्धिः।
यूथान्यावास...; यूथानि + आवास...(इ + आ = य्)यणादेशसन्धिः।
वृक्षोन्मख... ; वृक्ष + उन्मख...(अ + उ = ओ)गुणसन्धिः।

समासाः; ....वराहयूथानि ; वराहाणां यूथानि = षष्ठीतत्पुरुषसमासः।
आवासवृक्षाः...; आवासभूताः वृक्षाः =विशेषणपूर्वपदकर्मधारयसमासः।
कोशः; शाद्वलः; "शाद्वलः शादहरित" (अमरकोशः)
शादः कर्दम - शष्पयोः(विश्वः)

**स्वावलोकनप्रश्नाः;**

१. वनानि श्यामायमानानि किमर्थं जातानि ?

२. वराहयूथानि कथं सन्ति ?

## ४.२.४ तपोवनावृत्तिपथाधिष्ठानम्

आपीनभारोद्वहनप्रयत्नात् गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः।
उभावलञ्चक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम्।।१८।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः।अस्य विषये 'उपमा कालिदासस्य'इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "नन्दिनी-दिलीपौ तपोवनस्य आवृत्तिपथम् अधितिष्ठतः" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "निलयाय गन्तुं नन्दिन्याः उपक्रमणम्" इति पाठ्यांशे वर्तते।

पदविभागः; आपीनभारोद्वहनप्रयत्नात्, गृष्टिः,गुरुत्वात्, वपुषः, नरेन्द्रः।
उभौ, अलञ्चक्रतुः, अञ्चिताभ्याम्, तपोवनावृत्तिपथम्, गताभ्याम्।।

अन्वयक्रमः; गृष्टिः,आपीनभारोद्वहनप्रयत्नात्,च, नरेन्द्रः वपुषः,गुरुत्वात्,(एवम्) उभौ, अञ्चिताभ्याम्, गताभ्याम् तपोवनावृत्तिपथम् अलञ्चक्रतुः।

प्रतिपदार्थः; गृष्टिः = सकृत्प्रसूता नन्दिनी; आपीनभारोद्वहनप्रयत्नात्, आपीन = पूर्ण-ऊधसः;भार= भारस्य;उद्वहन = धारणे; प्रयत्नात् = प्रयासात्;च=अपि च; नरेन्द्रः = राजा दिलीपः;वपुषः=शरीरस्य; गुरुत्वात् = आधिक्यात् (एवम् = अनेन प्रकारेण);उभौ = नन्दिनी-दिलीपौ द्वौ अपि; अञ्चिताभ्याम् = सुन्दराभ्याम्;गताभ्याम् = गमनाभ्याम्;तपोवनावृत्तिपथम्, तपोवन= आश्रमस्य;आवृत्ति = प्रत्यागमनस्य; पथम् = मार्गम्; अलञ्चक्रतुः = अधितस्थतुः;

श्लोकभावः;सायं भवति । नन्दिनी निलयाय गन्तुम् उद्युक्ता।दिलीपश्च नन्दिनीम् अनुयातः।एवं नन्दिनी -दिलीपौ तपोवनावृत्तिपथम्,अधिष्ठितौ।तथाहि -नन्दिनी प्रथमप्रसूता,वत्सदर्शनोत्कण्ठिता च।किञ्च नन्दिनी सायं यावत् तत्तत् स्वादु विशेषतृणवल्यादिकम् अधिकं स्वीकृतवती। वत्सस्य स्मरणात् विशेषतृणखादनाच्च ऊधसि क्षीरस्रवणम् अधिकं पूर्णं भवति । तच्च भाराय जातम्।तस्य भारस्य वहने प्रयासवशात् नन्दिनी मन्दं गच्छति।दिलीपस्य वपुश्च महान् "व्यूढोरस्कः-वृषस्कन्धः,सालप्रांशुः,महाभुजः",एवं वपुषः गुरुत्वात् सः अपि शनैः एव नन्दिनीम्

अनुसरति।एवं नन्दिनी-दिलीपौ उभौ अपि चारु गमनाभ्यां वसिष्ठाश्रमस्य आवृत्तिपथम् अधिष्ठितौ।

विशेषांशः;'नन्दिनी-दिलीपयोः गमनम् उदात्तम्' इत्यंशः अत्र प्रस्तावितः।

व्याकरणांशाः;सन्धयः; नरेन्द्रः;नर+इन्द्रः(अ +इ = ए)गुणसन्धिः

तपोवनावृत्ति...;तपोवन + आवृत्तिपथम्(अ +आ=आ)सवर्णदीर्घसन्धिः।

उभावलम्... ;उभौ + अलम्...(औ +अ =आव्)अयवायावादेशसन्धिः।

समासः; आपीनभारः... ; आपीनस्य भार...=षष्ठीतत्पुरुषसमासः।

कोशः; आपीनम्; "ऊधस्तु क्लीबमापीनम् " (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१. गृष्टिः का ? तस्य अर्थः कः?

२. दिलीपः किमर्थं मन्दं गच्छति ?

## ४.२.५ सुदक्षिणायाः निरीक्षणम्

वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपङ्क्तिः उपोषिताभ्यामिव लोचनाभ्याम्।।१९।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः ;" नन्दिनीम् अनुसृत्य आगच्छन्तं दिलीपं सुदक्षिणा निरीक्षितवती" इत्येतदंशं निरूपयन् अयं श्लोकः ,नन्दिनीवरप्रदाननामके द्वितीयसर्गे"निलयाय गन्तुं नन्दिन्याः उपक्रमणम्" इति पाठ्यांशे वर्तते।

पदविभागः; वसिष्ठधेनोः, अनुयायिनम्, तम्, आवर्तमानम्, वनिता, वनान्तात्।
पपौ ,निमेषालसपक्ष्मपङ्क्तिः, उपोषिताभ्याम्, इव, लोचनाभ्याम्।।

अन्वयक्रमः;वनान्तात् ,वसिष्ठधेनोः,अनुयायिनम्, आवर्तमानम्, तम्,वनिता,निमेषालसपक्ष्मपङ्क्तिः, उपोषिताभ्याम्,लोचनाभ्याम् , इव, पपौ।

प्रतिपदार्थः;वनान्तात् = अरण्यमध्यात्; वसिष्ठधेनोः = नन्दिन्याः; अनुयायिनम् = अनुचरम् (सेवकम्); आवर्तमानम् = प्रत्यागच्छन्तम्; तम् = दिलीपम्; वनिता = सुदक्षिणा; निमेषालस पक्ष्मपङ्क्तिः; निमेष = निमेषेण; अलस = मन्दा; पक्ष्मपङ्क्तिः = पक्ष्माणाम् पङ्क्तिः यस्यास्सा, (निमेषरहिता सती);उपोषिताभ्याम् = कृतोपवासाभ्याम् , लोचनाभ्याम् = नेत्राभ्याम्;इव= यथा, पपौ= पीतवती; तम् अत्युत्कण्ठतया दृष्टवती इत्यर्थः।

श्लोकभावः;सुदक्षिणा-दिलीपौ आदर्शदम्पती। परस्परानुरागिणौ एतौ।'मयि सन्तितिंजनयितुम् एव राजा नन्दिनीव्रताचरणदीक्षां स्वीकृतवान्।गुरोः आदेशं रेखामात्रम् अपि अनतीत्य अरण्ये च आतप-कष्टादिकमपि अनुभवति इति सुदक्षिणायाः दिलीपे अनुरागातिशयः वर्तते। तेनैव आदरातिशयश्च वर्धते। अपि च प्रकृते सुदक्षिणा आश्रमे वर्तते। आश्रमः परिमितः। तत्र च वातावरणम् परिमितम्। तादृशे आश्रमे प्रातः प्रभृति एकाकिनी कालं यापयति। अतःसुदक्षिणा आनुरगातिशयेन एकाकितया च दिलीपं प्रतीक्षते। अत्रान्तरे आश्रमस्य मार्गे नन्दिन्याः अनुयायी सन् दिलीपः दृष्टः। दृष्टञ्च तम् दिलीपं सुदक्षिणा उपवासदीक्षां स्वीकृत्य पिपासाम् अनुभूयमानाभ्याम् इव लोचनाभ्याम्, प्रेम्णा पीतवती। अत्युत्कण्ठतया दृष्टवती इत्यर्थः।

व्याकरणांशाः;सन्धयः;निमेषालसा...; निमेष + अलसा(अ +अ =आ)सवर्णदीर्धसन्धिः।

वनान्तात्; वन + अन्तात्;(अ +अ =आ)सवर्णदीर्धसन्धिः।

समासाः; वसिष्ठधेनोः; वसिष्ठस्य धेनुः ,तस्य =षष्ठीतत्पुरुषसमासः।

निमेषा...पङ्क्तिः;निमेषालसा पक्ष्मपङ्क्तिः यस्याः सा =बहुव्रीहिसमासः।

कोशः; वनिता; "वनिता जनितात्यर्थानुरागायाम् " (अमरकोशः)।

**स्वावलोकनप्रश्नाः;**

१. सुदक्षिणा किमर्थं दिलीपम् उपोषिताभ्यामिव लोचनाभ्यां पीतवती?

२. सुदक्षिणा कीदृशी ?

## ४.२.६ नन्दिन्याः वर्णनम्

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुः दिनक्षपामध्यगतेव सन्ध्या।। २०।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः ;"दिलीपेन अनुगम्यमाना , सुदक्षिणया प्रत्युद्गम्यमाना च नन्दिनी सन्ध्या इव वर्तते " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "निलयाय गन्तुं नन्दिन्याः उपक्रमणम्" इति पाठ्यांशे वर्तते।

पदविभागः; पुरस्कृता, वर्त्मनि, पार्थिवेन, प्रत्युद्गता, पार्थिवधर्मपत्न्या।
तदन्तरे, सा, विरराज, धेनुः, दिनक्षपामध्यगता, इव, सन्ध्या।।

अन्वयक्रमः; वर्त्मनि,पार्थिवेन,पुरस्कृता, पार्थिवधर्मपत्न्या, प्रत्युद्गता, सा धेनुः, तदन्तरे, दिनक्षपामध्यगता, सन्ध्या, इव, विरराज,।

प्रतिपदार्थः; वर्त्मनि = तपोवनावृत्तिपथे,पार्थिवेन = राज्ञा दिलीपेन, पुरस्कृता = अग्रतः कृता,

पार्थिवधर्मपत्न्या,पार्थिव = राज्ञः दिलीपस्य, धर्मपत्न्या =सुदक्षिणया, प्रत्युद्गता = अभिमुखं गम्यमाना,सा = वसिष्ठस्य सम्बन्धिनी, धेनुः = नन्दिनी,तदन्तरे = सुदक्षिणा -दिलीपयोः मध्ये दिनक्षपामध्यगता, दिन = दिवसस्य,क्षपा = रात्रेश्च, मध्यगता = अन्तर्वर्तिनी,सन्ध्या =पाटल अरुणा सन्ध्याकान्तिरिव, विरराज = चकास।

श्लोकभावः; सायंकाले दिलीपः वनान्तात् नन्दिन्या सह प्रतिनिवृत्तः। आश्रमप्राङ्गणं च प्राप्तः, दिलीपेन अनुगम्यमना सती नन्दिनी आश्रमं प्रविष्टा।नाम नन्दिनीं पुरतः कृत्वा पश्चात् दिलीपः अनुगच्छति।आश्रमं प्राप्तां च नन्दिनीं सुदक्षिणा स्वागतीकृत्य अर्चयितुं प्रत्येष्यति। एवम् - आश्रमप्राङ्गणे पथि दिलीपेन पुरतः कृता, सुदक्षिणया च प्रत्यद्गता च नन्दिनी, दिवसः रात्रेश्च मध्यगता सन्ध्याकान्तिः इव विराजते।

विशेषांशः;अत्र दिवससदृशः दिलीपः, रात्रिसदृशी सुदक्षिणा, अरुणसन्ध्यासदृशी नन्दिनी। दिलीप-सुदक्षिणा-नन्दिनीनाम्, दिन-क्षपा-सन्ध्याभिः सादृश्यम् वर्णितम्।

व्याकरणांशाः;सन्धयः;तदन्तरे; तत् + अन्तरे(त् + अ =द्) जश्त्वसन्धिः।

मध्यगतेव;मध्यगता + इव (आ + इ = ए)गुणसन्धिः।

समासाः; पार्थिवधर्मपत्नी; पार्थिवस्य धर्मपत्नी = षष्ठीतत्पुरुषसमासः।

दिनक्षपामध्यगता;दिन - क्षपयोः मध्यगता = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः;**

१. नन्दिनी कथं विरराज ?

२. सन्ध्या कीदृशी?

## ४.२.७ नन्दिन्याः सायङ्कालपूजनम्

प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः।। २१।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः।अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"सायम् आश्रमंप्रति आगतां नन्दिनीं सुदक्षिणा पूजितवती " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "निलयाय गन्तुं नन्दिन्याः उपक्रमणम् "इति पाठ्यांशे वर्तते।

पदविभागः; - प्रदक्षिणीकृत्य, पयस्विनीम्, ताम्, सुदक्षिणा, साक्षतपात्रहस्ता।
प्रणम्य, च आनर्च, विशालम्, अस्याः, शृङ्गान्तरम्, द्वारम् , इव, अर्थसिद्धेः।।

अन्वयक्रमः; - साक्षतपात्रहस्ता, सुदक्षिणा,ताम्, पयस्विनीम्,प्रदक्षिणीकृत्य, प्रणम्य,च,विशालम्, अस्याः. शृङ्गान्तरम्, अर्थसिद्धेः द्वारम् , इव आनर्च।

प्रतिपदार्थः; साक्षतपात्रहस्ता, साक्षत = अक्षतैः सह ; पात्र =भाजनम्(अर्घ्यपात्रम्) ; हस्ता = हस्ते यस्याः सा,तथाविधा; सुदक्षिणा = दिलीपस्य धर्मपत्नी ;पयस्वनीम् = प्रशस्तक्षीरदायिनीम्; ताम् = नन्दिनीम् ;प्रदक्षिणीकृत्य = प्रदक्षिणां कृत्वा; च =अपि च ; प्रणम्य = नमस्कृत्य; विशालम् = विस्तृतम्; अस्याः = नन्दिन्याः; शृङ्गान्तरम् = शृङ्गमध्यभागम् ; अर्थसिद्धेः = सन्तानरूपकार्यसिद्धेः; द्वारम् = प्रवेशमार्गम् ; इव = यथा ; आनर्च = पूजयामास।

श्लोकभावः;नन्दिनी पयस्विनी; अधिकपयोदायिनी।सुदक्षिणा च अक्षतपात्रहस्ता; पूजाद्रव्याणि सर्वाण्यपि एकस्मिन् पात्रे समिष्ट्या भवन्ति। तत्र हरिद्रा-कुंकुम-गन्ध-अक्षतानि विद्यन्ते।इदमेव च पूजापात्रं वा, अर्चनापत्रंवा,अर्घ्यपात्रम् भवति। तं हस्ते स्वीकृतवती ।सुदक्षिणा नन्दिनीं त्रिवारं प्रदक्षिणं कृतवती,नमस्कारं च आचरितवती। नन्दिन्याः श्रृङ्गान्तरं तस्याः उदारबुद्धिः इव अतिविशालम्। सन्ततिप्रदानरूपस्य अर्थसिद्धेः द्वारम् इव विद्यते।अनन्तरं तादृशं नन्दिन्याः विशालम् शृङ्गान्तरं श्रद्धया अर्चितवती।

विशेषांशः;अत्र च,आश्रमे सायं नन्दिन्याःसमुचितं स्वीकरणं(Reception) लब्धम् इत्यंशः अभिवर्णितः।

व्याकरणांशाः;सन्धयः; साक्षत...; सा + अक्षत... (आ + अ =आ) सवर्णदीर्घसन्धिः।

चानर्च; च + आनर्च (अ + आ = आ) सवर्णदीर्घसन्धिः।

समासाः; अक्षतपात्रम्; अक्षातानां पात्रम् =षष्ठीतत्पुरुषसमासः।

शृङ्गान्तरम्; शृङ्गयोः अन्तरं =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः;**

१. सुदक्षिणा कीदृशी ?

२. नन्दिन्याः शृङ्गान्तरं कथं विद्यते ?

## ४.२.८ पूजायाः परिग्रहणम्

वत्सोत्सुकाऽपि स्तिमिता सपर्य्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरः फलानि।। २२।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; 'नन्दिनी स्तिमिता सती सुदक्षिणायाः अर्चनं परिगृहीतवती' इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,निलयाय गन्तुं नन्दिन्याः उपक्रमणम् इति पाठ्यांशे वर्तते।

पदविभागः; वत्सोत्सुका, अपि, स्तिमिता सपर्याम् ,प्रत्यग्रहीत् सा, इति, ननन्दतुः, तौ।
भक्त्या, उपपन्नेषु, हि ,तद्विधानाम्, प्रसादचिह्नानि, पुरः, फलानि।।

अन्वयक्रमः; सा, वत्सोत्सुका, अपि,स्तिमिता सपर्याम्, प्रत्यग्रहीत् , इति, तौ, ननन्दतुः,हि, भक्त्या, उपपन्नेषु, तद्विधानाम्, प्रसादचिह्नानि, पुरः, फलानि ,हि।

प्रतिपदार्थः ; सा = नन्दिनी; वत्सोत्सुका, वत्स = शिशौ; उत्सुका अपि = उत्कण्ठिता अपि; स्तिमिता = निश्चला सती ; सपर्याम् = पूजाम्; प्रत्यग्रहीत् = स्वीचकार; इति = हेतोः; तौ= सुदक्षिणा-दिलीपौ ; ननन्दतुः = आनन्दं प्रापतुः; भक्त्या = श्रद्धया;उपपन्नेषु = युक्तेषु;तद्विधानाम्= करुणापराणाम् नन्दिनीसदृशानाम् ; प्रसादचिह्नानि, प्रसाद = प्रसन्नतायाः; चिह्नानि= लक्षणानि ; पुरः फलानि हि, पुरः =अग्रे (प्रत्यासन्नानि);फलानि = जनिष्यमाणकार्यसिद्धिरूप प्रयोजनानि ; हि = खलु।

श्लोकभावः; नन्दिनी सकृत्प्रसूता, एकसन्ताना। अतः नन्दिन्याः स्ववत्सायाम् वात्सल्यं च सहजम्।प्रातश्च व्रताचरणाय वनं विसृष्टा। सायं पुनः आश्रमम् आनीता। आश्रमस्य आनयनानन्तरं ,माता खलु, स्ववत्सायाः दर्शने अत्युत्कण्ठिता भवति। परं नन्दिनी निश्चला सती, सुदक्षिणायाः प्रत्युद्गमनम्, प्रदक्षिणम्, प्रणमनम्, पूजनम्, इत्यादिकं,प्रीतिभावेन, परिगृह्णाति। तेन, राजदम्पती सुदक्षिणा- दिलीपौ अपि,प्रकामं,सुन्तुष्टौ। तथाहि -करुणापराणाम् महिमान्वितानां प्रभावपूर्णानां च नन्दिनीसदृशानां, स्तिमितता, पूजास्वीकरणम् इत्यादीनि प्रसन्नतायाः सूचकानि। तथा हि-एतत् च भविनि जनिष्यमाणानां फलानां ज्ञापकं भवति ।

व्याकरणांशाः; सन्धयः; वत्सोत्सुका ; वत्स + उत्सुका (आ + उ = ओ)गुणसन्धिः।

प्रत्यग्रहीत् ; प्रति +अग्रहीत्(इ + अ = य्) यणादेशसन्धिः।

समासाः; वत्सोत्सुका ; वत्से उत्सुका =सप्तमीतत्पुरुषसमासः।

प्रसादचिह्नानि ; प्रसादस्य चिह्नानि =षष्ठीतत्पुरुषसमासः।

कोशः; सपर्या ; पूजा नमस्या अपचितिः सपर्या अर्चा अर्हणा (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१. नन्दिनी कीदृशी ?

२. सुदक्षिणा-दिलीपौ किमर्थं ननन्दतुः?

## ४.२.९ गुरवे निवेदनम्

गुरोः सदारस्य निपीड्य पादौ, समाप्य सान्ध्यं च विधिं दिलीपः।
दोहावसाने पुनरेव दोग्ध्रीम्, भेजे भुजोच्छिन्नरिपुर्निषण्णाम्।। २३।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "दिलीपः तत्तत् दिवसीयं नन्दिन्याः निरन्तरितं व्रतानुष्ठानं वसिष्ठस्य निवेदयति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "निलयाय गन्तुं नन्दिन्याः उपक्रमणम् " इति पाठ्यांशे वर्तते।

पदविभागः; गुरोः, सदारस्य, निपीड्य, पादौ, समाप्य, सान्ध्यं, च, विधिम्, दिलीपः।
दोहावसाने, पुनः, एव, दोग्ध्रीम्, भेजे, भुजोच्छिन्नरिपुः, निषण्णाम्।।

अन्वयक्रमः; भुजोच्छिन्नरिपुः दिलीपः, सदारस्य, गुरोः पादौ, निपीड्य, सान्ध्यं विधिं च समाप्य ,दोहावसाने, निषण्णाम् ,दोग्ध्रीम्, एव, पुनः, भेजे।

प्रतिपदार्थः; भुजोच्छिन्नरिपुः, भुज = बाहुबलेन; उच्छिन्न = उत्पाटित; रिपुः = शतृवर्गः ; दिलीपः = राजा ;सदारस्य = भार्यया अरुन्धत्या अन्वासितस्य ; गुरोः = वसिष्ठस्य,पादौ = चरणौ; निपीड्य = संवाह्य, नमस्कृत्य ; सान्ध्यम् = सन्ध्याकालिकम्;विधिम् = अनुष्ठानम्, च = अपि ; समाप्य = समापनं कृत्वा,परिसमाप्य; दोहावसाने, दोह = दोहनस्य; अवसाने =अन्ते; निषण्णाम् = उपविष्टाम्; दोग्ध्रीम् = इष्टार्थवर्षिणीम् नन्दिनीम् एव; पुनः = भूयः; भेजे = सेवितवान् (समाराधपरः अभूत्)

श्लोकभावः; 'विक्रमता-विधेयता ' इत्येतौ द्वावपि परस्परं विरुद्धगुणौ, एतौ प्रयाशः, एकत्र न भवतः। दिलीपस्तु विरुद्धगुणामाम् आश्रयः दिलीपः,समर्थः - स्वभुजेनैव रिपून् उच्छिन्नवान्। एवं बाहुबलसमपन्नः अपि दिलीपः आश्रमे अपि,ऋषिदम्पत्योः विधेयस्सन्,तद्दिवसीयान् नन्दिन्याः व्रतानुष्ठानगतविशेषान् निवेदयति।

किञ्च अयं दिलीपः नियमशीलः, सायङ्कालीनं विधिविहितं सन्ध्यावन्दनादिकं आचरति।अपि च अयम् आदेशपालने निबद्धः।निबद्धशीलस्सन्, भारं अलसतां वा अमत्वा, श्रद्धया दिलीपः, दोहनानन्तरं पुनः नन्दिनीं एव सेवते। एवं दिलीपः कामुदुघायाः नन्दिन्याः समाराधने आसक्तः भवति।

व्याकरणांशाः;सन्धयः; दोहावसाने; दोह + अवसाने (अ + अ=आ) सवर्णदीर्घसन्धिः।
भुजोच्छिन्नरिपुः; भुज + उच्छिन्नरिपुः (अ + उ = ओ) गुणसन्धिः।

समासाः; दोहावसाने ; दोहस्य अवसानम्, तस्मिन् =षष्ठीतत्पुरुषसमासः।
भुजोच्छिन्नरिपुः ; भुजेन उच्छिन्नः रिपुः येन सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः;**

१.भुजोच्छिन्नरिपुः कः ?

२. "गुरोस्सदारस्य निपीड्य पादौ... " अत्र गुरुः कः? दाराः के?

## ४.२.१० नन्दिन्याः समीपे एव शयनम्

तामन्तिकन्यस्तबलिप्रदीपाम्, अन्वास्य गोप्ता गृहिणीसहायः।
क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत्।। २४।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति ।

श्लोकसन्दर्भः ; "दिलीपः रात्रौ अपि नन्दिन्याः एव सकाशे निद्रितवान् " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिन्याः वरप्रदान'नामके द्वितीयसर्गे"निलयाय गन्तुं नन्दिन्याः उपक्रमणम्" इति पाठ्यांशे वर्तते।

पदविभागः ; ताम्, अन्तिकन्यस्तबलिप्रदीपाम्, अन्वास्य, गोप्ता, गृहिणीसहायः।
क्रमेण, सुप्ताम्, अनुसंविवेश, सुप्तोत्थिताम्, प्रातः, अनूदतिष्ठत्।।

अन्वयक्रमः ; गोप्ता, गृहिणीसहायः सन्, अन्तिकन्यस्तबलिप्रदीपाम्, ताम्, अन्वास्य,
क्रमेण, सुप्ताम्, अनुसंविवेश। प्रातः सुप्तोत्थिताम्, अनु उदतिष्ठत्।

प्रतिपदार्थः ; गोप्ता = पालकः दिलीपः; गृहिणासहायः, गृहिणी = भार्या एव, सहायः= सहकारभूतः सन्; अन्तिकन्यस्तबलिप्रदीपाम्, अन्तिक = समीपे एव; न्यस्त = समायोजित; बलिप्रदीपाम् = आहार-दीपवतीम् ;ताम् = नन्दिनीम्; अन्वास्य = संसेव्य ;समीपे एव उपविश्य; क्रमेण =क्रमशः ; सुप्ताम् = शनैः शनैः निद्रायै उपक्रान्ताम्;अनु = अनुसृत्य; संविवेश = निद्राम् उपगतवान्; प्रातः = प्रभातकाले; सुप्तोत्थिताम् = स्वापात् जागृताम् ; अनु = अनुसृत्य ; उदतिष्ठत् = उत्थितवान्;

श्लोकभावः; सुदक्षिणा दिलीपौ अहोरात्रं नन्दिन्याः व्रतानुष्ठानपरौ भवतः। दिलीपः नन्दिन्याः पोषकः। पोषकश्च पशूनाम् क्षुण्णिवारणार्थं आहारं समायोजयेत्। पशुपक्ष्यादिभ्यः दीयमानस्य आहारस्य बलिः इति व्यवहारः। दिलापश्च रात्रौ नन्दिन्याः अपेक्षितं आहारादिकं समीपे एव, समायोजयति। क्रिमिकीटकादिभ्यः प्रमादं वारयितुं दीपमपि प्रज्ज्वाल्य पार्श्वतः स्थापयति। नन्दिनीं च पालयति ।

नन्दिन्याः सेवने दिलीपस्य सुदक्षिणा सहकरोति। सहचरी च भवति। नन्दिनी विश्राम्यति। क्रमेण च निद्रां गच्छति। निद्रितां नन्दिनीम् अनुसृत्यैव सुदक्षिणा -दिलीपौ अपि निद्रितौ भवतः। प्रातः एव स्वापात् नन्दिनी उत्तिष्ठति। ताम् अनु एव राजदम्पती अपि उत्थितौ भवतः। एवम् सुदक्षिणा-दिलापौ अहोरात्रं नन्दिन्याः सेवने श्रद्धालू भवतः।

व्याकरणांशाः;सन्धयः; सुप्तोत्थिताम् ;सुप्त+उत्थिताम् (अ + उ = ओ)गुणसन्धिः।
अनूदतिष्ठत्; अनु + उदतिष्ठत् (उ + उ = ऊ)सवर्णदीर्घसन्धिः।

समासाः;गृहिणीसहायः; गृहीणी सहाया यस्य सः = बहुव्रीहिसमासः।
सुप्तोत्थिताम्; सुप्ता चासौ उत्थिता च = विशेषणोभयपदकर्मधारयसमासः।

कोशः; बलिः; करोपहारयोः पुंसि बलिः प्राण्यङ्गणे स्त्रियाम्( अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१."गृहिणीसहायः" अत्र "गृहिणी" का ?

२.रात्रौ नन्दिन्याः सेवनाय दिलीपः किं किं समायोजितवान् ?

## ४.२.११. एकविंशतिदिनानि यावत् नन्दिन्याः सेवनम्

इत्थं व्रतं धारयतः प्रजार्थम्, समं महिष्या महनीयकीर्तेः।
सप्त व्यतीयुस्त्रिगुणानि तस्य, दिनानि दीनोद्धरणोचितस्य।। २५।।

श्लोकपरिचयः ;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति ।

श्लोकसन्दर्भः ; "नन्दिन्याः सेवने सुदक्षिणा-दिलीपयोः एकविंशतिदिनानि अतीतानि "इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "निलयाय गन्तुं नन्दिन्याः उपक्रमणम्" इति पाठ्यांशे वर्तते ।

पदविभागः; - इत्थम्, व्रतम्, धारयतः, प्रजार्थम्, समम्, महिष्या, महनीयकीर्तेः।
सप्त, व्यतीयुः, त्रिगुणानि, तस्य, दिनानि, दीनोद्धरणोचितस्य।।

अन्वयक्रमः; - इत्थम्, प्रजार्थम्, महिष्या,समम् व्रतम्, धारयतः,दीनोद्धरणोचितस्य,
महनीयकीर्तेः, तस्य, त्रिगुणानि,सप्त दिनानि, व्यतीयुः।

प्रतिपदार्थः; इत्थम्=अनेन प्रकारेण; प्रजार्थम् =सन्तानार्थम्; व्रतम्=गोसेवादीक्षाम्;धारयतः =स्वीकृतवतः; दीनोद्धरणोचितस्य,दीन = दीनानाम्/दयनीयानाम्;उद्धरणे = अभिवर्धने उत्तारणे,पोषणे; उचितस्य = सिद्धहस्तस्य ; महनीयकीर्तेः, महनीय = प्रशस्ता;कीर्तिः = यशः यस्य सः,तस्य = दिलीपस्य ;त्रिगुणानि = त्रिसंख्यया गुणितानि;सप्त = सप्तसंख्याकानि; (3x7=21) दिनानि=अहांसि; व्यतीयुः = अतीतानि।

श्लोकभावः; दिलीपस्य दीनाः अभिमताः। तेषाम् उद्धरणे अयं बद्धदीक्षः। अतः एव दिलीपः प्रशंसनीयः प्रशस्तकीर्तिमान् च जातः। अयं च सन्तानार्थं नन्दिन्याः व्रतानुष्ठानदीक्षां स्वीकरोति ्सुदक्षिणा च अत्र सहभागिनी भवति।एवं सन्तानार्थायविधये,अहर्निशम् नन्दिन्याः व्रतम् आचरतः दिलीपस्य त्रिगुणानि सप्त दिनानि(3x7=21)= एकविंशतिदिनानि व्यातीतानि भवन्ति।

व्याकरणांशाः;सन्धयः;दीनोद्धरण...; दीन + उद्धरण...(अ + उ = ओ) गुणसन्धिः।
उद्धरणोचितस्य.;..उद्धरण + उचितस्य(अ + उ = ओ) गुणसन्धिः।
समासाः;महनीयकीर्तेः;महनीया कीर्तिः यस्य सः,तस्य =बहुव्रीहिसमासः।
दीनोद्धरणोचितस्य;दीनोद्धरणे उचितः,तस्य = सप्तमीतत्पुरुषसमासः।
कोशः; महिषी; "कृताभिषेका महिषी" (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१.दिलीपः महनीयकीर्तिः कुतः जातः ?

२. त्रिगुणानि सप्त इत्युक्ते कति दिनानि  भवन्ति?

## ४.३. उपसंहारः

समर्पणम्,समाराधनम्, स्वीकरणम्,इति इमाः  मानवस्य अभ्युदयकराः भावनाः। अवश्यं मानवेन अभ्यसनीयाः, आचरणीयाश्च।एते विषयाः निलयाय गन्तुं नन्दिन्याः उपक्रमणम् इति पाठ्यांशव्याजेन पाठकानां परिचयाय उपनिबद्धाः। कथाप्रबन्धेन कान्तासम्मितपद्धत्या, व्यङ्ग्यमर्यादया च उपनिबद्धाः इमाः भावनाः समर्पणसंस्कारम्,समाराधनसंस्कारम्, स्वीकरण संस्कारम् च पाठकानां मनस्सु आधातुम् अलं भवन्ति।सुदक्षिणायाः प्रत्युद्गमनम् ,प्रदक्षिणम्, प्रणमनम्, अर्चनम्,इत्यादीनि समर्पणभावं ,समाराधनभावं च सन्दिशन्ति। नन्दिन्याः सपर्या परिग्रहणं स्वीकरणस्वभावं च सन्दिशति। अत्र च प्रतिपद्यं विनयस्फूर्तिं, विधेयतास्फूर्तिं, मर्यादाक्रमपालनस्फूर्तिं वा अन्यतमं विषयं पाठकजनमनांसि अप्रबाध्य,बोधयति।

## ४.४. अभ्यासः

श्लोकद्वयं व्याख्यात -

१). सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः।।

२). पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या।।

* * *

# अंशः-V; नन्दिन्याः परीक्षणम्

संरचना

५.० परिचयः
५.१ लक्ष्याणि
५. २ नन्दिन्याः परीक्षणम्
५.२.१ नन्दिन्याः गुहाप्रवेशनम्
५.२.२ सिंहस्य उत्पतनम्
५.२.३ नन्दिन्याः आक्रन्दनम्
५.२.४ सिंहस्य दर्शनम्
५.२.५ सिहस्य वधाय दिलीपस्य उद्यमनम्
५.२.७ दिलीपस्य बाहोः प्रतिष्टम्भनम्
५.२.८ दिलीपस्य अन्तर्दहनम्
५.३ उपसंहारः
५.४ अभ्यासः

## ५.० परिचयः

नन्दिन्याः परीक्षणम् इति अयं पाठ्यांशः रघुवंशस्य द्वितीयसर्गे वर्तते। अस्यैव द्वितीय सर्गस्य कथापरतया नन्दिनीवरप्रदानम् इति च प्रसिद्धिः अस्ति। अयं च पाठ्यांशः षड्विं शतितमश्लोकतः आरभ्य द्वात्रिंशत्तमश्लोकपर्यन्तं(२६-३२) परिमितः भवति। प्रधानतया नन्दिन्याः परीक्षणात्मकः विषयः प्रस्तूयते। प्रकृते च अत्र नन्दिनी हिमालयेषु गुहां प्रविशति। नन्दिन्याः उपरि पूर्वदेहे सिंहः उत्पतति। स्वाम् रक्षितुं नन्दिनी आक्रन्दति।दिलीपः गुहासु प्रतिध्वनितं नन्दिन्याः आक्रन्दनं शृणोति। नन्दिन्याम् उत्पतितस्य सिहस्य वधाय दिलीपः बाणं सन्धातुं
करं तूणीरे क्षिपति। दिलीपस्य बाहुश्च तत्र एव स्तगितः भवति। सिंहस्य नन्दिन्याः आक्रमणं वारयितुम् असमर्थस्सन् दिलीपश्च अन्तर्दहति। प्रधानतया एते अंशाः अत्र वर्णिताः वर्तन्ते।

## ५.१ लक्ष्याणि

जगति प्राणिषु मानवः बहु उत्तमः भवति।सः सदा अभीष्टं साधयितुं प्रभवति।तस्य विवेचनात्मिका बुद्धिः,सुखाद्युपलब्धिसाधनं मनः,अभिप्रायाविष्करणाय व्यक्ता भाषा इत्येवं सुसम्पन्ना सामग्री विद्यते। वाङ् -मनो -बुद्धिभिः आर्जयितुं शक्यः नागरिकः संस्कारः,तत्साधनाय पुरुषस्य(मानवस्य) उद्यमकरणाय अवकाशश्च इत्येतत् अपि सर्वं मानवैकसाध्यमेव। अत्र सन्देहःनास्ति। एतत्प्रक्रियापरम्परायाम् मानवः यं कञ्चन साधयितुं यावत् सङ्कल्पितो न भवति,तावत् तस्य आतङ्काः एव न भासन्ते।यदा तु सङ्कल्पितोभवति,तत् आरभ्यैव आतङ्काः आविर्भवन्ति। आवाहिताः भवन्ति। परापतन्ति च। तदधिगमनाय प्रयतनमेव पुरुषार्थसाधनं भवति।

अपि च दुःखं न्यासस्य रक्षणम् इति भासस्य उक्तिः। अत्र न्यासपदं सङ्कल्पितस्य प्रतिज्ञातस्यापि बोधकं भवति। यद्यत् प्रतिज्ञातम्, यद्यत् च सङ्कल्पितं, अवधिपर्यन्तं समाप्तिपर्यन्तं वा तस्य पालनं कष्टसाध्यं दुःखकरं च भवति । तदधिगमनाय दृढदीक्षा आवश्यकी भवति।सा च दृढा दीक्षा च पुरुषार्थसाधिका सती कालपरीक्षार्थम् अपि तिष्ठेत् । आत्मानं च पवित्रतया निरूपयेच्च।एतत् स्फूर्तिप्रदश्च अयं पाठ्यांशः।एतत् पाठ्यांशस्य अध्ययनेन -

- नन्दिन्याः परीक्षणसङ्कल्पं प्रति, ज्ञातुं प्रभवति।
- नन्दिन्याः दुष्प्रधर्षत्वम्,दिलीपस्य आत्मविश्वासम् प्रति, च भाषितुं पारयति।
- नन्दिन्याः आर्तनादस्य हृदयविदारकतां प्रति, लिखितुं समर्थो भवति।
- नन्दिन्याः परिरक्षणाय दिलीपस्य प्रयत्नं प्रति, पठितुं प्रभवति।
- नन्दिन्याः प्रभावपूर्णं महिमातिशयम् अवगन्तुं प्रभवति।
- नन्दिन्याः महिमातिशयस्य अधिगमने दिलीपस्य अशक्ततां प्रति, लिखितुं पारयति।
- कालिदासस्य कवितायां वर्णनवैशिष्ट्यम् अवगन्तुं समर्थो भवति।
- कालिदासस्य कवितायाम् उपमाचातुर्यम् उद्दिश्य लिखितुं पारयति।

## ५.२ नन्दिन्याः परीक्षणम् (२६-३२)

### ५.२.१ नन्दिन्याः गुहाप्रवेशनम्

अन्येद्युरात्माऽनुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः।
गङ्गाप्रपातान्तनिरूढघासम्, गौरीगुरोर्गह्वरमाविवेश।। २६।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "नन्दिनी दिलीपस्य मनोभावं परीक्षितुं सङ्कल्पिता" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, नन्दिन्याः परीक्षणम् इति पाठ्यांशे वर्तते।

पदविभागः; अन्येद्युः, आत्मानुऽचरस्य, भावम्, जिज्ञासमाना, मुनिहोमधेनुः।
गङ्गाप्रपातान्तनिरूढघासम्, गौरीगुरोः, गह्वरम्,आविवेश।।

अन्वयक्रमः; अन्येद्युः, मुनिहोमधेनुः आत्मानुऽचरस्य,भावम्, जिज्ञासमाना,गङ्गाप्रपातान्तनिरू-
ढघासम्, गौरीगुरोः, गह्वरम्,आविवेश।

प्रतिपदार्थः; अन्येद्युः = अन्यस्मिन् द्वाविंशति तमे दिने; मुनिहोमधेनुः, मुनि = वसिष्ठस्य; होम = यज्ञयागादिनिमित्तिका; धेनुः = नन्दिनी; आत्माऽनुचरस्य,आत्म = स्वस्याः;(नन्दिन्याः) अनुचरस्य= अनुयायिनः दिलीपस्य;भावम्=गुरौ भक्तिभावम्,स्वस्याम् अनुकम्पाभावञ्च; जिज्ञासमाना = ज्ञातुम् इष्यमाणा सती; गङ्गाप्रपातान्तनिरूढघासम्, गङ्गा = गङ्गाप्रवाहस्य; प्रपात = प्रपतनस्य; अन्त = समीपप्रदेशे; निरूढ = अतिशयेन अविरलतया उत्पन्नम्,घासम् = बालतृणम् यस्मिन् सः, तम्;गौरीगुरोः, गौरी = पार्वत्याः; गुरोः = पितुः हिमवतः; गह्वरम् =

गुहाम्; आविवेश =प्रविष्टवती।

श्लोकभावः; दिलीपः व्रताचरणाय नन्दिन्याः अनुचरः भवति। तस्य च नन्दिन्याः समारधने एकविंशतिदिनानि व्यतीतानि भवन्ति। नन्दिनी दिलीपस्य गुरौ भक्तिभावं, स्वास्याम् अनुकम्पाभावं च ज्ञातुं सङ्कल्पिता भवति।द्वाविंशतितमे दिने परीक्षितुं प्रक्रमते च। व्रताचरणाय दिलीपः हिमालयप्रान्तं खलु आगच्छति, तत्र च प्रदेशे गङ्गाप्रवाहस्य प्रपतनानि विद्यन्ते।तत्र शीकारैः वर्धितं बालतृणम्,तेन च हरिताः पर्वतपर्यन्तभूमयश्च सन्ति। दिलीपं परीक्षितुकामा नन्दिनी तत्र स्थिताम् अन्यतमां हिमवत्पर्वतपर्यन्तगुहां प्रविशति।

व्याकरणांशाः;

सन्धयः;आत्मानुऽचरस्य; आत्म + अनुचरस्य,(अ + अ = आ)सवर्णदीर्घसन्धिः।

...प्रपातान्त...; ...प्रपात + अन्त... (अ + अ = आ)सवर्णदीर्घसन्धिः।

समासाः; मुनिहोमधेनुः; मुनिहोमाय धेनुः = चतुर्थीतत्पुरुषसमासः।

गौरीगुरोः; गौर्याः गुरुः, तस्य= षष्ठीतत्पुरुषसमासः।

कोशः; घासः; "शष्पं बालतृणं घासः " (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१.. नन्दिनी कीदृशी ?

२. नन्दिनी किं कर्तुं इच्छति ? कुत्र प्रविशति ?

### ५.२.२ सिंहस्य उत्पतनम्

सा दुष्प्रधर्षा मनसाऽपि हिंस्रैः, इत्यद्रिशोभाप्रहितेक्षणेन।
अलक्षिताभ्युत्पतनो नृपेण, प्रसह्य सिंहः किल तां चकर्ष।।२७।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"हिमवतःगुहासु कश्चन सिहःनन्दिनीं पादाक्रान्तां करोति"इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "नन्दिन्याः परीक्षणम् "इति पाठ्यांशे वर्तते।

पदविभागः; सा , दुष्प्रधर्षा, मनसा, अपि, हिंस्रैः, इति, अद्रिशोभाप्रहितेक्षणेन।
अलक्षिताभ्युत्पतनः, नृपेण, प्रसह्य, सिंहः, किल, ताम्, चकर्ष।।

अन्वयक्रमः; सा हिंस्रैः मनसा, अपि, दुष्प्रधर्षा, इति, अद्रिशोभाप्रहितेक्षणेन, नृपेण,
अलक्षिताभ्युत्पतनः, सिंहः, ताम्, प्रसह्य, चकर्ष ,किल।

प्रतिपदार्थः;सा= नन्दिनी;हिंस्रैः=क्रूरजन्तुभिः व्याघ्रादिभिः;मनसाऽपि = आलोचनेन अपि; दुष्प्रधर्षा =तर्जयितम् अशक्या,अनभिगम्या;इति=हेतोः;अद्रिशोभाप्रहितेक्षणेन,अद्रि=हिमवतः; शोभा =सौन्दर्यदर्शने;प्रहित= निक्षिप्त;ईक्षणेन=दृष्टिमता;नृपेण=राज्ञा दिलीपेन,अलक्षिताभ्युत्पतनः,

अलक्षित=अदर्शित;अभ्युत्पतनः= आक्रमणः;सिंहः=केसरी; ताम् =नन्दिनीम्; प्रसह्य = हठात्; चकर्ष=बलात् आचकर्ष।

श्लोकभावः;नन्दिनी सौरभेयी,कामधेनोः पुत्री दिव्या महिमान्विता प्रभावपूर्णा च। अतः दिलीपः व्याघ्रादिभिः प्रधर्षयितुम् अशक्या,व्याध्रादिभ्यः नन्दिन्याः भीतिर्वा प्रमादो वा न भवति इति चिन्तयति । निर्भीकं हिमाद्रिशोभां द्रष्टुं उपक्रमते। हिमालयः प्रकृत्या सुन्दरः खलु। तत्सौन्दर्य दर्शने तत्परश्च भवति।नन्दिनी गुहां प्रविशति।दिलीपस्तु नन्दिनीं न पश्यति। अत्रान्तरे कश्चन सिंहः हठात् नन्दिनीम् आकर्षति। उत्पतति, पादाक्रान्तं च करोति।

व्याकरणांशाः;सन्धयः;प्रहितेक्षणेन; प्रहित + ईक्षणेन (अ + ई = ए) गुणसन्धिः।

मनसापि;  मनसा + अपि; (आ + अ = आ) सवर्णदीर्घसन्धिः।

समासाः; अद्रिशोभा...; अद्रेः शोभा,,, = षष्ठीतत्पुरुषसमासः।

...प्रहितेक्षणेन;...प्रहितम् ईक्षणम् येन,सः,तेन = बहुव्रीहितत्पुरुषसमासः।

कोशः;प्रसह्य; "प्रसह्य तं हठार्थकम्" (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१.नन्दिनीं कीदृशी ?

२.दिलीपः किं करोति ?

३.सिंहः कीदृशः ?

## ५.२.३ नन्दिन्याः आक्रन्दनम्

तदीयमाक्रन्दितमार्तसाधोः गुहानिबद्धप्रतिशब्ददीर्घम्।

रश्मिष्विवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम्।। २८।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"नन्दिनी आर्त्या क्रोशति । दिलीपश्च हठात् दृष्टिं निवर्तयति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "नन्दिन्याः परीक्षणम्" इति पाठ्यांशे वर्तते।

पदविभागः;  तदीयम्, आक्रन्दितम्, आर्तसाधोः, गुहानिबद्धप्रतिशब्ददीर्घम्।

रश्मिषु, इव, आदाय, नगेन्द्रसक्ताम्, निवर्तयामास, नृपस्य, दृष्टिम्।।

अन्वयक्रमः; गुहानिबद्धप्रतिशब्ददीर्घम्, तदीयम्, आक्रन्दितम्, आर्तसाधोः,नृपस्य, नगेन्द्रसक्ताम्, दृष्टिम्,रश्मिषु,आदाय, इव, निवर्तयामास।

प्रतिपदार्थः;गुहानिबद्धप्रतिशब्ददीर्घम्, गृहा = गह्वरेषु; निबद्ध = व्याप्तस्सन्; प्रतिशब्द =

प्रतिध्वनिना; दीर्घम् = दीर्घीकृतम्; तदीयम् = नन्दिनीसम्बन्धि; आक्रन्दितम् = उच्चैः शोकरुदितम्; आर्तसाधोः, आर्त = बाधितेषु; साधोः = हितकरस्य;नृपस्य = दिलीपस्य; नगेन्द्रसक्ताम्, नगेन्द्र = पर्वतराजे हिमालये, सक्ताम् = संलग्नाम्; दृष्टिम् = अवलोकनम्; रश्मिषु = प्रग्रहेषु; आदाय = स्वीकृत्य; इव = यथा; निवर्तयामास = अपसारयामास।

श्लोकभावः; नन्दिनी गुहां प्रविशति। सिंहश्च नन्दिनीं बलात् आकर्षति, पादाक्रान्तं करोति। नन्दिनी भयेन चकिता भवति। आर्त्या उच्चैः आक्रन्दति च। आक्रन्दनं हृदयं विदारयति, हिमालयगुहासु प्रतिध्वनति। नन्दिन्याः दीर्घाक्रन्दनस्य भ्रान्तिं जनयति च।

रश्मयः= प्रग्रहाः, अश्वादीनां मुखेषु वा श्रृङ्गेषु वा आबध्यन्ते।नियन्त्रणाय सूतेन, चोदकेन वा हस्तेषु धार्यन्ते। ते च गच्छतः मार्गात् अश्वादीनां विश्रृङ्खलतां प्रतिबध्नन्ति। यथा रश्मयः गच्छतः मार्गात् विशृङ्खलताम् अपावृत्य अश्वादीन् निवर्तयन्ति,तथा प्रकृते नन्दिन्याः आक्रन्दनं अद्रिशाभां पश्यतः दिलीपस्य दृष्टिं निवर्तयति। अर्थात् दिलीपः आक्रन्दनं शृणोति। अनुपदमेव अप्रमत्तः भवति।अद्रिशोभादर्शनात् निवृत्तः अपि भवति इति भावः ।

व्याकरणांशाः;सन्धयः;नगेन्द्र...; नग + इन्द्र...(अ + इ= ए)गुणसन्धिः।

रश्मिष्विव; रश्मिषु + इव (उ + इ =व्)यणादेशसन्धिः।

समासाः; गुहानिबद्ध...; गुहासु निबद्ध...=सप्तमीतत्पुरुषसमासः।

नगेन्द्र...; नगानाम् इन्द्रः - नगेन्द्र.. =षष्ठीतत्पुरुषसमासः।

कोशः; रश्मिः; "किरणप्रगृहौ रश्मि" (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१.. नन्दिन्याः आक्रन्दितं कीदृशम् ?

२. नन्दिन्याः आक्रन्दितं कथम् इव दिलीपस्य दृष्टिं निवर्तयामास ?

## ५.२.४ सिंहस्य (वर्णनम्) दर्शनम्

स पाटलायां गवि तस्थिवांसम्, धनुर्धरः केसरिणं ददर्श।
अधित्यकायामिव धातुमय्याम्, लोध्रद्रुमं सानुमतः प्रफुल्लम्।। २९।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"दिलीपः नगेन्द्रसक्तां दृष्टिं निवर्तयति, नन्दिन्याः उपरि पतितं सिंहं पश्यति" इत्येतदेशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे "नन्दिन्याः परीक्षणम्" इति पाठ्यांशे वर्तते।

पदविभागः; सः, पाटलायाम्, गवि, तस्थिवांसम्, धनुर्धरः, केसरिणम्, ददर्श।
अधित्यकायाम्, इव, धातुमय्याम्, लोध्रद्रुमम्, सानुमतः, प्रफुल्लम्।।

अन्वयक्रमः;   धनुर्धरः, सः,पाटलायाम्,गवि, तस्थिवांसम्,केसरिणम्,सानुमतः, धातुमय्याम्, अधित्यकायाम् ,प्रफुल्लम्,लोध्रद्रुमम्,इव, ददर्श।

प्रतिपदार्थः; धनुर्धरः, धनुषः = चापस्य,धरः= धारी; सः =राजा दिलीपः; पाटलायाम् =सन्ध्या अरुणायाम्; गवि = नन्दिन्याम्; तस्थिवांसम् = उत्पत्य विद्यमानम्; केसरिणम् = सिंहम्; सानुमतः = पर्वतस्य; धातुमय्याम् = गैरिकादिभिः आवृतायाम्; अधित्यकायाम् = ऊर्ध्वभूमौ; प्रफुल्लम् = विकसितम्; लोध्रद्रुमम् = लोध्रनामकं वृक्षम्; इव = यथा; ददर्श = अपश्यत्।

श्लोकभावः;गुहायाम् नन्दिनी आक्रन्दति।तत् आक्रन्दनं हृदयं विदारयति। दिलीपं च चकितं करोति। दिलीपः अप्रमत्तश्च भवति। हठात् हिमालयानां सौन्दर्यदर्शनात् निवृत्तः भवति। शिरः उत्क्षिप्य पश्यति। अभिमुखं बलात् नन्दिनीं आक्रम्य उत्पतन् सिंहः दृश्यते।

कविः सन्निवेशम् इमम् एवं वर्णयति -नन्दिनी पाटलवर्णा, सन्ध्यारुणा,सिहश्च केसरी, केसराः अस्य सन्ति इति केसरी, केसराः मृदुकेशाः अविरलं सान्द्रं, आशिरःकण्ठं दुकुलतां स्निग्धतां च प्राप्य भासन्ते। हिमालयेषु च शिखरप्रदेशाः तत् पर्यन्तभूमयः गौरिकादिधातूनां निलयाः। पाटल-अरुणाः भवन्ति। लोध्रद्रुमः कश्चन वृक्षविशेषः, तस्य च पुष्पाणि विकतन्ति।पुष्पविकसने हि केसराः भवन्ति।मृदुलतां दुकूलतां स्निग्धतां च प्राप्य वृक्षस्य आशाखं विस्तार्य केशान् स्मारयति। प्रकृते दिलीपः , पाटलारुणायां नन्दिन्यां विद्यमानं सिहं ,हिमालयस्य सानुषु, गैरिकादिधातुकारणतः पाटलतया दृश्यमाने पर्वतपर्यन्तभूमौ, विद्यमानं प्रफुल्लं लोध्रद्रुमं इव पश्यति इति भावः।

व्याकरणांशाः

सन्धयः;पाटलायाङ्गवि;पाटलायाम् + गवि; (म् + ग् = ङ्)अनुनासिकसन्धिः।

समासाः;लोध्रद्रुमः; लोध्रः इति (नामकः) द्रुमः = सम्भावनापूर्वपदकर्मधारयसमासः।

धनुर्धरः; धनुषः धरः = षष्ठीतत्पुरुषसमासः।

कोशः;अधित्यका; "उपत्यका अद्रेरासन्ना भूमिः,ऊर्ध्वमधित्यका" (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१. केसरी कुत्र तस्थिवान् ?

२. दिलीपः कथम् इव केसरिणं ददर्श ?

## ५.२.५ सिहस्य वधाय दिलीपस्य उद्यमनम्

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः।। ३०।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;" दिलीपः नन्दिन्याः उपरि उत्पतन्तं सिंहं हन्तुम् इच्छति "इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, नन्दिन्याः परीक्षणम् इति पाठ्यांशे वर्तते।

पदविभागः; ततः, मृगेन्द्रस्य, मृगेन्द्रगामी, वधाय, वध्यस्य, शरम्, शरण्यः।
जाताभिषङ्गः, नृपतिः, निषङ्गात्, उद्धर्तुम्, ऐच्छत्,प्रसभोद्धृतारिः।।

अन्वयक्रमः; ततः, मृगेन्द्रगामी, शरण्यः,प्रसभोद्धृतारिः,नृपतिः,जाताभिषङ्गः,सन्, वध्यस्य, मृगेन्द्रस्य, वधाय, निषङ्गात्, शरम्,उद्धर्तुम्, ऐच्छत्,।

प्रतिपदार्थः ; ततः = दिलीपस्य सिंहदर्शनानन्तरम् ; मृगेन्द्रगामी,मृगेन्द्र = सिंहः इव ; गामी= शीघ्रगामी,सूक्ष्मावलोकी ; शरण्यः = शरणं प्राप्यः ; (शरणागतपालकः), प्रसभोद्धृतारिः, प्रसभ= बलात्कारेण; उद्धृत = विनाशित ; अरिः = शत्रुसमुदायः, नृपतिः = राजा दिलीपः,जाताभिषङ्गः, जात = उत्पन्न ; अभिषङ्गः = पराभवः ;(सन्) वध्यस्य = वधार्हस्य ;मृगेन्द्रस्य = सिंहस्य; वधाय = हननाय; निषङ्गात् = तूणीरात्; शरम् = बाणम्;उद्धर्तुम् = निष्कासयितुम्, उत्क्षेप्तुम्; ऐच्छत् = अवाञ्छत्;

श्लोकभावः ; दिलीपः सिंहप्रवर्तनः ।सः सिंहः इव सूक्ष्मदर्शी शीघ्रगामी क्रियाशीली च ।किञ्च दिलीपः शरणागत वत्सलः, दयावान्, कारुणिकः। अपि च अयं प्रतापवान् ,शत्रून् सर्वान् अपि बलात् संहरति। तादृशपराक्रमशाली अयम्,एवं क्रियावान्, दयावान्, प्रतापवान्,च सन् अपि,नन्दिनीं प्रमादात् वारयितुम् विफलः भवति इति भृशं पराभवं च प्राप्नोति। नन्दिनी होमसाधनम्-वसिष्ठस्य बहुलान् अर्थान् साधयति। ताम् एतां हन्तुं उद्युक्तःसिंहः अवश्यं वधाय अर्हः।एवं नन्दिन्याः हानिं चिन्तयतः सिंहस्य हननाय दिलीपः अनुपदमेव निषङ्गात् शरम् उद्धर्तुम् इच्छति इति भावः।

व्याकरणांशाः ;सन्धयः ; मृगेन्द्रस्य ; मृग + इन्द्रस्य (अ+ इ=ए) गुणसन्धिः।
प्रसभोद्धृतारिः ; प्रसभ + उद्धृतारिः(अ + उ =ओ) गुणसन्धिः।
समासाः ;मृगेन्द्रः ; मृगाणाम् इन्द्रः = षष्ठीतत्पुरुषसमासः।
जाताभिषङ्गः ; जातः अभिषङ्गः यस्य सः=बहुव्रीहिसमासः।
कोशः; निषङ्गः; "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः" (अमरकोशः)

**स्वावलोकनप्रश्नाः;**

१. दिलीपः कीदृशः?

२. दिलीपः किं कर्तुम् उद्युक्तवान् ?

## ५.२.६ दिलीपस्य बाहोः प्रतिष्टम्भनम्

वामेतरस्तस्य करः प्रहर्तुः, नखप्रभारूषितकङ्कपत्रे।
सक्ताङ्गुलिः सायकपुङ्ख एव, चित्रार्पितारम्भ इवावतस्थे।। ३१।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम्। अस्य

रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "नन्दिन्याः उपरि उत्पतन्तं सिंहं हन्तुम् उद्युक्तस्य दिलीपस्य बाहुः सायकपुङ्खे एव संसक्तः भवति " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, "नन्दिन्याः परीक्षणम् "इति पाठ्यांशे वर्तते।

पदविभागः;  वामेतरः, तस्य, करः, प्रहर्तुः, नखप्रभारूषितकङ्कपत्रे।
सक्ताङ्गुलिः, सायकपुङ्खे, एव, चित्रार्पितारम्भः, इव, अवतस्थे।।

अन्वयक्रमः;  प्रहर्तुः, तस्य, वामेतरः,करः,नखप्रभारूषितकङ्कपत्रे, सायकपुङ्खे, एव, सक्ताङ्गुलिः,सन्, चित्रार्पितारम्भः, इव, अवतस्थे।

प्रतिपदार्थः;प्रहर्तुः = प्रहरणशीलस्य,शरं सन्धातुम् इच्छोः; तस्य=दिलीपस्य;वामेतरः,वाम=वामात्; इतरः= अन्यः,भिन्नः,दक्षिणः;करः = हस्तः;नखप्रभारूषितकङ्कपत्रे,नख = कररुहाणाम्; प्रभा = कान्तिभिः;रूषित= भूषित; कङ्क=पक्षिविशेषस्य;पत्रे = पत्रवति; सायकपुङ्खे एव, सायक = बाणानाम् ; पुङ्खे एव = तूणीरे एव ;सक्ताङ्गुलिः ;सक्त = संसक्त; अङ्गुलिः= करशाखः सन्;चित्रार्पितारम्भः,चित्र = आलेख्यफलके; अर्पित = लिखित; आरम्भः = बाणनिष्कासनप्रयत्नवान्, इव = यथा; अवतस्थे = स्थितः;

श्लोकभावः;नन्दिनी वसिष्ठस्य यागसाधनम्।सिंहः नन्दिनीं बलाद् आकर्षति।तस्याम् उत्पतति। तस्याः भयं च जनयति। अतः सिहः हन्तुं योग्यः।तस्य च वधाय दिलीपः संसिद्धः भवति। सायकेन प्रहर्तुं च उद्युक्तः भवति। चापं सन्धातुं च दक्षिणहस्तं सायकपुङ्खे प्रसारयति। तत्र च सायकाः वर्तन्ते। सायकानां पृष्ठभागे कंकस्य पक्षिविशेषस्य पत्राणि(Feather) आयोजितानि। तानि विविधवर्णानि भवन्ति। अतः सायकाश्च चित्रतां भजन्ते, तानि च पत्राणि शराणाम् उत्तमत्वं सूचयन्ति। कररुहाणां प्रभाश्च, कङ्कपत्रेषु संलग्नाः, तेन च सायङ्कपुङ्खस्य विशेषकान्तयः संजाताः भवन्ति। तादृशे सायपुङ्खे प्रसारितः हस्तः तत्रैव ससंक्तः भवति। दिलीपश्च आश्चर्येण निश्चेष्टितः भवति।सायकपुङ्खे ससंक्तहस्तस्सन्, आश्चर्येण निश्चेष्टितः, दिलीपः, फलके चित्रितः शरोद्धारणप्रयत्नवान् इव अवभासते।

व्याकरणांशाः ; सन्धयः ; वामेतरः ; वाम + इतरः (अ + इ =ए) गुणसन्धिः।
सक्ताङ्गुलिः ; सक्त + अङ्गुलिः(अ + अ = आ) सवर्णदीर्घसन्धिः।
समासाः ; सायकपुङ्खे ; सायकानाम् पुङ्खः ,तस्मिन् =षष्ठीतत्पुरुषसमासः।
सक्ताङ्गुलिः ; सक्ताः अङ्गुलयः यस्य सः=बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः ;**

१.. वामेतरः करः कः ?

२. दिलीपः कथम् अवतस्थे ?

## ५.२.७ दिलीपस्य अन्तर्दहनम्

बाहुप्रतिष्टम्भविवृद्धमन्युः , अभ्यर्णमागस्कृतमस्पृशद्भिः।
राजा स्वतेजोभिरदह्यतान्तः, भोगीव मन्त्रौषधिरुद्धवीर्यः।। ३२।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "दिलीपः सिंहस्य वधाय उद्युक्तः, दक्षिणबाहुश्च सायकपुङ्खे एव संसक्तः। तेन दिलीपस्य कोपः द्विगुणीकृतः" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, नन्दिन्याः परीक्षणम् इति पाठ्यांशे वर्तते।

पदविभागः; बाहुप्रतिष्टम्भविवृद्धमन्युः, अभ्यर्णम्, आगस्कृतम्, अस्पृशद्भिः।
राजा,स्वतेजोभिः, अदह्यत,अन्तः,भोगी,इव,मन्त्रौषधिरुद्धवीर्यः।।

अन्वयक्रमः; बाहुप्रतिष्टम्भविवृद्धमन्युः, राजा, अभ्यर्णम्, आगस्कृतम्, अस्पृशद्भिः,स्वतेजोभिः मन्त्रौषधिरुद्धवीर्यः,भोगी,इव,अन्तः, अदह्यत,।

प्रतिपदार्थः; बाहुप्रतिष्टम्भविवृद्धमन्युः, बाहु = दक्षिणहस्तस्य; प्रतिष्टम्भ = सायकपुङ्खे एव स्तगनेन; विवृद्ध = विशेषेण वर्धित ; मन्युः = कोपः यस्य, सः ; राजा = दिलीपः ; अभ्यर्णम्= समीपस्थम् ; आगस्कृतम् = अपराधिनम् ; अस्पृशद्भिः = अप्राप्तवद्भिः; स्वतेजोभिः, स्व = आत्मनः दिलीपस्य ; तेजोभिः =प्रतापैः, पराक्रमैः ; मन्त्रौषधिरुद्धवीर्यः,मन्त्र = विषनिवारक मन्त्रैः, ओषधि= वनमूलिकादीनां रसैश्च ; रुद्ध = अवरुद्ध ; वीर्यः = प्रभाववान् ; भोगी = महासर्पः, इव = यथा ; अन्तः = स्वस्मिन् ; अदह्यत = अतप्यत।

श्लोकभावः; सिहः नन्दन्याम् उत्पतितः। तं च प्रहर्तुं दिलीपः संसिद्धः। चापं च सन्धातुम् उद्युक्तः।सायकं आक्रष्टुं च दक्षिणः करः पुङ्खे प्रसारितः।स च तत्रैव ससक्तः। क्रियाशीली ,दयाशाली, प्रतापवान् च सन् अपि नन्दिनीं प्रमादात् निवारयितुं निष्फलः इति राजा भृशं पराभवं प्राप्नोति। इदानीं च बाहोः स्तम्भनानत् कोपश्च वर्धितः।समीपे एव स्थितं अपराधिनं सिंहं किमपि कर्तुं स्वपराक्रमाःअसमर्थाः जाताः इति दिलापः आन्दोलनाभरितः भवति।

भोगः = फणः,भोगः अस्य अस्तीति भोगी = सर्पः। भोगीणां विषप्रभावः मन्त्रैः वनमूलिकादीनां रसैश्च अवरुध्यते। तदा सर्पाणां सः पराक्रमः, प्रभावश्च अन्तः एव स्थित्वा सर्पान् दहति। प्रकृते मन्त्रैः,वनमूलिकाभिश्च अवरुद्धप्रभावः सर्पः यथा वा अन्तः स्वयं दहति, तथा अपराधिनं शिक्षितुम् असमर्थैः पराक्रमैः दिलीपोऽपि अन्तः नितान्तं दहन् दृश्यते।

व्याकरणांशाः;सन्धयः; मन्त्रौषधि...; मन्त्र + ओषधि...(अ + ओ = औ ) वृद्धिसन्धिः ।
भोगीव; भोगी + इव (ई + इ = ई ) सवर्णदीर्घसन्धिः ।
समासाः; बाहुप्रतिष्टम्भ....; बाहोः प्रतिष्टम्भ.... =षष्ठीतत्पुरुषसमासः।
अस्पृशद्भिः; न स्पृशद्भिः;=नञ् तत्पुरुषसमासः।

स्वतेजोभिः; स्वस्य तेजोभिः =षष्ठीतत्पुरुषसमासः ।

**स्वावलोकनप्रश्नाः;**

१.. दिलीपः कीदृशः ?

२.बाहोः प्रतिष्टम्भनेन दिलीपः किम् अभवत्? कथम् इव अभवत्?

## ५.३ .उपसंहारः

एवम् अत्र नन्दिन्याः परीक्षाकुतूहलम्, तदर्थं कल्पितं महत्त्वपूर्णं मायाजालम्,तदधिगन्तुं दिलीपस्य प्रयासः, तत्र दिलीपस्य अशक्तता इत्येवमादिकम् अत्र अभिवर्णितम् अस्ति ।अत्र च पाठ्यांशे कालिदासस्य कवितायां सन्दर्शनीयतागुणः व्याख्याकाराणां विमर्शकानां च प्रशंसनीयतां गतः ।अत्र च पाठ्यांशे उपमानानि उद्दिष्टार्थसाधकानि च भवन्ति। नन्दिन्यां सिंहस्य उत्पतनम्, वध्यस्य वधाय उद्युक्ते बाहोः प्रतिष्टम्भः, इत्यादिकं पाठकानाम् अद्भुतरसानुभूतिं जनयति।

## ५.४ .अभ्यासः

श्लोकद्वयं व्याख्यात ?

१). सा दुष्प्रधर्षा मनसाऽपि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष।।

२). स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम्।

* * *

# अंशः-VI; सिंहस्य भाषणम् (निगदनम्)

संरचना

६.० परिचयः
६.१ लक्ष्याणि
६.२ सिंहस्य भाषणम् (निगदनम्)
६.२.१ भाषणाय सिंहस्य उपक्रमणम्
६.२.२ अस्त्रप्रयोगस्य व्यर्थताकथनम्
६.२.३ सिंहस्य दिव्यत्वप्रकटनम्
६.२.४ देवदारुवृत्तान्तम्
६.२.५ पार्वत्याः शोचनम्
६.२.६ शूलभृता नियोजनम्
६.२.७ नन्दिन्याः आहारत्वनिर्देशनम्
६.२.८ राज्ञः निवर्तनाय सिहस्य सन्देशनम्
६.३ उपसंहारः
६.४ अभ्यासः

## ६.० परिचयः

सिंहस्य भाषणम् (निगदनम्) इत्ययं पाठ्यांशः रघुवंशस्य द्वितीयसर्गे वर्तते। अस्य द्वितीयसर्गस्यैव कथापरतया नन्दिनीवरप्रदानम् इति प्रसिद्धिः अस्ति। प्रकृतपाठ्यांशः त्रयस्त्रिंशत्तमश्लोकतः आरभ्य चत्वारिंशत्तमश्लोकं यावत्(३३-४०) परिमितः भवति।। अत्र च प्रधानतया सिंहस्य स्वीयपरिचयदानम्, सिंहस्य परमेश्वरसम्बन्धित्वकथनम्,अस्त्रप्रयोगस्य व्यर्थताकथनम्, देवदारुवृत्तान्तम्, पार्वत्याः शोचनम्,शूलभृता कुम्भोदरस्य नियोजनम् ,नन्दिन्याः आहारत्वनिर्देशनम्, राज्ञः निवर्तनाय सिंहस्य सन्देशनम् इति इमे विषयाः वर्णिताः सन्ति।

इदं श्रव्यकाव्यम्। सिंह-दिलीपयोः संवादः अत्र प्रस्तुतः। अत्र च दृश्यकाव्यस्य प्रधानं, सम्भाषणात्मकं लक्षणं, सम्यक् साधितम्। इदं च काव्यरचयितुः रचनापाटवं, प्रतिभानैपुण्यं च प्रस्फुटयति। अयं गुणः (श्रव्यकाव्यस्य पठनेपि) दृश्यकाव्यदर्शनानुभूतिं जनयति।

अत्र सिंहस्य सम्भाषणम्, स्वीयम् अधिगमनस्वभावं प्रकटयति। अधिगमनं नाम पराक्रमणम्। परान् अधःकृत्य गमनं अधिगमनम्। अधिगमनगुणः स्वभावस्य कश्चन कोणः। अधिगमनस्य प्रगल्भः परिचयः ,उन्नतत्वम्, स्वेतरेषु न्यूनता ,स्वस्य दिव्यत्वापादनम् ,प्रगल्भं वचः इत्यादीनि प्रधानानि लक्षणानि अत्र साक्षाद्भवन्ति।

## ६.१ लक्ष्याणि

मानवः प्राणिषु उत्तमः । तस्य उत्तमत्वसाधनाय व्यक्ता भाषा अन्यतमा अस्ति। सा च प्राथमिकदशायां परस्परं अभिप्रायस्य विनिमयाय जाता। तस्यैव भाषणं इति व्यवहारः।तदेव परिणामदशायां सरलताम्,सरसताम्,सुन्दरताम् च सम्पाद्य सम्भाषणं जातम्। एतच्च व्यक्तव्यांशे स्पष्टतां सम्पादयति। व्यक्तीकरणसामर्थ्यं वर्धयति। गम्भीरोपि विषयः सम्भाषणमहिम्ना सरलतां भजते। सम्भाषणे मनोभावानां रति-हास-शोक-क्रोधादीनानि स्फूर्तिः भवति।विनय-विधेयता श्रद्धा -आसक्त्यादीनां व्यवहाराणां साक्षात् दर्शनं भवति। अधिगमनभावानां दर्प-मात्सर्यादीनां अपि सरलभाषामाध्यमेन ज्ञापनम् अत्र सम्पाद्यते। अनुद्वेगकरं -सत्यसमन्वितम्-प्रसन्नप्रियं हितकरं च भाषणं "सम्भाषणम्" भवति ।

"स्फुटता न पदैः अपाकृता,न च न स्वीकृतमम अर्थगौरवम् .....।।
हितं मनोहारि च दुर्लभं वचः।
अप्रियस्य तु पथ्यस्य वक्ता - श्रोता च दुर्लभः ."

इत्यादि वचनानि सम्भाषणस्य स्वरूपं स्वभावं च बोधयन्ति।

अपि च काव्यं द्विविधम् । श्रव्यम् -दृश्यं च। श्रव्यम् - श्रवणयोग्यम्। श्रवणमाध्यमेनैव विषयः आस्वादनीयः भवति। प्रतिपाद्यमानं विषयं अवगन्तुं कोपि परिसरः सन्निवेशो वा अत्र न भवति। विषयश्च कथा -कथनरीत्या प्रतिपाद्यते। भाषा च समासभूयिष्ठा। अतः अनुभूतिरपि विलम्बिता एव भवति। एवं श्रव्यकाव्यं श्रमेण अवगन्तव्यं भवति।

दृश्यम् -दर्शनयोग्यम्। तत्र प्रदर्शनमाध्यमेन विषयः प्रतिपाद्यते। अत्र च विषयस्य प्रदर्शनाय वेदिका - सन्निवेशादिकल्पनम्, विषयस्य नेपथ्यं बोधयन्ति। दृश्ये च सम्भाषणं सहजतया सरलं भवति। भाषा क्लिष्टा वा कठिना वा न भवति। सरसा अपि भवति। रसस्फूर्तिः अविलम्बिता भवति। अत एव श्रव्यकाव्यापेक्षया, दृश्यकाव्यं सुलभतया विषयावगमनाय समर्थं भवति।

प्रकृते दृश्यकाव्यगुणनां सम्भाषण-नाटकीयतादीनाम् उपनिबन्धः अत्र श्रव्यकाव्यत्मके अत्र पाठ्यांशे बहुलतया लभ्यते। एतत्पाठ्यांशस्य अध्ययनेन

- काव्येषु सरलभाषास्वरूपं प्रति लिखितुं पारयति।
- सरलभाषागतम् व्यक्तीकरणपाटवम् अवगन्तुं समर्थो भवति।
- काव्यगतं कथाकथनविधानं प्रति भाषितुं प्रभावपूर्णो भवति।
- सम्भषणरीतेः प्राधान्यं पठितुं समर्थो भवति
- दिलीपस्य विस्मापनवृत्तान्तं पठितुं प्रभवति।
- कुम्भोदरस्य परिचयं नियोगं च भाषितुं समर्थो भवति।
- देवदारुवृत्तान्तं लिखितुं समर्थो भवति।

## ६.२ सिंहस्य निगदनम्

### ६.२.१ भाषणाय सिंहस्य उपक्रमणम्

तामार्यगृह्यं निगृहीतधेनुः, मनुष्यवाचा मनुवंशकेतुम्।
विस्माययन्विस्मितमात्मवृत्तौ, सिंहोरुसत्त्वं निजगाद सिंहः।। ३३।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; 'बाहोः प्रतिष्टम्भनेनैव आश्चर्यं प्राप्य अन्तः दहन्तं दिलीपं, मनुष्यवाचा पुनः इतोऽधिकम् आश्चर्यं जनयन् , सिंहः वक्तुम् उपाक्रमत ' इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, 'सिंहस्य निगदनम्' इति पाठ्यांशे वर्तते।

पदविभागः; तम्, आर्यगृह्यम्, निगृहीतधेनुः, मनुष्यवाचा, मनुवंशकेतुम्।
विस्माययन्, विस्मितम्, आत्मवृत्तौ, सिंहोरुसत्त्वम्, निजगाद, सिहः।।

अन्वयक्रमः; निगृहीतधेनुः, सिंहः, आर्यगृह्यम्, मनुवंशकेतुम्, सिंहोरुसत्त्वम्, आत्मवृत्तौ, विस्मितम्,तम्, मनुष्यवाचा, विस्माययन्, निजगाद।

प्रतिपदार्थः; निगृहीतधेनुः, निगृहीत = निश्शेषं स्ववशीकृत ; धेनुः = नन्दिनीकः ; सिंहः = मृगाधिपः ; आर्यगृह्यम्, आर्य = मनीषिणाम् ; गृह्यम् = माननीयम्; मनुवंशकेतुम्,मनुवंश = मनोः अन्वयस्य,केतुम् =पताका इव प्रमुखम्, प्रसिद्धम् ; सिंहोरुसत्त्वम्, सिंह = मृगेन्द्र इव ; ऊरु =विपुल ,अधिक ; सत्त्वम् = बलसम्पन्नम् ; आत्मवृत्तौ, आत्म = स्वस्य(दिलीपस्य) ; वृत्तौ = बाहुप्रतिष्टम्भरूपे व्यापारे ; विस्मितम् = चकितम्,तम् = दिलीपम्, मनुष्यवाचा,मनुष्य = मानवस्य, वाचा = भाषया, विस्माययन् = अत्यन्तम् आश्चर्यं प्रापयन्, निजगाद = बभाषे।

श्लोकभावः; सिंहः नन्दिन्यां उत्पतति। दिलीपश्च विचक्षणैः माननीयः, मनीषिणां प्रीतिपात्रः च भवति।अयं पताका इव मनुसन्ततिपरम्परायां प्रधानभूतः प्रसिद्धश्च वर्तते। किञ्च अयं सिंहबलः अस्ति। तथापि उत्पतन्तं सिंहं वारयितुं कथञ्चिदपि न शक्नोति। दक्षिणबाहुश्च सायकपुङ्खे एव संसक्तः भवति।अतः अयं आत्मनः बाहुप्रतिष्टम्भव्यापारे पूर्वम् एव भृशं विस्मितः जायते।एवं विस्मितं दिलीपं सिहः मनुष्यवाचा इतोऽप्यधिकं विस्माययति।वक्तुम् आरभते च।

व्याकरणांशाः;सन्धयः; सिंहोरुसत्त्वम्;सिंह + ऊरुसत्त्वम् (अ + ऊ = ओ) गुणसन्धिः।
समासाः; निगृहीतधेनुः; निगृहीता धेनुः येन सः (=सिंहः) =बहुव्रीहिसमासः।
मनुष्यवाचा; मनुष्यस्य वाक् ,तया = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. विस्मितम् आत्मवृत्तौ... आत्मवृत्तिः का? विस्मितः कः? किमर्थं विस्मितः?

२. सिंहः कीदृशः ?

### ६.२.२ अस्त्रप्रयोगस्य व्यर्थताकथनम्

अलं महीपाल तव श्रमेण , प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्ति रंहः , शिलोच्चये मूर्छति मारुतस्य।। ३४।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । ।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "शस्त्रेण वधार्थम् उद्यमन्तं राजानं वारयन्, सिहः दिलीपं एवं वदति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, सिंहस्य निगदनम् इति पाठ्यांशे वर्तते।

पदविभागः; अलम्, महीपाल, तव,श्रमेण, प्रयुक्तम्, अपि,अस्त्रम् इतः, वृथा स्यात्।
न ,पादपोन्मूलनशक्तिरंहः, शिलोच्चये ,मूर्छति ,मारुतस्य।।

अन्वयक्रमः; महीपाल! तव,श्रमेण,अलम्, इतः, मयि, प्रयुक्तम्, अपि, अस्त्रम्, वृथा स्यात्।
पादपोन्मूलनशक्ति, मारुतस्य,रंहः शिलोच्चये न मूर्छति।

प्रतिपदार्थः; महीपाल!=भूपाल! दिलीप, तव=भवतः, श्रमेण=प्रयासेन, अलम्=पर्याप्तम्, इतः= इह, मयि=सिंहे,प्रयुक्तम्=सन्धितम् अपि, अस्त्रम्=आयुधम्, वृथा=व्यर्थम्,स्यात्= भवेत्, पादपोन्मूलनशक्ति,पादप=वृक्षाणाम्,उन्मूल=उत्पाटने, शक्ति=शक्तिः यस्य तत्, मारुतस्य=वायोः, रंहः = वेगः, शिलोच्चये=पर्वते, न मूर्छति=न प्रसरति हि।

श्लोकभावः;हन्तुम् उद्यम्य बाहोः प्रतिष्टम्भनेनअन्तर्दहन्तं दिलीपं सिंहः एवं वदति -' महीपाल! राजन् दिलीप ! श्रमेण अलम्, व्यर्थः प्रयासः, मास्तु। तव शस्त्राणि सर्वाणि अपि मां किमपि कर्तुं न पारयन्ति ।प्रयुक्तानि अपि व्यार्थानि एव भवन्ति। परिमितशक्तिः वायोः वेगः पादपानाम् उत्पाटनार्थं भवतु नाम समर्थः, स एव किं पर्वतान् उत्पाटयितुम् अपि समर्थः भवति ? भवतः प्रभावः वायुवेगसदृशः। अहं पुनः शिलोच्चयः। वायोः वेगः शिलोच्चये इव, त्वत्प्रभावः मयि न प्रसरति ' इति दिलीपं प्रगल्भं वदति ।

सन्धयः ; पादपोन्मूलन;पादप + उन्मूलन (अ + उ = ओ) गुणसन्धिः।

समासाः; महीपालः; मह्याः पालः =षष्ठीतत्पुरुषसमासः।
उन्मूलनशक्ति;उन्मूलने शक्ति =सप्तमीतत्पुरुषसमासः।

कोशः; अलम् ; अलं भूषणपर्याप्ति शक्तिवारणवाचकम् (अमरकोशः)।

**स्वावलोकनप्रश्नाः;**

१. मारुतस्य रंहः कीदृशम्  ?

२. "अलं महीपाल तव श्रमेण"-अत्र "तव" शब्दः कं सम्बन्धयति ?

### ६.२.३ सिंहस्य दिव्यत्वप्रकटनम्

कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठम्।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भतुल्यम्।। ३५।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"सिहः मनुष्यवाचा दिलीपं विस्माययति। स्वस्य दिव्यं सम्बन्धं दिलीपस्य ज्ञापयति " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, सिंहस्य निगदनम् इति पाठ्यांशे वर्तते।

पदविभागः; कैलासगौरम्, वृषम्, आरुरुक्षोः, पादार्पणानुग्रहपूतपृष्ठम्।
अवेहि, माम्, किङ्करम्, अष्टमूर्तेः, कुम्भोदरम्, नाम, निकुम्भतुल्यम्।।

अन्वयक्रमः; राजन्,माम्, कैलासगौरम्, वृषम्, आरुरुक्षोः, पादार्पणणानुग्रहपूतपृष्ठम्, निकुम्भतुल्यम्, कुम्भोदरम्, नाम, अष्टमूर्तेः, किङ्करम्, अवेहि,।

प्रतिपदार्थः; राजन्=दिलीप, माम्=सिंहम् माम्, कैलासगौरम्, कैलास=कैलासपर्वतः इव गौरम् = धवलम्, वृषम् = वृषभम्, आरुरुक्षोः = आरोढुम् इच्छोः परमेश्वरस्य, पादार्पणानुग्रह पूतपृष्ठम्,पाद = चरणयोः, अर्पण = स्थापनस्य, अनुग्रह = अवकाशेन,पूत=पवित्रितम्, पृष्ठम्= पृष्ठम् यस्य तम्, निकुम्भतुल्यम्=निकुम्भसदृशम्,कुम्भोदरम् =कुम्भोदर इति नाम = नामानम्, अष्टमूर्तेः = परमेश्वरस्य, किङ्करम्=सेवकम्,अवेहि=जानीहि।

श्लोकभावः - "राजन् !दिलीप ! अहम् अषटमूर्तेः परमेश्वरस्य सेवकः। मम नाम कुम्भोदरः।अहं निकुमभेन सदृशः। परमेश्वरः कैलालवासी। कैलासधवलः कश्चित् वृषभः तस्य अस्ति। स च तस्य वाहनम्। परमेश्वरः साक्षात् तं नाधिरोहति। प्रथमं मम पृष्ठे पादं निक्षिप्यैव वृषभं आरुरुक्षति। एवं परमेश्वरस्य पादार्पणेन पूतपृष्टवान् अहम्। अतः माम् दिव्यं अवेहि "इति सिंहः स्वेन परमेश्वरस्य सम्बन्धं दिलीपाय बोधयति।

सन्धयः -कुम्भोदरः ; कुम्भ+उदर (अ+उ=ओ )गुणसन्धिः।
पादार्पणानुग्रह...; पादार्पण+अनुग्रह (अ+अ=आ ) सवर्णदीर्घसन्धिः।

समासाः -कैलासगौरः ; कैलास इव गौरः =विषेषणपूर्वपदकर्मधारयसमासः।
निकुम्भतुल्यम् ; निकुम्भस्य तुल्यम् =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.. सिंहस्य नाम किम् ?

२. अष्टमूर्तिः कः ?

## ६.२.४ देवदारुवृत्तान्तम्

अमुं पुरः पश्यसि देवदारुम्, पुत्रीकृतोऽसौ वृषभध्वजेन।
यो हेमकुम्भस्तननिस्सृतानां स्कन्दस्य मातुः पयसां रसज्ञः।। ३६।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - " सिंहः देवदारुवृत्तान्तं दिलीपाय ज्ञापयति " इत्येतदेशं निरूपयन् अयं श्लोकःनन्दिनीवरप्रदाननामके द्वितीयसर्गे, सिंहस्य निगदनम् इति पाठ्यांशे वर्तते।

पदविभागः - अमुम्, पुरः, पश्यसि, देवदारुम्, पुत्रीकृतः,असौ, वृषभध्वजेन।
यः, हेमकुम्भस्तननिस्सृतानाम्, स्कन्दस्य, मातुः पयसाम्, रसज्ञः।।

अन्वयक्रमः -राजन्!पुरः ,अमुम्, देवदारुम्,पश्यसि, असौ, वृषभध्वजेन,पुत्रीकृतः, यः,हेमकुम्भस्तन निस्सृतानाम्, स्कन्दस्य, मातुः ,पयसाम्, रसज्ञः।

प्रतिपदार्थः; राजन्!=दिलीप, पुरः=अग्रतः,अमुम्=इमम्, देवदारुम्=देवदारुवृक्षम्, पश्यसि=विलोकसे खलु, असौ=अयम् देवदारुवृक्षः, वृषभध्वजेन=शिवेन,पुत्रीकृतः=पुत्रत्वेन स्वीकृतः, यः=यः असौ देवदारुवृक्षः,हेमकुम्भस्तननिस्सृतानाम्, हेमकुम्भ= कनकघट एव, स्तन=कुचौ, ताभ्याम्, निस्सृतानाम्=प्रसृतानाम्, स्कन्दस्य=कुमारस्वामिनः, मातु=जनन्याः पार्वत्याः,पयसाम्=जलानां, रसज्ञः=रुचिज्ञः

श्लोकभावः -"दिलीप ! पुरतः स्थितम् अमुं पश्यसि खलु।अयम् वृक्षः, देवदारुः। असौ च पार्वत्याः सेचनजलानां रुचिं जानाति। पार्वती, स्तनसदृशैः कनककलशैः परिषिञ्च्य अमुं पोषितवती। आलवालादिकं च आरच्य, रक्षितवती। अतश्च अयं परमेश्वरस्यापि प्रीतिकरः सञ्जातः। सुतनिर्विशेषं पार्वत्या वर्धितः असौ देवदारुः ,वृषभध्वजेन अपि पुत्रीकतः" इति सिंहः देवदारुवृक्षस्य नेपथ्यं दिलीपाय कथयति।

समासाः; -वृषभध्वजः; वृषभो ध्वजे यस्य सः =बहुव्रीहिसमासः।

कोशः; -पयः; क्षीरं पयोऽम्बु च (अमरकोशः)

**स्वावलोकनप्रश्नाः**

१. वृषभध्वजेन कः पुत्रीकृतः?

२. स्कन्दस्य माता का ?

## ६.२.५ पार्वत्याः शोचनम्

कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथितात्वगस्य।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः।। ३७।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः "देवदारुवृक्षस्य त्वगुन्मथनं दृष्ट्वा पार्वती अतीव शोचति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, सिंहस्य निगदनम् इति पाठ्यांशे वर्तते।

पदविभागः - कण्डूयमानेन, कटम्, कदाचित्, वन्यद्विपेन, उन्मथिता, त्वक्, अस्य।
अथ, एनम्,अद्रेः, तनया, शुशोच, सेनान्यम्,आलीढम्, इव, असुरास्त्रैः।।

अन्वयक्रमः- कदाचित्, कटम्,कण्डूयमानेन, वन्यद्विपेन, अस्य त्वक्,उन्मथिता,अथ, अद्रेः , तनया, एनम्, असुरास्त्रैः, आलीढम्, सेनान्यम्, इव, शुशोच।

प्रतिपदार्थः-कदाचित्=कस्मिंश्चित् समये, कटम्=कपोलम्, कण्डूयमानेन=घर्षयता, वन्यद्विपेन= वनगजेन, अस्य=देवदारोः, त्वक्=चर्म(वल्कलम्), उन्मथिता=उत्पाटिता, अथ=पश्चात्, अद्रेः= हिमवतः, तनया=पुत्री पार्वती, एनम्=देवदारुवृक्षम्,असुरास्त्रैः=राक्षसानाम् आयुधैः, आलीढम्= क्षतम्, सेनान्यम्=कुमारस्वामिनम्,इव = यथा, शुशोच = बबाधे।

श्लोकभावः-"दिलीप ! अत्र कश्चित् वनद्विपः अस्ति। तस्य कदाचित् कपोले कण्डूतिः जायते। तदपनोदनार्थं कपोलेन देवदारुः घर्षितः । तेन च देवदारोः त्वक् उन्मथिता भवति।उन्मथितत्वचं देवदारुं दृष्ट्वा पार्वती परिशोचति। सेनान्यः कुमारस्वामी, पार्वतीपरमेश्वरयोः प्रथमम् अपत्यम्। स च तारकासुरं संहरति। तारकसुरस्य वधाय देव-दानवयोः प्रचण्डः युद्धः प्रवर्तते।तत्र मायोपायैः बहुभिः शस्त्रास्त्रैः कुमारस्वामी ताडितः भवति। तीव्रं व्रणितः च भवति। तम् दृष्ट्वा पार्वती अतिदुखःखिता भवति। प्रकृते - उन्मथितत्वचं देवदारुं दृष्ट्वा पार्वती, असुरास्त्रैः ताडितं कुमारस्वामिनम् इव परिशोचति" इति सिंहः दिलीपाय देवदारोः वृत्तान्तं कथयति।

समासाः -वन्यद्विपः; वन्यश्चासौ द्विपश्च - विषेषणपूर्वपदकर्मधारयसमासः।
असुरास्त्राणि; असुराणाम् अस्त्राणि -षष्ठीतत्पुरुषसमासः।

कोशः - पार्वती;पार्वतीनन्दनस्कन्दो सेनानीरग्निभूर्गुहः इति अमरः।

**स्वावलोकनप्रश्नाः -**

१. हिमाद्रेः तनया का ?

२. पार्वत्याः तनयः कः ?

## ६.२.६ शूलभृता नियोजनम्

तदा प्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्ति।। ३८।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "वनद्विपानां त्रासार्थं अहं शूलभृता अत्र नियुङ्क्तः " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, सिंहस्य निगदनम् इति पाठ्यांशे वर्तते।

पदविभागः    तदा, प्रभृति, एव, वनद्विपानाम्, त्रासार्थम्, अस्मिन्, अहम्, अद्रिकुक्षौ।
व्यापारितः, शूलभृता, विधाय, सिंहत्वम्, अङ्कागतसत्त्ववृत्ति।।

अन्वयक्रमः  तदा, प्रभृति, एव, वनद्विपानाम्, त्रासार्थम्,शूलभृता, अहम्, अङ्कागतसत्त्ववृत्ति, सिहत्वम्, विधाय, अस्मिन्, अद्रिकुक्षौ, व्यापारितः,

प्रतिपदार्थः  तादा प्रभृति एव=तत्कालादारभ्यैव, वनद्विपानाम्=वनगजानाम्,त्रासार्थम्=भायार्थम्, शूलभृता=शिवेन, अहम्=कुम्भोदरः, अङ्कागतसत्त्ववृत्ति, अङ्क=समीपम्,आगत=प्राप्ताः, सत्त्व= प्राणिनः एव, वृत्तिः=भोजनम् यस्मिन् तत्, सिहत्वम्=केसरित्वम्,विधाय=कृत्वा, अस्मिन्=पुरो वर्तिनि, अद्रेः=पर्वतस्य,कुक्षौ=गुहायाम्, व्यापारितः=नियुक्तः।

श्लोकभावः "दिलीप ! वन्यद्विपेन देवदारोः त्वक् उन्मथिता खलु - तन्निमित्तं पार्वती तीव्रं परितापम् आप्नोति। पार्वत्याः परितापम् अवगच्छति।परमेश्वरः देवदारोः परिरक्षणाय वन्यद्विपानां तर्जनाय च संकल्पितः भवति। अनुपदमेव किङ्करः अहम् परमेश्वरेण स्मृतः। अहं च सिंहं कृतः। समीपम् आगतः जन्तुरेव आहारः इति अस्य अभ्यवहाराव्यवस्था च कृता। एवम् अहं सिंहं कृत्वा परमेश्वरेण अस्मिन् अद्रिकुक्षौ नियुक्तः"इति सिंहः अद्रौ स्वनियोगम् उद्दिश्य दिलीपाय कथयति ।

समासाः -     वनद्विपाः; वनस्य द्विपाः - षष्ठीतत्पुरुषसमासः।
अद्रिकुक्षिः;अद्रेः कुक्षिः - षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१. शूलभृत् कः ?

२. वनद्विपानां त्रासार्थं शूलभृता अद्रिकुक्षा व्यापारितः कः?

## ६.२.७ नन्दिन्याः आहारत्वनिर्देशनम्

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव।। ३९।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः।अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "नन्दिनी मम आहाराय पर्याप्ता भवति " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, सिंहस्य निगदनम् इति पाठ्यांशे वर्तते।

पदविभागः- तस्य, अलम्, एषा, क्षुधितस्य, तृप्त्यै, प्रदिष्टकाला, परमेश्वरेण।
उपस्थिता, शोणितपारणा, मे, सुरद्विषः, चान्द्रमसी, सुधा ,इव।।

अन्वयक्रमः - परमेश्वरेण, प्रदिष्टकाला, उपस्थिता ,एषा, शोणितपारणा,क्षुधितस्य, तस्य, मे, सुरद्विषः, चान्द्रमसी, सुधा, इव,तृप्त्यै, अलम्,।

प्रतिपदार्थः-परमेश्वरेण=शिवेन, प्रदिष्टकाला, प्रदिष्ट=समुपनिर्दिष्टः, कालः=समयः यस्याःसा, तथा विधा सती, उपस्थिता =समीपम् आगता,एषा=इयम्(नन्दिनीरूपा)शोणितपराणा,शोणित= रुधिरात्मकम्,पराणा=व्रतान्तभोजनम्,क्षुधितस्य=बभुक्षितस्य,तस्य=समीपागतप्राणिवृत्तेः, मे= मम सिंहस्य,सुरद्विषः=राहोः, चान्द्रमसी=चन्द्रसम्बन्धि, सुधा=अमृतम्,इव=यथा,तृप्त्यै = उदर पूर्त्यै, अलम्=पर्याप्तम्।

श्लोकभावः"दिलीप ! परमेश्वरेणैव मम भोजनव्यवस्था च कृता - समीपागतजन्तुः एव आहारः इति समयः कृतः।परमेश्वरस्य निर्देशानुसारं एषा नन्दिनी, इदानीं मम, आहारः भवति। किञ्च अहं मांसप्रियः, रुधिरपायी।एषा नन्दिनी मासंभूयिष्ठा शोणितपारणा। अपि च अहं क्षुधितः, मम बुभुक्षा वर्तते। परमेश्वरस्य नियोगानुसारं समीपागत एव जन्तुः खलु भक्ष्यः - एतावत् कोऽपि समीपं नागतः - अतश्च न भुक्तः -इदानीं मम बुभुक्षा च अधिका अस्ति। अत्र चन्द्रग्रहणम् सम्बन्धयति - पूर्णिमायां खलु चन्द्रग्रहणम्। पूर्णिमायां च,चन्द्रः पूर्णःभवति। कलाश्च पूर्णाः भवन्ति।चन्द्रिका च विस्तारेण भवति। एतत् सर्वं पूर्णिमायां राहोः निवेदितं भवति। प्रकृते चन्द्राः कलाः,कान्तयश्च,एवं सर्वा चन्द्रमसी सुधा यथा सुरद्विषः राहोः तृप्त्यै भवति, तथा परमेश्वरेण प्रतिपादिता शोणितपराणा इयं क्षुधितस्य मम तृप्त्यै भवति " इति सिंहः नन्दिन्याः खादनं प्रति दिलीपाय सूचयति ।

सन्धयः -परमेश्वरेण;परम+ईश्वरेण (अ+ई=ए )गुणसन्धिः।

समासाः-परमेश्वरः; परमश्चासौ ईश्वरश्च - विषेषणपूर्वपदकर्मधारयसमासः।

प्रदिष्टकाला;प्रदिष्टः कालः यस्याः सा - बहुव्रीहिसमासः ।

| **स्वावलोकनप्रश्नाः** |
| --- |
| १.. सुरद्विट् कः ? |

## ६.२.८ राज्ञः निवर्तनाय सिहस्य सन्देशनम् : -

स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति।।४०।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"माम् हन्तुं त्वम् असमर्थः।वृथा प्रयासः मास्तु ,हननप्रयत्नात् विरमतु " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,सिंहस्य निगदनम् इति पाठ्यांशे वर्तते।

पदविभागः सः, त्वम्, निवर्तस्व, विहाय, लज्जाम्, गुरोः भवान्,दर्शितशिष्यभक्तिः,।
शस्त्रेण, रक्ष्यम्, यत्,अशक्यरक्षम्, न, तत् ,यशः, शस्त्रभृताम्, क्षिणोति।।

अन्वयक्रमः सः ,त्वम्, लज्जाम्, विहाय,निवर्तस्व, भावन्, गुरोः, दर्शितशिष्यभक्तिः
(एव)रक्ष्यम्, यत्, शस्त्रेण, अशक्यरक्षम्, तत्, शस्त्रभृताम्, यशः,न ,क्षिणोति।

प्रतिपदार्थःसः=बाहोः स्तम्भनेन मार्गान्तरशून्यः,त्वम्=भवान्, लज्जाम्=पराभवात् जाताम् त्रपाम्, विहाय=त्यक्त्वा,निवर्तस्व=निवृत्तो भवतु,भावान्=त्वम्,दिलीपः,गुरोः=वसिष्ठस्य,दर्शितशिष्यभक्तिः, दर्शित=सन्दर्शिता, शिष्य=अन्तेवसिनः,भक्तिः=विधेयता येन सः,-तथा भूतः, एव=नूनम् निश्चयः,रक्ष्यम्=अवश्यं रक्षणीयम्, यद्=यद्वस्तु, शस्त्रेण=अस्त्रेणापि, अशक्यरक्षम्=रक्षितुं समर्थं न भवति,तत्=तद्वस्तु, सः विषयः, शस्त्रभृताम्=आयुधधारिणाम्, धनुर्धारिणाम्,यशः=कीर्तिम्, न क्षिणोति= न विनाशयति।

श्लोकभावः;दिलीप!एवम् त्वम् उपायशून्यः ,तव मार्गान्तरं नास्ति। अवमानभारं विहाय निवर्तस्व।गुरौ च तव भक्तिः प्रदर्शित एव।अप्रमत्तस्सन् नन्दिनीं प्रमादात् रक्षितुम् प्रयतितवान् खलु भवान्। विफलः जातः इति तु अन्यदेतत्।गुरौ भक्तिं विना प्राणत्यागायापि सिद्धः कथं भवेः-दिलीप! श्रुणु!राज्ञां प्रतिवस्तु रक्षणीयमेव। परं यद्वस्तु शस्त्रेणापि रक्षितुं न भवति-तद्विषये विफलता शस्त्रभृतां अप्रतिष्ठायै वा,अवमानाय वा न भवति। सर्वथा असाध्ये कर्मणि शस्त्रभृतः किं कर्तुं पारयन्ति " इति सिंहः दिलीपम् अनुनयति।

सन्धयः - यदशक्यम्; यत् + अशक्यम् = जश्त्वसन्धिः।

समासाः -शिष्यभक्तिः; शिष्यस्य भक्तिः=षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१. दर्शितशिष्यभक्तिः कः ?

२.स त्वं निवर्तस्व....अत्र 'त्वम्' शब्दः कं सम्बन्धयति ?

## ६.३.उपसंहारः

एवम् अत्र सिंहः देवदारुवृत्तान्तं दिलीपाय बोधयति। अत्र च प्रमुखतः सिंहस्य परिचयदानम्,सिंहस्य दिव्यत्वप्रकटनम्,अस्त्रप्रयोगस्य व्यर्थताकथनम्, पार्वत्याः शोचनम् , शूलभृता नियोजनम् ,नन्दिन्याः आहारत्वनिर्देशनम्, राज्ञः निवर्तनाय सिहस्य सन्देशनम् ,इत्येते विषयाः वर्णिताः। अत्र च सम्भाषणं मधुरं, मनोज्ञं च भवति।

## ६.४.अभ्यासः -

श्लोकद्वयं व्याख्यात ? -

(१). कैलासगौरं वृषमारुरुक्षोः पादार्पणणानुग्रहपूतपृष्ठम्।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भतुल्यम्।।

(२).स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति।।

* * *

# अंशः-VII; दिलीपस्य प्रत्युत्तरम्

संरचना

७.०.परिचयः
७.१ लक्ष्याणि
७.२ दिलीपस्य प्रत्युत्तरम्
७.२.१. अवमानभारात् मोचनम्
७.२.२. समाधानं दातुम् उद्युक्तस्य दिलीपस्य वर्णनम्
७.२.३. सिंहस्य प्रशंसनम्
७. २.४. नन्दिन्यनुपेक्षणीयतायाः विज्ञापनम्
७. २.५. स्वदेहार्पणाय प्रार्थनम्
७.३ उपसंहारः
७.४ अभ्यासः

## ७.०.परिचयः

दिलीपस्य प्रत्युत्तरम् इत्ययं पाठ्यांशः रघुवंशस्य द्वितीयसर्गे वर्तते ।अस्यैव द्वितीयसर्गस्य कथापरतया नन्दिन्याः वरप्रदानम् इत्यपि च व्यवहारः अस्ति। अयं पाठ्यांशः एकचत्वारिंशत्तम श्लोकतः आरभ्य पञ्चचत्वारिंशत्तमश्लोकं यावत् (४१-४५)परिमितःभवति ।अयं पाठ्यांशः दिलीपस्य समाधानरूपेण प्रचलति। दिलीपेन कृतं सिंहस्य प्रशंसनम्, नन्दिन्याः अनुपेक्षणीयतां प्रति दिलीपस्य विज्ञापनम् ,नन्दिन्याः स्थाने स्वदेहार्पणाय दिलीपस्य प्रार्थनम् , इति इमे विषयाः अत्र प्रस्तूयन्ते।

अपि च विरोधिनं संस्तुत्य कार्यसाधने तस्य अनुकूलतासम्पादनम्,परमेश्वर-वसिष्ठयोः उभयोरपि अनुपेक्षणीयता , कारुणिकता, एतदंशानां कथाकथनोपयोगितया कथापुरोगमनाय आरचनं कविता शैलीं पुष्णाति। परमेश्वरादेशस्य अनुल्लघनीयताम् अभ्युपगम्य,वसिष्ठधनस्यापि अनुपेक्षणीयतायाः प्रतिपादनम्, देहार्पणेन आहारस्य समायोजनम्, कृपया धेनोः मोचनस्य अभ्यर्थनम्, इत्येवमादिभिः समस्यापरिष्करणाय उपायान्तरसूचनं सरसभाषया सरसव्यक्तीकरणेन कृतम् ।समस्यानां चर्चापूरस्सरं परिष्कराः अन्वेष्टव्याः इति च काव्यशैल्या उपपादितम् ।

## ७-१ लक्ष्याणि

विश्वं हि पाञ्चभौतिकम् - पृथिवि-अप् -तेजो-वायु-आकाशैः अवतरितम्। मानवश्च प्राणिषु उत्तमः। विवेकपुरुषः बुद्धिसम्पन्नः। अयं भौतिकं यत्किमपि पदार्थं बुद्धिपूर्वकं न उपेक्षेत। प्रकृतेः वा, पदार्थस्य वा,प्राणिनो वा अनुपेक्षणीयता, मानवस्य कृतज्ञतास्वभावं ज्ञापयति। कृतज्ञता च एकतः पदार्थस्य प्रभावं महिमानं च प्रकटयति ।अपरतः पुरुषस्य प्रकृत्यनुकूलचिन्तनं वर्धयति। पदार्थस्य सदुपयोगचिन्तनं, दुरुपयोगवारणं च जीवनस्य

अभ्यस्तं भवति। पदार्थस्य ज्ञानम्, पदार्थव्यवस्थां प्रति ज्ञानम्, इत्येवमादिकं सर्वं प्रकृत्याराधनं भवति। प्रकृत्याराधनभावः मानवं दिव्यगुणसम्पन्नं करोति। नन्दिन्याः अनुपेक्षणीयताव्याजेन प्रकृतिपदार्थस्य जीवराशेः प्राणिनः वा अनुपेक्षणीयतां प्रबोधयति अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन

- दिलीपस्य विधेयतापूर्वकं विज्ञापनं अवगन्तुं समर्थो भवति।
- दिलीपस्य आत्मनि अवज्ञाशिथिलीकरणं पठितुं प्रभवति ।
- अवमानम् अङ्गीकृत्य ,नन्दिन्याः पालनाय अभ्यर्थयतः दिलीपस्य प्रभावपूर्णं उदात्ततास्वभावं प्रति भाषितुं समर्थो भवति ।
- नन्दिन्याः अनुपेक्षणीयतां प्रति दिलीपस्य आशयं लिखितुं पारयति।
- दिलीपस्य कारुणिकतां , नन्दिन्याः रक्षणे निबद्धतां च पठितुं पारयति।
- सम्भषणरीतेः प्राधान्यं अवगन्तुं समर्थो भवति ।

## ७.२ दिलीपस्य प्रत्युत्तरम्

### ७.२.१.अवमानभारात् मोचनम्

इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार।। ४१।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः -"नन्दिन्यां सिंहस्योत्पतनं दैविकम् इति निर्धार्य दिलीपः आत्मनि आवमानभारं दूरीकरोति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, दिलीपस्य प्रत्युत्तरम् इति कथाभागे वर्तते।

पदविभागः - इति, प्रगल्भम्, पुरुषाधिराजः, मृगाधिराजस्य, वचः, निशम्य।
प्रत्याहतास्त्रः, गिरिशप्रभावात्, आत्मनि, अवज्ञाम्, शिथिलीचकार।।

अन्वयक्रमः - पुरुषाधिराजः,मृगाधिराजस्य,प्रगल्भम्,वचः, निशम्य, गिरिशप्रभावात्,प्रत्याहतास्त्रः, इति, आत्मनि,अवज्ञाम्, शिथिलीचकार।

प्रतिपदार्थः - पुरुषाधिराजः, पुरुष = प्रजानाम् ,अधिराजः = प्रभुः दिलीपः,मृगाधिराजस्य,मृग= जन्तूनाम्, अधिराजस्य = स्वामिनः सिहस्य, प्रगल्भम् = दर्पभूयिष्ठम्, वचः = भाषणम्, निशम्य = आकर्ण्य,गिरिशप्रभावात्, गिरिश = महेश्वरस्य, प्रभावात् = महिमावशात्, प्रत्याहतास्त्रः,प्रत्याहत = अवरुद्ध, (कुण्ठित),अस्त्रः = शस्त्रः,इति = हेतोः,आत्मनि = स्वस्मिन्, अवज्ञाम् = अवमानम्, शिथिलीचकार = मन्दं (न्यूनी)चकार।

श्लोकभावः - दिलीपः पुरुषाधिराजः, पुरुषाणां पालकः। पुरुषाश्च बुद्धिजीविनः । दिलीपः तादृशानां बुद्धिमातां राजा। सिहः मृगाधिराजः, मृगाणाम् पालकः। , मृगाश्च,तिर्यञ्चः

क्रूरजन्तवः।एवम् मनीषीणाम् पालकः, मृगाधिराजस्य दर्प-मात्सर्यभूयिष्ठं प्रगल्भं वचः शृणोति ्। दिलीपः इषुप्रयोगे च बाहोः प्रतिष्टम्भः, परमेश्वरप्रभावात् एव जातः, न तु मम असामर्थ्येन , इति आत्मनि अवमानभारं शिथिलीकरोति । अवमानभारात् मुक्तः भवति।

सन्धयः -आत्मन्यवज्ञाम् आत्मनि + अवज्ञाम् (इ + अ = य्)यणादेशसन्धिः।

पुरुषाधिराजः पुरुष + अधिराजः(अ + अ = आ)सवर्णदीर्घदेशसन्धिः।

मृगाधिराजस्य मृग + अधिराजस्य(अ + अ = आ)सवर्णदीर्घदेशसन्धिः।

समासाः -पुरुषाधिराजः पुरुषाणाम् अधिराजः = षष्ठीतत्पुरुषसमासः।

मृगाधिराजस्य मृगाणाम् अधिराजः,तस्य = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१.पुरुषाधिराजः कः ?

२. दिलीपः कुतः आत्मनि अवज्ञां शिधिलीचकार ?

## ७.२.२ समाधानं दातुम् उद्युक्तस्य दिलीपस्य वर्णनम्

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः।। ४२।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः"सिंहस्य प्रगल्भं वचः शृणोति,दिलीपः प्रत्युत्तरं दातुम् उद्युक्तः भवति"इत्येतदंशंनिरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,दिलीपस्य प्रत्युत्तरम् इति कथाभागे वर्तते।

पदविभागः - प्रत्यब्रवीत्, च, एनम्, इषुप्रयोगे, तत्पूर्वभङ्गे, वितथप्रयत्नः।
जडीकृतः, त्र्यम्बकवीक्षणेन, वज्रम्, मुमुक्षन्, इव, वज्रपाणिः।।

अन्वयक्रमः - तत्पूर्वभङ्गे, इषुप्रयोगे, वितथप्रयत्नः , एनम्, वज्रम्, मुमुक्षन्, त्र्यम्बकवीक्षणेन, जडीकृतः, वज्रपाणिः, इव, प्रत्यब्रवीत्।

प्रतिपदार्थः - तत् = बाहुप्रतिष्टम्भनात्मके, पूर्व = प्रथमे, भङ्गे = वैफल्ये (इषुप्रयोगेइत्यस्य विशेषणम्) इषुप्रयोगे, इषु = बाणस्य, प्रयोगे = सन्धाने, वितथप्रयत्नः, वितथ = व्यर्थ,प्रयत्नः = व्यवसायः दिलीपः, एनम्=सिहम्, वज्रम्=वज्रायुधम्, मुमुक्षन् = मोक्तुमिच्छन्,त्र्यम्बकवीक्षणेन,त्र्यम्बक = परेश्वरस्य, वीक्षणेन = विशेषईक्षणेन, जडीकृतः = स्तब्धीकृतः,वज्रपाणिः =इन्द्रः, इव = यथा, प्रत्यब्रवीत् = प्रत्युक्तवान्।

श्लोकभावः-भुजोच्छिन्नरिपुः प्रसभोद्धतारिः दिलीपः प्रतापवान् पराक्रमशाली च।अयं पूर्वं सहस्रशः बाणान् प्रयुक्तवान्।इदानीं अत्रैव इदम्प्रथमतया बाणप्रयोगे विफलः जातः।निषङ्गे एव बाहुः संसक्तः भवति। देवानां प्रार्थनया शिवः आयसम् राजतम् सौवर्णम् चेति त्रिपुरं दहति।तं द्रष्टुं च इन्द्रपुरस्सराः देवाः समागच्छन्ति। तत्र इन्द्रः त्रिपुरदाहं द्रष्टुम् आसक्तो भवति। तदवरोद्धुं च इन्द्रः वज्रायुधं उत्क्षिपति। त्र्यम्बकश्च क्रुध्यति। इन्द्रं तीक्ष्णम् ईक्षति। इन्द्रः हस्ते वज्रायुधं धृत्वा उत्क्षिप्तहस्तस्सन्नेव जडो भवति। तदा प्रभृति इन्द्रः वज्रपाणिः जातः।

प्रकृते - बाणप्रयोगे इदं प्रथमतया विफलयत्नः दिलीपः,हस्ते वज्रायुधं धृत्वा, उत्क्षिप्य, वज्रं मोक्तुम् इच्छन् ,त्र्यम्बकस्य वीक्षणेन जडीकृतः वज्रपाणिः=इन्द्रः,इव अव भासते। तादृशस्सन् दिलीपः सिंहं प्रति ब्रवीति।

सन्धयः -प्रत्यब्रवीत् प्रति+अब्रवीत् (इ + अ= य्) यणादेशसन्धिः।

चैनम् च +एनम् (ए + ए = ऐ)वृद्धिसन्धिः।

समासाः-वितथप्रयत्नः वितथः प्रयत्नः यस्य सः =बहुव्रीहिसमासः।

त्रयम्बक... त्रीणि अम्बकानि (नयनानि) यस्य सः = बहुव्रीहिसमासः।

वज्रपाणिः वज्रं पाणौ यस्य सः =बहुव्रीहिसमासः।

कोशः - इषुः पत्री रोप इषुर्द्वयोः (अमरकोशः)

**स्वावलोकनप्रश्नाः -**

१.त्र्यम्बकवीक्षणेन कः जडीकृतः ?

२. दिलीपः कथम् उपमितः? केन उपमितः?

## ७.२.३. सिहस्य प्रशंसनम्

संरुद्धचेष्टस्य मृगेन्द्र! कामं हास्यं वचस्तद्यदहं विवक्षुः।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये।। ४३।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम्। अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "दिलीपः मृगेन्द्रं प्रशंसन् ,आत्मानं न्यूनीकुर्वन् च , मृगेन्द्रं प्रतिब्रवीति"इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,दिलीपस्य प्रत्युत्तरम् इति कथाभागे वर्तते।

पदविभागः - संरुद्धचेष्टस्य, मृगेन्द्र, कामम्, हास्यम्, वचः, तद्, यद्,अहम्, विविक्षुः।
अन्तर्गतम्, प्राणभृताम्, हि, वेद, सर्वम्, भवान्,भावम्, अतः, अभिधास्ये।।

अन्वयक्रमः - मृगेन्द्र! संरुद्धचेष्टस्य,तद्, वचः, कामम्, हास्यम्,यद् वचः, अहं, विवक्षुः,

हि, भावन्, प्राणभूताम्, अन्तर्गतम्, सर्वम्, भावम्, वेद, अतः अभिधास्ये।
प्रतिपदार्थः - मृगेन्द्र! = दिलीप!, संरुद्धचेष्टस्य,संरुद्ध = प्रतिरुद्ध, चेष्टस्य = हस्तसंचालनादि व्यापारस्य,मम = दिलीपस्य,तद् =उच्यमानम्, वचः = वाक्, कामम् = अतीव, हास्यम् = परिहासयोग्यम्, यद् = यद् वचः, अहम् = दिलीपः, विवक्षुः = कथयितुम् इच्छुः अस्मि, हि= यतः, भवान् = दिलीपः, प्रणभृताम् = प्राणिनाम्,अन्तर्गतम् = हृद्गतम्,भावम् = अभिप्रायम्,वेद= जानाति, इति अतः = अस्मात् कारणात्, अभिधास्ये = कथयिष्यामि।
श्लोकभावः - "मृगेन्द्र ! शरसन्धाने बाहोः प्रतिष्टम्भनेन अहं अवरुद्धचेष्टः अस्मि। भयचकितां नन्दिनीं असंरक्ष्य पराभवं च प्राप्तःअस्मि। नन्दिनीं त्रातुम् असमर्थस्य मम वचः तव निश्चयेन परिहसनीयम् एव भवति। तथापि भवान् परमेश्वरस्य सेवकः खलु। परमेश्वरः भूतनाथः। सः प्राणिनाम् हृदन्तराले तिष्ठति। सर्वेषाम् अभिप्रायम् जानाति। एवं परमेश्वर इव त्वमपि सर्वेषां आन्तर्यं जानासि इति हेतोः किञ्चित् वक्तुकामः अस्मि इति" दिलीपः सिंहं अनुकूलं करोति।
व्याकरणांशाःसन्धयः-मृगेन्द्रः मृग + इन्द्रः (अ + इ = ए)गुणसन्धिः।
समासाः - मृगेन्द्रः मृगाणाम् इन्द्रः =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१.संरुद्धचेष्टः कः ?

२. "भवान् प्राणभृताम्,अन्तर्गतम्,वेद"अत्र " भवान् " कः ?

## ७.२.४ नन्दिन्यनुपेक्षणीयतायाः विज्ञापनम्

मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहितग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम्।। ४४।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।
श्लोकसन्दर्भः-"नन्दिन्याः अनुपेक्षणीयतां विज्ञापयन् दिलीपः मृगेन्द्रं प्रति वदति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,दिलीपस्य प्रत्युत्तरम् इति पाठ्यांशे वर्तते।
पदविभागः - मान्यः, स, मे, स्थावरजङ्गमानाम्, सर्गस्थितिप्रत्यवहारहेतुः।
गुरोः, अपि, इदम्, धनम्, आहिताग्नेः, नश्यत्, पुरस्तात्,अनुपेक्षणीयम्।।
अन्वयक्रमः -स्थावरजङ्गमानाम्, सर्गस्थितिप्रत्यवहारहेतुः, सः, मे,(अवश्यम्) मान्यः,(एव)

आहिताग्नेः = अग्न्याराधकस्य, गुरोः = मम गुरोः वसिष्ठस्य,धनम् = नन्दिनीरूपं धनम् अपि = च , अनुपेक्षणीयम् = उपेक्षितुम् अर्हम् न भवति (खलु)।

श्लोकभावः- मृगेन्द्र ! परमेश्वरः सर्वमहान् ,अयं लोकाधीशः।तथाहि- लोकःस्थावरः जङ्गमश्चेति द्विविधः। स्थावरः नाम अचरः, जङ्गमः नाम चरः। एवम् चर - अचरात्मकस्य लोकस्य प्रत्येकतः सृष्टि- स्थिति -लयात्मकाः विधयः(क्रियाः) वर्तन्ते।सर्वासम् अपि एतासां क्रियाणाम् परमेश्वरः कारणभूतः।सः निश्चयेन मान्यः।तस्य वचनम् मम,भवतश्चापि अनतिक्रमणीयम् एव।परम् अत्र मम विज्ञापना काचित् अस्ति।तथाहि- वसिष्ठः मम गुरुः।स च अग्न्याराधकः,यज्ञयागादीनाम् अनुष्ठाता। मनुवंशीयानाम् आपन्निवारकः।इयं नदिनी तस्य यागसाधनम्,यज्ञ-यागादीनाम् आवश्यकं पयः -दधि-आज्याधिकं सर्वं नन्दिन्यधीनम्।यद्ययं न भवति तर्हि यज्ञ-यागादीनि अन्तरितानि भवन्ति। अतः मुनिहोमधेनुः अपि न उपेक्षितुम् अर्हा "इति दिलीपःनन्दिन्याःअनुपेक्षणीयताम् सिंहाय निवेदयति।

सन्धयः - आहिताग्नेः आहित + अग्नेः(अ +अ = आ)सवर्णदीर्घसन्धिः।

गुरोरपीदम् गुरोरपि + इदम् (इ + इ = आ)सवर्णदीर्घसन्धिः।

समासाः - आहिताग्नेः आहितः अग्निः येन सः,तस्य = बहुव्रीहिसमासः।

अनुपेक्षणीयम् न उपेक्षणीयम् = नञ् तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. आहिताग्नेः वसिष्ठस्य धनं किम् ?

२. स्थावरजंगमानां विधयः के ?

३. "मान्यः स मे स्थावरजङ्गमानाम्" अत्र "सः" कः ?

## ७.२.५ स्वदेहार्पणाय प्रार्थनम्

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनिरियं महर्षेः।। ४५।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः-"मदीयेन देहेन शरीरवृत्तिं निर्व र्तस्व"इति दिलीपः मृगेन्द्रं विज्ञापयति इत्येतदंशं निरूपयन् अयं श्लोकःनन्दिनीवरप्रदाननामके द्वितीयसर्गे,दिलीपस्य प्रत्युत्तरम् इति कथाभागे अस्ति।

पदविभागः - सः, त्वम्, मदीयेन, शरीरवृत्तिम्, देहेन, निर्वर्तयितुम्, प्रसीद।
दिनावसानोत्सुकबालवत्सा, विसृज्यताम्, धेनुः इयम्, महर्षेः।।

अन्वयक्रमः-स,त्वम्,मदीयेन देहेन,शरीरवृत्तिम्,निर्वर्तयितुम्, प्रसीद,दिनावसानोत्सुकबालवत्सा, महर्षेः, इयम्, धेनुः, विसृज्यताम्।

प्रतिपदार्थः - सः = समीपागतसत्ववृत्तिः, त्वम् = कुम्भोदरः भवान् ,मदीयेन = मत्सम्बन्धिना,

(परम्,तदैव) पुरस्तात्,नश्यत्, इदम्, आहिताग्नेः, गुरोः, धनम्, अपि, अनुपेक्षणीयम्, (खलु)।
प्रतिपदार्थः-स्थावरजङ्गमानाम् ,स्थावर = स्थिररूपाणाम् तरुशैलादीनाम्, जंगमानाम् = चरण शीलानाम् मनुष्यादीनाम् ,सर्ग = उत्पत्ति, स्थिति = रक्षण,प्रत्यवहार = विनाशानाम्, हेतुः = कार णभूतः,सः = परमेश्वरः,मे = मम दिलीपस्य,(अवश्यम्)मान्यः = पूज्यः,(एव)(परम्,तदैव) पुरस्तात् = अग्रे, नश्यत् = नाशं गच्छत्, इदम् = पुरतः दृश्यमानम्, देहेन = भौतिककायेन, शरीरवृत्तिम्, शरीर = देहस्य, वृत्तिम् = जीवनम्, निर्वर्तयितुम् = सम्पादयितुम् ,(कर्तुम्) प्रसीद = प्रसन्नो भव,दिनावसानोत्सुकबालवत्सा, दिन = दिवसस्य, अवसान= अन्ते, उत्सुक = उत्कण्ठित, बालवत्सा = बालसन्तानवती, महर्षेः = वसिष्ठस्य, इयम् = एषा, धेनुः = नन्दिनीं, विसृज्यताम् = त्यज्यताम्।
श्लोकभावः - "मृगेन्द्र ! अङ्कागतसत्त्ववृत्तिः खलु भवान्। अहमपि अङ्कागतजन्तुरेव।मदीयेन शरीरेण क्षुधां निवारयितुम् प्रसन्नो भव। इयं आहिताग्नेः वसष्ठस्य यागसाधनम्। किञ्च एषा सकृत्प्रसूता, एकसन्ताना। आश्रमे अस्याः वत्सा अस्ति।दिवसावसाने सोत्कण्ठं स्वमात्रे नन्दिन्यै प्रतीक्षते। मृगेन्द्र ! वत्सायाः दैन्यं पश्यतु । नन्दिन्याः यागसाधनत्वमपि अवगच्छतु, मद्देहार्पणेन नन्दिन्याः विसर्जनाय अङ्गीकरोतु " इति दिलीपः सिहं प्रार्थयति।
सन्धयः - दिनावसान... दिन + अवसान (अ + अ =आ) सवर्णदीर्घसन्धिः।
अवसानोत्सुका...अवसान + उत्सुका (अ+ उ =ओ) गुणसन्धिः।
समासाः -दिनावसानम् दिनस्य अवसानं = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१. "स त्वं मदीयेन शरीरवृत्तिम् " अत्र "सः " कः? सः कीदृशः?

२. दिलीपः सिंहं किमिति प्रार्थयामास ?

## ७.३ .उपसंहारः

एवं दिलीपस्य प्रत्युत्तरम् इति पाठ्यांशः ,विधेः वा ,प्रमादस्य वा वशो भूत्वा,आपन्निमग्नः सन्, तस्मिन् समये कथं प्रवर्तेत इति कष्टाभिभूतस्य आदर्शप्रायम् अनुष्ठानम् अत्र बोधितम्। प्रथमतः,विधेः वा ,दैवस्य वा प्राबल्यं प्रचलति सति, आत्मनि अवज्ञायाः शिथिलीकरणम् ,कष्टैः सह योद्धुम् आत्मनि विश्वासं जनयति,वर्धयति च।अधिगमनशीलस्यापि मनसः हारिका दिलीपस्य विधेयता,पौर्वापर्यक्रमेण निवेद्यमानविषयस्य उपपादनारीतिः, गुरौ भक्तिः, तस्य आदेशपालने निबद्धता,नन्दिन्याम् अनुकम्पा,नन्दिन्याः अनुपेक्षणीयता,अन्ततः आत्मदेहत्यागाय संसिद्धता इत्यादिकं पाठकजनमनस्सु विनयसंस्कारं,निबद्धतासंस्कारं,प्राणिषु अनुकम्पासंस्कृतिं च जनयितुम् अलं भवति।

## ७.४.अभ्यासः

श्लोकद्वयं व्याख्यात ?

(१). इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार।।

(२).मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम्।।

* * *

# अंशः-VIII;सिंह-दिलीपयोः संवादः
# सिंहस्य अभिभाषणम्

संरचना


८.० परिचयः

८.१ लक्ष्याणि

८.२ सिंह-दिलीपयोः संवादः -सिंहस्य अभिभाषणम्

- ८.२.१. पुनः भाषणाय सिंहस्य उपक्रमणम्
- ८.२.२. विचारमूढः प्रतिभासि
- ८.२.३. प्रजाः प्रजानाथ पितेव पासि
- ८.२.४. शक्योऽस्य मन्युर्भवता विनेतुम्
- ८.२.५. तद्रक्ष कल्याणपरम्पराणाम्

८.३ उपसंहारः

८.४ अभ्यासः


## ८.० परिचयः

सिंहस्य अभिभाषणम् इत्ययं पाठ्यभागः रघुवंशस्य द्वितीयसर्गे वर्तते।अस्यैव कथापरतया नन्दिनीवरप्रदानम् इत्यपि च व्यवहारःअस्ति।अयं पाठ्यभागः षट्चत्वारिंशत्तमश्लोकतः आरभ्य पञ्चाशत्तमश्लोकपर्यन्तं (४६-५०)परिमितः भवति। देहार्पणाय अभ्यर्थितं दिलीपं प्रति सिंहस्य भाषणम् अत्र प्रचलति।अस्मिन् पाठ्यांशे च सिंहः दिलीपं मूढं भावयति,विवेचनाय चोदयति, दिलीपस्य सामर्थ्यं सूचयति,देहस्य रक्षणाय दिलीपं सन्दिशति,इत्येते विषयाःवर्णिताः भवन्ति।

## ८.१ लक्ष्याणि

मानवः बुद्धिजीवः विवेकसम्पन्नश्च।अयं मानवः आत्मानम् उद्धर्तुं सततम् उद्योगशीलवान् भवेत्। हितैषिणम्मन्याः केचित् आत्मोद्धरणे प्रयतमानं मानवं देश-काल-पात्राद्यनुकूलतया, धर्मस्य प्रतिकूलतया च सन्दिश्य अपमार्गं प्रापयन्ति।मानवः तं च असमुचितमार्गम् इति जानीयात्। विवेकात् न प्रमदितव्यो भवेत्। मानवः धर्म-अर्थ- काम-मोक्ष-चतुर्विधपुरुषार्थसाधनशीलः खलु। अतः तस्मिन् समये विवेकसम्पन्नो भूत्वा ,अपमागम् अप्रविश्य स्वधर्मानुष्ठानपरो भवेत् इत्येतदंशं बोधयति अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन-

- सिंहस्य देश-काल-पात्राद्यनुकूलं धर्मस्य प्रतिकूलभाषणं प्रति पठितुं प्रभवति।
- सिंहस्य अभिभाषणे हेतुबद्धतास्वरूपं भाषितुं समर्थो भवति।
- सरलसंस्कृतसम्भाषणं कर्तुं पारयति।
- सरससम्भाषणं सूक्ष्मव्यक्तीकरणविधानं पठितुं समर्थो भवति।
- भौतिक - बौद्धिक(पारमार्थिक)योः हेतुबद्धतानुशीलनं प्रति लिखितुं प्रभवति।
- सिंहस्य अधिगमनस्वभावं च भाषितुं पारयति।

## ८.२ सिंहस्य अभिभाषणम्

### ८.२.१पुनः भाषणाय सिंहस्य उपक्रमणम्

अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्।
भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद्विहस्यार्थपतिं बभाषे।। ४६।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः-"दिलीपस्य वचः निशम्य सिंहः पुनः भाषितुं आरभते" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,सिंहस्य अभिभाषणम् इति कथाभागे वर्तते।

पदविभागः - अथ, अन्धकारम्, गिरिगह्वराणाम्, दंष्ट्रामयूखैः, शकलानि, कुर्वन्।
भूयः, सः, भूतेश्वरपार्श्ववर्ती, किञ्चत् ,विहस्य, अर्थपतिम्, भूयः, बभाषे।।

अन्वयक्रमः - अथ, भूतेश्वरपार्श्ववर्ती, सः, गिरिगह्वराणाम्, अन्धकारम्, दंष्ट्रामयूखैः,
शकलानि, कुर्वन्,विहस्य, अर्थपतिम्, भूयः, बभाषे।

प्रतिपदार्थः - अथ =दिलीपेन देहार्पणाय विज्ञापनानन्तरम् , भूतेश्वरपार्श्ववर्ती,भूत = प्राणिनाम्, ईश्वरः=प्रभोः परमेश्वरस्य,पार्श्ववर्ती = अनुचरः, सः = कुम्भोदरः सिंहः, गिरिगह्वराणाम्, गिरि = पर्वतस्य ,गह्वराणाम् = गुहानाम्,अन्धकारम् = ध्वान्तम्,दंष्ट्रामयूखैः, दंष्ट्रा=निशितदन्तानाम्, मयूखैः = कान्तिभिः,शकलानि = खण्डितानि,कुर्वन् = विदधन्, किंचित् = ईषत्, विहस्य = हासं प्रदर्श्य (स्मितं कृत्वा),अर्थपतिम्,अर्थ =धनस्य (उदात्तानाम् आशयाम् ),पतिम् = स्वामिनम् (रक्षकम्)आर्थिकरीत्या सुसम्पन्नम् (अर्थगम्भीरम्,उदात्ताशयम्) दिलीपम्, भूयः = पुनः, बभाषे = उवाच।

श्लोकभावः - मृगेन्द्रः परमेश्वरस्य पार्श्ववर्ती किङ्करः। सः किञ्चित् विहस्य दिलीपं परिहसति। सर्वासाम् आपदाम् प्रत्यक्षतः परोक्षतः वा प्रधानं कारणं धनम्। तादृशस्य धनस्य अधिपतिः दिलीपः। हिमालयस्य गुहाश्च महत्यः ।तत्र अन्धकारः सान्द्रं व्याप्तः । सिंहस्य दंष्ट्राः धवलतराः।एते च हिमशिखराणां पर्यन्तभूमिषु विद्यन्ते। प्रकृते च प्रकामं धवलतराणां स्वस्य दंष्ट्राणां कान्तिभिः ,गिरिगुहानां अन्धकारं दूरीकुर्वन् , धनपतिसदृशं दिलीपं मृगेन्द्रः पुनः भाषणाय एवं उपक्रमते।

व्याकरणांशाः- सन्धयः अथान्धकारम्, अथ + अन्धकारम्,(अ + अ =आ)सवर्णदीर्घसन्धिः।
विहस्यार्थ...विहस्य+ अर्थ... (अ + अ =आ)सवर्णदीर्घसन्धिः।
भूतेश्वर... भूत + ईश्वर... (अ + ई =ए) गुणसन्धिः।
समासाः दंष्ट्रमयूखैः दंष्ट्राणाम् मयूखाः, तैः = षष्ठीतत्पुरुषसमासः।
गिरिगह्वराणाम् गिरेः गह्वराणि, तेषाम्=षष्ठीतत्पुरुषसमासः।
कोशः - गह्वरम् देवखातबिले गुह गह्वरम् (अमरकोशः)

**स्वावलोकनप्रश्नाः -**

१.भूतेश्वरपार्श्ववर्ती कः ?

२. "अर्थपतिम्" इति शब्दस्य अर्थः कः ?

## ८.२.२ विचारमूढः प्रतिभासि

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्।। ४७।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "त्वं विचारमूढः इति मृगेन्द्रः दिलीपं कथयनति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, सिंहस्य अभिभाषणम् इति कथाभागे वर्तते।

पदविभागः - एकातपत्रम्, जगतः, प्रभुत्वम्, नवम्, वयः, कान्तम् ,इदम्, वपुः,च।
अल्पस्य ,हेतोः, बहु,हातुम्,इच्छन् , विचारमूढः, प्रतिभासि, मे, त्वम्।।

अन्वयक्रमः - एकातपत्रम्, जगतः, प्रभुत्वम्, नवम्, वयः, कान्तम्, इदम्, वपुः च,एवम् अल्पस्य ,हेतोः, बहु, हातुम्,इच्छन्,त्वम्, मे, वितारमूढः, प्रतिभासि।

प्रतिपदार्थः - एकातपत्रम् = एकच्छत्रम्, जगतः = सर्वस्य भुवः, प्रभुत्वम् = अधिकारः, नवम्= नूतनम्, वयः = तारुण्यम्, इदम् =पुरः दृश्यमानम्, कान्तम् = मनोहरम्, वपुः = शरीरञ्च, एवम्= एवम् एतत् सर्वम् , अल्पस्य = स्वल्पस्य, हेतोः = कारणात्, बहु = अधिकम् , हातुम् = त्यक्तुम्,इच्छन् = अभिलषन् , त्वम् = दिलीपः, मे = मम कुम्भोदरस्य, विचारमूढः, विचारे = कार्य-अकार्यविवेके, मूढः = मूर्खः, इव, प्रतिभासि =अवभाससे।

श्लोकभावः - "राजेन्द्र ! दिलीप ! एकच्छत्राधिपत्यं सार्वभौमाधिकारः, प्रतिष्ठाकरं प्रजानाम् आदरणम्, सुन्दरञ्च शरीरम्, नवं वयः च एतानि चत्वारि प्रायशः एकत्र न भवन्ति। एतेषां समावेशः विरलः,स च इदानीम्, भवति =त्वयि ,सम्पन्नः। स च भवतः श्रयसे प्रतिष्ठायै च अलम्। एतेषां एकत्र सङ्गमः प्रायशो न भवति। एतेषां समावेशः पुण्यकृतेषु भवादृशेशेषु एव भवति। एतत् महत् ऐश्वर्यम्। तत्सर्वं अल्पस्य हेतोः हातुं अभिलषसि। परिशील्यमाने दिलीप ! त्वं न तथा विमृश्यकारी,किन्तु विचारे मूढः एव। आलोचनारहितः सन् कर्मसु प्रवर्तसे "इव प्रतिभाससे इति कुम्भोदरः दिलीपं स्वधर्मानुष्ठानतः भ्रष्टं कर्तुं प्रयतते।

व्याकरणांशाः -सन्धयः एकातपत्रम् एक + आतपत्रञ्च (अ + अ =आ)सवर्णदीर्घसन्धिः।

समासाः -एकातपत्रम् एकञ्च तद् आतपत्रम् च = विशेषणपूर्वपदकर्मधारयसमासः।
विचारमूढः विचारे मूढः = सप्तमीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१."विचारमूढः प्रतिभासि मे त्वम्" अत्र "मे" कं सम्बन्धयति ?

२. अत्र सिंहः दिलीपं किं कर्तुं प्रयतते ?

## ८.२.३ प्रजाः प्रजानाथ पितेव पासि

भूतानुकम्पा तव चेदियं गौः एका भवेत्स्वस्तिमती त्वदन्ते।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि।।४८।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः-"नन्दिन्याः संरक्षणापेक्षया, भवतः देहस्य रक्षणम् उपयोगकरम्"इति सिंहः दिलीपं कथयति इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे सिंहस्य अभिभाषणम् इति कथाभागे वर्तते।

पदविभागः - भूतानुकम्पा, तव,चेत्, इयम्, गौः, एका, भवेत्, स्वस्तिमती, त्वदन्ते।
जीवन्, पुनः, शश्वत्, उपप्लवेभ्यः, प्रजाः, प्रजानाथ, पिता, इव, पासि।।

अन्वयक्रमः - तव, भूतानुकम्पा, चेत्, त्वदन्ते , इयम्, एका,गौः, स्वस्तिमती, भवेत्,
प्रजानाथ, जीवन्, पुनः, शश्वत्, उपप्लवेभ्यः,प्रजाः, पिता, इव, पासि।

प्रतिपदार्थः - प्रजानाथ! = जनपालक! तव = भवतः दिलीपस्य , भूतानुकम्पा,भूत = प्राणिषु,अनुकम्पा = दया, चेत् = यदि,(अस्ति,तर्हि) त्वत् = दिलीपस्य भवतः,अन्ते = देहस्य समर्णानन्तरम् परलोकंगते इयम् = एषा, एका = केवला,गौः = नन्दिनीधेनुः, स्वस्तिमती = क्षेमवती, रक्षिता, भवेत् = स्यात्, जीवन् = प्राणान्धारयन्, पुनः = तु, शश्वत्= निरन्तरम्, उपप्लवेभ्यः=उपद्रवेभ्यः ,प्रजाः = पौरान् ,पिता = जनकः, इव = यथा, पासि=त्रायसे।

श्लोकभावः -" राजेन्द्र ! दिलीप ! यद्यपि भवान् कारुणिकः दयावान्, तथापि भवतः कारुणि कतादृष्ट्या अधिकाधिकं एका गौः परिरक्षिता भवति। जीवन् पुनः उपप्लवेभ्यः प्रजाः पासि।

उपप्लवाः - उपद्रवाः द्विविधाः, दैविकाः - मानुषाश्च। भूकम्पनम् जलप्रलयः अतिवृष्टिः, अनावृष्टिः ,दुर्भिक्षं प्रभृतयः दैविकाः उपद्रवाः। उग्रवादः,तीव्रवाद, जनानाम् अपहरणम् , जनानां मारणम् चौर्यम् प्रभृतयः मानुषाः उपद्रवाः।

जीवन् पुनः भवान् एतेभ्यः दैविकेभ्यः मानुषेभ्यश्च प्रमादेभ्यःप्रजाःपिता इव पासि। एकस्याः धेनोः संरक्षणाय दोहार्पणं युक्तं वा, अखिलजगद्रक्षणाय देहस्य विनियोगः युक्तः वा - स्वस्य प्राणव्ययेन एकस्याः धेनोः रक्षणापेक्षया शश्वत् आजीवितान्तं अखिलजगात्

त्राणं युक्तियुक्तं श्रेयोदायकञ्च भवति, विचारयतु" इति मृगेन्द्रः दिलीपं आलोचनाय प्रेरयति।

व्याकरणांशाः -सन्धयः -भूतानुकम्पा; भूत + अनुकम्पा (अ +अ= आ) सवर्णदीर्घसन्धिः।

पितेव; पिता + इव(आ +इ =ए)गुणसन्धिः।

त्वदन्ते; त्वत् + अन्ते (त् + अ = द्)जश्त्वसन्धिः।

समासाः-भूतानुकम्पा; भूतेषु अनुकम्पा = सप्तमीतत्पुरुषसमासः।

कोशः- स्वस्ति; स्वस्त्याशीः क्षेम पुण्यादौ (अमरकोशः)

**स्वावलोकनप्रश्नाः -**

१."भवेत्स्वस्तिमती त्वदन्ते"अत्र " त्वद् "शब्दः कं सम्बन्धयति ?

२. दिलीपस्य देहार्पणेन एका स्वस्तिमती भवेत् ,सा का ?

## ८.२.४ शक्यः अस्य मन्युः भवता विनेतुम्

अथैकधेनोरपराधदण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः।। ४९।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च।

श्लोकसन्दर्भः-"गुरोः वसिष्ठस्य कोपःअपनेतुं शक्य एव" इति सिंहः दिलीपं वदति इत्यंशं निरूपयन्नयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे सिंहस्य अभिभाषणम् इति कथाभागे वर्तते।

पदविभागः - अथ, एकधेनोः, अपराधदण्डात्, गुरोः, कृशानुप्रतिमात्, बिभेषि।
शक्यः, अस्य, मन्युः, भगवता, विनेतुम्, गाः, कोटिशः, स्पर्शयता ,घटोध्नीः।।

अन्वयक्रमः - अथ, एकधेनोः, अपराधदण्डात्, कृशानुप्रतिमात्, गुरोः, बिभेषि, (चेत्)अस्य, मन्युः ,घटोध्नीः, कोटिशः गाः, स्पर्शयता, भवता, विनेतुम्. शक्यः।

प्रतिपदार्थः - अथ = अथ वा, एकधेनोः,एक = केवलायाः, धेनोः = नन्दिन्याः अपराधदण्डात्, अपराध=दोषाचरणेन जायमानस्य,दण्डात्=दण्डनस्य कारणतः, कृशानुप्रतिमात्, कृशानु= वह्निना,प्रतिमात् = सदृशात्,गुरोः = वसिष्ठात्,बिभेषि = भयं शङ्कसे,चेत् = तर्हि, घटोध्नीः= घटाः इव ऊधः यासाम् तादृशीः, कोटिशः= कोटिसंख्याकाः,गाः= धेनूः,स्पर्शयता = ददता, भवता = दिलीपेन,अस्य = गुरोः,मन्युः = क्रोधः, विनेतुम् = दूरीकर्तुम्,शक्यः= समर्थः।

श्लोकभावः - दिलीप ! वसिष्ठः मे कुलगुरुः सः अग्न्याराधकः, यज्ञयागादीनाम् अनुष्ठाता।

अग्निसदृशः पवित्रः, तस्य आदेशः शिरोधर्यः । आदेशस्य भङ्गः दण्डनाय कल्पते इति, एकस्याः गोः अपराधविषये गुरोः दण्डनात् बिभेषि, तादृशस्य भयस्य अवसरः एव नास्ति। त्वं गुरोः कोपमपि अपनेतुं समर्थः। तथाहि - भवतः पशुसम्पत्तिः महती। तत्रापि गोधनम् महत्, घटसदृश उधवत्यः गावश्च कोटिशस्सन्ति। ताः समर्पय गुरोः कोपं परिहर्तुं समर्थः असि इति मृगेन्द्रः गुरोः कोपापनोदनस्य मार्गं दिलीपाय वदति ।

व्याकरणांशाः - सन्धयः - अथैकधेनोः, अथ + एकधेनोः (अ + ए = ऐ) वृद्धिसन्धिः ।

समासाः - घटोघ्नीः, घटः इव ऊधः यासां ताः = बहुव्रीहिसमासः ।

| |
|---|
| स्वावलोकनप्रश्नाः<br>१. कृशानुप्रतिमः कः ?<br><br>२. 'शक्योऽस्य मन्युर्भवता विनेतुम् 'अत्र' भवता' शब्दः कं सम्बन्धयति ? |

**८.२.५. तद्रक्ष कल्याणपरम्पराणाम्**

तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ।। ५० ।।

श्लोकपरिचयः, अयं श्लोकः रघुवंशमहाकाव्ये वर्तते। तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये उपमा कालिदासस्य इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः, भवान् देहार्पणप्रयत्नात् विरमतु इति सिंहः दिलीपं सन्दिशयति इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे सिंहस्य अभिभाषणम् इति कथाभागे वर्तते।

पदविभागः, तत्, रक्ष, कल्याणपरम्पराणाम्, भोक्तारम्, ऊर्जस्वलम्, आत्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नम्, ऋद्धम्, हि, राज्यम्, पदम्, ऐन्द्रम् , आहुः ।।

अन्वयक्रमः, तत्, कल्याणपरम्पराणाम्, भोक्तारम्, ऊर्ज स्वलम्, आत्मदेहम् रक्ष, हि, ऋद्धम्, राज्यम्, महीतलस्पर्शनमात्रभिन्नम्, ऐन्द्रम्, आहुः ।

प्रतिपदार्थः- तत् = तस्मात् कारणात्, काल्याणपरम्पराणाम्, कल्याण = शुभस्य,परम्पराणाम्= अनुक्रमाणाम् , भोक्तारम् = अनुभवितारम्, ऊर्जस्वलम् = बलसम्पन्नम् कान्तिवन्तं च,आत्मदेहम् आत्म = निजस्य,देहम्= शरीरम्, रक्ष=पालय, हि = यतः, ऋद्धम् =समृद्धम्,राज्यम्=राजकीय अधिकारम्, महीतलस्पर्शनमात्रभिन्नम्, महीतल = भूलोकस्य,स्पर्शनमात्र = स्पर्शनेन केवलम्,

भिन्नम् = व्यत्यासेन युतम्, ऐन्द्रम् = इन्द्रसम्बन्धि,पदम् = स्थानम्, आहुः = कथयन्ति। श्लोकभावः - "दिलीप ! देहार्पण प्रयत्नात् विरमतु। तव च राज्यम् ऋद्धम्; समृद्धिसम्पन्नम्। देहार्पणेन राज्याधिकारः नष्टः भवति। तच्च न तथा विचारसहम्। राज्याधिकारः राज्ञः धन-कनक- वस्तु- वाहनादिसौकर्यान् समयोजयति। समृद्धं राज्यं केवलं भूलोकमात्रभिन्नम् ऐन्द्रं पदं व्यवहरन्ति। ऐन्द्रम् स्वर्गसम्बन्धि, राज्यम् तु भौमम् प्रभुत्वम्। तदेकः एव भेदः ।अन्यत् सर्वं स्वर्गाधिपत्य-राज्याधिपत्ययोः समानम्। सौर्वभौमाधिकारः, प्रजानाम् आदरणम् ,युक्तं वयः, सुन्दरं वपुः, एषा भवतः कल्याणपरम्परा। ताम् अनुभुज्य देहश्च ऊर्जस्वलः बलिष्ठश्च जातः। बलसम्पन्नम् इमं देहं अखिलजगत् त्राणाय परिरक्षतु "इति मृगेन्द्रः दिलीपं सन्दिशति।।
समासाः -आत्मदेहम् आत्मनः देहम् = षष्ठीतत्पुरुषसमासः।

महीतल(म्) ... मह्याः तलम् =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१."आत्मदेहम्"अत्र "आत्म" शब्दः कं सम्बन्धयति ?

२."आत्मदेहम्"कीदृशम् ?

३.राज्यं कथम् आहुः ?

## ८.३ .उपसंहारः

एवम् सिंहः देश-काल-पात्र-अनुगुणं सन्दिश्य दिलीपं परीक्षते। अत्र सिंहस्य अभिभाषणे च उपपादिता, सकारणता = हेतुबद्धता, विश्लेषणचातुर्यम् आविष्करोति। बलहीनमनस्कानां सिंहस्य वादः सहेतुक इव अवभासते। अप(भि)भाषणे अपि विश्लेषणपुरस्सरं वादनम्,तत्रापि सकारणतायाः सम्पादनम्, काव्यरचने,विषयोपस्थापने च कवेः च सिद्ध हस्तताम् प्रकटयति। दृढमनस्कः दिलीपः इमं च वादं विज्ञापनपुरस्सरं अनन्तरपाठ्यांशे तिरस्करोति।

## ८.४ .अभ्यासः

श्लोकद्वयं व्याख्यात ?

(१). एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च।
अल्पस्य हेतोर्बहुहातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्।।

(२).तद्रक्ष कल्याणपरस्पराणां भोक्तारमूर्जस्वलमात्मदेहम्।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः।।

* * *

# अंशः- IX ;देहार्पणाय दिलीपस्य विज्ञापनम्

संरचना

९.०. परिचयः
९.१. लक्ष्याणि
९.२. देहार्पणाय दिलीपस्य विज्ञापनम्
९.२.१ सिंहस्य वचसां गुहासु प्रतिध्वननम्
९.२.२.पुनः विज्ञापनाय दिलीपस्य उपक्रमणम्
९.२.३ क्षत्रियस्य महत्त्वम्
९.२.४ नन्दिन्यसमानतायाः विज्ञापनम्
९.२.५ देहार्पणेन प्रयोजनद्वयस्य साधनम्
९.२.६ बाध्यतायाः निर्वर्तनम्
९.२.७ भौतिकेषु दिव्यानाम् अनास्थाकथनम्
९.२.८ स्नेहस्य रक्षणम्
९.२.९ देहस्य अर्पणम्
९.३. उपसंहारः
९.४. अभ्यासः

## ९.०. परिचयः

"देहार्पणाय दिलीपस्य विज्ञापनम् "इत्ययं पाठ्यांशः रघुवंशस्य द्वितीयसर्गे वर्तते। अस्यैव द्वितीयसर्गस्य कथापरतया नन्दिनीवरप्रदानम् इत्यपि च व्यवहारः अस्ति। अयं पाठ्यांशः एक-पञ्चाशत्तमश्लोकतः आरभ्य एकोनषष्ठितमश्लोकं यावत् (५-५९) परिमितः भवति। लौकिकभोगानाम् अनुभवाय सिंहेन सन्दिष्टं दिलीपः न शृणोति। स्वदेहस्य अर्पणायैव दिलीपः सिद्धः भवति।तथैव सिहं विज्ञापयति। अत्र च प्रधानतया क्षत्रियस्य कर्तव्यबोधनम् , नन्दिन्याः विनिमयस्य असाध्यता ज्ञापनम्,स्वदेहस्य अर्पणे प्रयोजनद्वयस्य साधनम्, स्वस्य बाध्यतायाः निर्वर्तनम्, दिव्यानां भौतिकेषु अनास्थाकथनम् ,स्नेहस्य रक्षणाय विज्ञापनम्, सिंहाय स्वीयदेहस्य अर्पणम्,इत्येते अंशाः वर्णिताः।

दिलीपः विनयः, त्यागः,निबद्धता,एषां गुणानां आश्रयः । दिलीपस्य एतत् गुणप्रख्यापनाय उद्दिष्टः अयं पाठ्यांशःप् ााठकानां मनः आकर्षति। अत्र भाषा सरसा सरला च विद्यते। व्यक्तीकरणं स्पष्टं ,स्फुटं च भवति। अत्र च व्यावारिकभाषाशैल्या - संभाषणमाध्यमेन प्रचलितः विषयः सर्वोपि दृश्यकाव्यं स्मारयति।इदं श्रव्यकाव्यं तथापि सन्निवेशकल्पनं नेत्राणाम् आनन्दं जनयति। एकतः क्षत्रियस्य धर्मः, अन्यतः अनुपेक्षणीयस्य वस्तुनः दिव्यत्वम्, अपरतः नरेन्द्र-मृगेन्द्रयोः पारतन्त्र्यम्, अन्यतः स्नेहस्य विहननम् एतत् सर्वं एकत्र समायुज्य विषयस्य उपपादनम्, कवेः काव्यरचनायां नैपुण्यं प्रकटयति।

## ९.१.लक्ष्याणि

अहिंसा , सत्यम्,अक्रोधः,त्यागः,शान्तिः, अपैशुनम्।
दया भूतेषु, अलोलुप्त्वम्, मार्दवम् , ह्रीः , अचापलम्।
तेजः, क्षमा, धृतिः, शौचम् , अद्रोहः, नाभिमानता ।

सर्वे एते दिव्यगुणाः। मानवं महनीयं कुर्वन्ति। तेषु मार्दवं विनयगुणः,त्यागः प्राणत्यागाय अपि संसिद्धता , धृतिः दृढता निबद्धता,एते गुणाः सम्पूर्णमानवतायाः विकासाय समर्थाः भवन्ति। मानवं संस्कारसम्पन्नं कुर्वन्ति। क्रियाशीलम् आदधति। कार्यकर्तारं कुर्वन्ति। कार्यसाधकं कुर्वन्ति। कार्यदक्षतां सम्पादयन्ति। तेनैव क्रमेण बुद्धेः विवेकः विस्तारः च सम्पद्यते।एतान् गुणान् अधिगतः पुरुषः परान् प्रति चिन्तयति।सामाजिकः भवति। दिव्यगुणसम्पन्नो भवति। आत्मानं च उद्धरति। दिव्यफलास्वादनसुखम् अनुभवति। देहत्यागायापि संसिद्धः भवति।एवम् अयं पाठ्यांशः मानवस्य जीवने दिव्यगुणानां आधानं प्रति अभ्यासम् अवगाहनां च कल्पयति।एतत् पाठ्यांशस्य अध्ययनेन-

- दिलीपस्य गुरौभक्तिभावं पठितुं प्रभवति।
- दिलीपस्य नन्दिन्याम् अनुकम्पां प्रति भाषितुं समर्थो भवति।
- दिलीपस्य त्यागनिरतिम् अवगन्तुं पारयति।
- दिलीपस्य निबद्धतां पठितुं समर्थो भवति।
- दिलीपस्य क्षात्रधर्मं प्रति लिखितुं प्रभवति।

## ९.२ देहार्पणाय दिलीपस्य विज्ञापनम्

### ९.२.१ सिंहस्य वचसां गुहासु प्रतिध्वननम्

एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या, तमेवार्थमभाषतेव।। ५१।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "मृगेन्द्रेण भाषितं हिमालयगुहासु प्रतिध्वनितम् " इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे ,देहार्पणाय दिलीपस्य विज्ञापनकथाभागे वर्तते।

पदविभागः - एतावत्, उक्त्वा, विरते, मृगेन्द्रे, प्रतिस्वनेन, अस्य, गुहागतेन।
शिलोच्चयः,अपि, क्षितिपालम्,उच्चैः,प्रीत्या,तम्, एव, अर्थम्, अभाषत, इव।।

अन्वयक्रमः - मृगेन्द्रे,एतावत्, उक्त्वा, विरते सति,गुहागतेन, अस्य,प्रतिस्वनेन,शिलोच्चयः अपि, प्रीत्या, तम्, एव, अर्थम्, क्षितिपालम्, उच्चैः, अभाषत, इव,(आसीत्)।

प्रतिपदार्थः - मृगेन्द्रे = सिंहे, एतावत् = इयत्पर्यन्तम् , उक्त्वा = कथयित्वा,विरते = तूष्णीभूते सति, गुहागतेन, गुहा = गह्वरेषु,गतेन =व्याप्तेन,अस्य = सिहस्य वचसः

प्रतिस्वनेन = प्रतिध्वनिना , शिलोच्चयः = हिमवत्पर्वतः, अपि = च, प्रीत्या = सम्मत्या अभीष्टेन, तम् एव = सिहस्य वचसः अर्थम् एव, क्षितिपालम् =राजानम् दिलीपम् , उच्चैः= तारास्वरेण, अभाषत= अवोचत् , इव = ननु , (आसीत्) ।

श्लोकभावः -मृगेन्द्रःदिलीपम् -विचारमूढ इव अवभासि, ऋद्धं राज्यं ऐन्द्रं पदं वदन्ति। कल्याणपरम्पराणाम् भोक्तारं ऊर्जस्वलं आत्मदेहं परिरक्षतु, इत्येवं बोधयति। विरमति ।मृगेन्द्रेण उक्तं गिरिगुहासु प्रतिध्वनति।तच्च प्रतिध्वननं, हिमालयः अपि मृगेन्द्रेण उक्तम् एव,दिलीपस्य श्रेयसम् अभिलषन् प्रीतिभावेन अनूद्य भाषते इव भासते।

व्याकरणांशाः, सन्धयः मृगेन्द्रे; मृग + इन्द्रे (अ + इ = ए) गुणसन्धिः।

अभाषतेव; अभाषत + इव (अ + इ = ए) गुणसन्धिः।

प्रतिस्वनेनास्य; प्रतिस्वनेन + अस्य (अ + अ =आ)सवर्णदीर्घसन्धि

समासाः - मृगेन्द्रे; मृगाणाम् इन्द्रः ,तस्मिन् = षष्ठीतत्पुरुषसमासः।

गुहागतेन; गुहासु गतः (व्याप्तः) तेन = सप्तमीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.मृगेन्द्रः कः ?

## ९.२.२.पुनः विज्ञापनाय दिलीपस्य उपक्रमणम्

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः।। ५२।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः।अस्य विषये 'उपमा कालिदासस्य' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्,सुन्दरञ्च भवति।

श्लोकसन्दर्भः "दिलीपः सिंहस्य देश-काल-पात्रोचितम् अभिभाषणं निराकरोति।स्वधर्माचरणस्य आवश्यकतां विज्ञापयितुं पुनः उद्युक्तः भवति" इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदान नामके द्वितीयसर्गे, देहार्पणाय दिलीपस्य विज्ञापन-कथाभागे वर्तते।

पदविभागः; निशम्य, देवानुचरस्य, वाचम्, मनुष्यदेवः पुनः अपि, उवाच।
धेन्वा, तदध्यासितकातराक्ष्या, निरीक्ष्यमाणः, सुतराम्, दयालुः।।

अन्वयक्रमः; देवानुचरस्य, वाचम्, निशम्य, तदध्यासितकातराक्ष्या, धेन्वा, निरीक्ष्यमाणः, सुतराम्, दयालुः ,मनुष्यदेवः पुनः अपि, उवाच।

प्रतिपदार्थः; देवानुचरस्य,देव = महेश्वरस्य , अनुचरस्य = किंकरस्य सिहस्य, वाचम् = वाणीम्,निशम्य = श्रुत्वा, तदध्यासितकातराक्ष्या, तत् = सिहेन, अध्यासित = आक्रमिततया, कातर= भयम् आप्त,अक्ष्या = नेत्रवत्या, धेन्वा = नन्दिन्या,निरीक्ष्यमाणः = वीक्ष्यमाणः, सुतराम् = अत्यन्तम् , दयालुः = कारुणिकः, मनुष्यदेवः, मनुष्य = प्रजानाम् ,देवः = प्रभुः

दिलीपः, पुनः अपि = भूयः,अपि, उवाच = कथयामास।
श्लोकभावः - सिंहः परमेश्वरस्य सेवकः, कुम्भोदरः। नन्दिनी तस्य पादैः आक्रमिता भवति। भयेन च चकिता भवति। अक्षिणी च कातरे जायेते । दीना दिलीपं पश्यति। दिलीपश्च प्रकामं कारुणिकः, अत एव प्रजानाम् आदरपात्रश्च सन् मनुष्यदेव भवति। प्रकृते- दिलीपःदेश-काल -पात्र-उचितम् मृगेन्द्रस्य मिथ्यापभाषणं शृणोति। सिंहस्य वचांसि न श्रद्दधाति। नन्दिन्याः पालने निबद्धः भवति। सिंहं पुनः एवं विज्ञापयति।
व्याकरणांशाः-सन्धयः -देवानुचरस्य देव + अनुचरस्य (अ + अ = आ) सवर्णदीर्घसन्धिः।
कातराक्ष्या, कातर + अक्ष्या (अ + अ = आ) सवर्णदीर्घसन्धिः।
पुनरप्युवाच पुनरपि + उवाच (इ + उ = य्) यणादेशसन्धिः।
समासाः देवानुचरस्य देवस्य अनुचरः तस्य = षष्ठीतत्पुरुषसमासः।
मनुष्यदेवः मनुष्याणाम् देवः = षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१.देवानुचरः कः ?

२. दयालुः कः ?

## ९.२.३ क्षत्रियस्य महत्त्वम्

क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा।। ५३।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।
श्लोकसन्दर्भः-"क्षत्रियशब्दस्य व्युत्पत्तिम् ,तस्य उदारम् अर्थं च ज्ञापयन् दिलीपः सिहं प्रति एवं वदति"इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,देहार्पणाय दिलीपस्य विज्ञापन-कथाभागे वर्तते।
पदविभागः - क्षतात्, किल, त्रायते, इति, उदग्रः, क्षत्रस्य, शब्दः, भुवनेषु, रूढः।
राज्येन, किम्, तद्विपरीतवृत्तेः, प्राणैः, उपक्रोशमलीमसैः, वा।।
अन्वयक्रमः - उदग्रः, क्षत्रस्य, शब्द, क्षतात्, त्रायत इति,भुवनेषु, रूढः,किल,तद्विपरीतवृत्तेः, उक्रोशमलीमसैः ,प्राणैः, वा, किम्,।
प्रतिपदार्थः - उदग्रः = उन्नतः, क्षत्रस्य =क्षत्रियवर्णस्य,शब्दः = वाचकः, क्षतात् = नाशात्, त्रायते = रक्षति, इति =एवम्, भुनवेषु = लोकेषु,रूढः = प्रसिद्धः, किल = खलु,तद्विपरीतवृत्तेः, तत्=नाशस्य रक्षणात् , विपरीतवृत्तेः,विपरीत = विरुद्ध, वृत्तेः = व्यापारस्य,प्रवर्तनस्य क्षत्रियस्य, राज्येन = राज्यपालनेन, किम् = किम् प्रयोजनम्, उक्रोशमलीमसैः, उक्रोश =

निन्दया,मलीमसैः = मलिनैः, प्राणैः = असुभिः, वा = अपि, किम् प्रयोजनम्, निन्दितस्य सर्वं व्यर्थमिति भावः।

श्लोकभावः -"मृगेन्द्र ! कुम्भोदर! क्षत्रियशब्दः उदात्तः उत्तमः महोन्नतश्च। क्षतः नाम नाशः।त्रायते इति त्रः।क्षतात् नाशात् त्रायते इति व्युत्पत्त्या निष्फन्नः क्षात्रः = क्षत्रियः इति शब्दः आपन्नरक्षकः इत्यर्थपरतया जगत्प्रसिद्धः। प्राणिनम् असंरक्ष्य, गुरोः आदेशनम् अपरिपाल्य, जुगुप्सितैः एतैः प्राणैः किं प्रयोजनम्।आपन्नम् असंरक्ष्य तद्विपरीततया व्यवहृत्य अहं क्षत्रियः कथं स्याम् क्षत्रियविपरीतवृत्तेः मम ,राज्येन किं प्रयोजनम्। अतः मद्देहस्य स्वीकरणेन नन्दिनीं विसृजतु " इति दिलीपः मृगेन्द्रं विज्ञापयति।

व्याकरणांशाः -सन्धयः- इत्युदग्रः; इति + उदग्रः(इ + उ = य्) यणादेशसन्धिः।

समासाः - उपक्रोशमलीमसैः; उपक्रोशेन मलीमसाः, तैः = तृतीयातत्पुरुषसमासः।

कोशः - उपक्रोशः ;उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे (अमरकोशः)

**स्वावलोकनप्रश्नाः -**

१.क्षत्रियशब्दः कीदृशः ?

२. क्षत्रियशब्दः भुवनेषु कथं रूढः ?

## ९.२.४ नन्दिन्यसमानतायाः विज्ञापनम्

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम्।
इमामनूनां सुरभेरवेहि रुद्रौजसा, तु प्रहृतं त्वयास्याम्।। ५४।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः -"नन्दिनी असमाना" इति दिलीपः मृगेन्द्रं कथयति इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे देहार्पणाय दिलीपस्य विज्ञापनकथाभागे वर्तते।

पदविभागः - कथम्, न ,शक्यः, अनुनयः,महर्षेः, विश्राणनात्, च, अन्यपयस्विनीनाम्।
इमाम्, अनूनाम्, सुरभेः, अवेहि, रुद्रौजसा, तु ,प्रहृतम्, त्वया, अस्याम्।।५४।।

अन्वयक्रमः -महर्षेः, अनुनयः, च अन्यपयस्विनीनाम्,विश्राणनात्,कथं,नु, शक्यः, इमाम्, सुरभेःअनूनम्, अवेहि, अस्याम् , त्वया, प्रहृतम्,तु, रुद्रौजसा, स्यात्।

प्रतिपदार्थः - महर्षेः = वशिष्ठस्य, अनुनयः = कोपोपशमः, च = अपि, अन्यपयस्विनीनाम्, अन्य = इतरेषाम्,पयस्विनीनाम् = प्रशस्तक्षीरदायिनाम्, विश्राणनात् = समर्पणात्, कथम् नु= केन प्रकारेण, शक्यः = कर्तुम् योग्यः, न शक्यः इत्यर्थः। इमाम् = नन्दिनीधेनुम्, सुरभेः = कामधेनोः,अनूनाम् = समानाम्,अवेहि = जानीहि,(त्वमिति शेषः), अस्याम्= एतस्याम् नन्दिन्याम् , त्वया = कुम्भोदरेण सिंहेन, प्रहृतम् तु = आक्रमणम् तु, रुद्रौजसा, रुद्रस्य =महेश्वरस्य

,ओजसा=प्रभावेण (स्यात् = कृतम् भवेत् )।

श्लोकभावः - "मृगेन्द्र! कुम्भोदर !वसिष्ठः अस्माकं कुलगुरुः,तस्य आदेशनं शिरोधार्यम्। स नन्दिन्याः व्रचाचरणम्,तस्याः पालनं च आदिष्टवान्। मया अनुष्ठातव्यम् एव।अन्यथा गुरोः आदेशभङ्गः ,अपराधः भवति । तत् दण्डनाय कल्पते । केटिशः अन्याः गावः नन्दिन्या कथं समानाः भवन्ति? इयं कामधेनोः सन्ततिः, इमाम् कामधेनोः अनूनां दिव्याम् अवेहि। नन्दिन्याम् अस्याम् तव उत्पतनन्तु रुद्रमहिम्ना जातं स्यात्,भवान् रुद्रस्य किंकरः खलु। इतरः कोपि नन्दिनीं मनस्यपि प्रधर्षयितुं न शक्नोति। तस्मात् दिव्याम् एनाम् विमुञ्चतु" इति दिलीपः मृगेन्द्रस्य नन्दिन्याः दिव्यत्वं विज्ञापयति।

व्याकरणांशाः -सन्धयः; रुद्रौजसा; रुद्र + ओजसा(अ + ओ = औ) वृद्धिसन्धिः।

त्वयास्याम्; त्वया + अस्याम्(आ + अ = आ) सवर्णदीर्घसन्धिः।

समासाः; अनूनाम् ; न ऊना, ताम् = नञ्तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.सुरभेः समाना का ?

२. सिंहः नन्दिन्याम् कथम् उत्पतितः स्यात् ?

## ९.२.५ देहार्पणेन प्रयोजनद्वयस्य साधनम्

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः।
न पारणा स्याद्विहता तवैवम्, भवेदलुप्तश्च मुनेः क्रियाऽर्थः।। ५५।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"मत् देहार्पणं कार्यद्वयं साधयति इति दिलीपः सिहं विज्ञापयति"इत्यंशंनिरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे देहार्पणाय दिलीपस्य विज्ञापनकथा-भागे वर्तते।

पदविभागः; सा, इयम्,स्वदेहार्पणनिष्क्रयेण, न्याय्या, मया, मोचयितुम् , भवत्तः।
न ,पारणा,स्यात् ,विहता , तव, एवम् भवेत्, अलुप्तः,च, मुनेः, क्रियार्थः।।

अन्वयक्रमः; सा, इयम्,मया,स्वदेहार्पणनिष्क्रयेण, भवत्तः,मोचयितुम्,न्याय्या,एवम्, तव, पराणा, विहता, न, स्यात्, मुनेः, क्रियार्थः, च अलुप्तः, भवेत्।

प्रतिपदार्थः-सा = सुरभेः अनूना , इयम् = एषा नन्दिनी, मया = क्षत्रियेण दिलीपेन, स्वदेहार्पणनिष्क्रयेण,स्व = निजस्य, देह = शरीरस्य, अर्पण =समर्पणस्य,निष्क्रयेण = विनिमयेन,(Exchange) भवत्तः = सिहात् त्वत्तः कुम्भोदरतः,मोचयितुम् = विमोचयितुम् , न्याय्या = युक्ता, एवम् =एवम् कृते सति, तव = सिंहस्य, भवतः कुम्भोदरस्य,पारणा =

भोजनम्, विहता =नष्टम् , न = न, स्यात् =भवेत्, मुनेः = महर्षेः,वसिष्ठस्य,क्रियार्थः = यज्ञ-याग-होमादिप्रयोजनम्, अलुप्तः = अनष्टः,भवेत्=स्यात्,

श्लोकभावः - "मृगेन्द्र ! आहारविषये परमेश्वरेण प्रदिष्टकलः अङ्कागतसत्त्वः भवता नैव परिहरणीयः।तव तु आहारः आवश्यकः।तव आहारश्च नैव अपहरणीयः। नन्दिनी वसिष्ठस्य यागसाधनम्, यज्ञ - यागादीनाम् देवकार्याणाम्, श्राद्धीदीनां पितृकार्याणाम्, अतिथीनाम्,अभ्यागतानां, च प्रयोजनानि संरक्षति। गुरोः आदेशेन अस्याः व्रताचरणपरः भवामि। अस्याः संरक्षणम् मम विधिः। मृगेन्द्र ! यथा तव आहारः अपहृतः न भवेत् , मुनेः क्रियार्थश्च अलुप्तः भवेत् तथा उभयप्रयोजनसाधकतया मदीयदेहस्य अर्पणं समचितम्। अहम् अपि समीपागतजन्तुः, परमेश्वरेण प्रदिष्टकालः एव। अतः मदीयदेहार्पणनिष्क्रयेण भवतः इयं नन्दिनी मोचयितुं युक्ता" इति दिलीपः स्वदेहर्पणस्य समुचितत्वं मृगेन्द्रस्य विज्ञापयति।

व्याकरणांशाः -सन्धयः -सेयम् सा + इयम् (आ + इ = ए) गुणसन्धिः।

तवैवम् तव + एवम्(अ + ए = ऐ) वृद्धिसन्धिः।

समासाः-अलुप्तः न लुप्तः = नञ्तत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१.दिलीपस्य देहार्पणेन किम् किम् साधितं भवति ?

२. सेयं (सा इयम्) स्वदेहार्पणनिष्क्रयेण ...अत्र सा का ?

## ९.२.६ बाध्यतायाः निर्वर्तनम्

भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ।
स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्य, रक्ष्यं स्वयमक्षतेन।। ५६।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः-"सेवकस्य बाध्यता गरीयसी"इति दिलीपं सिंहं विज्ञापयति इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे देहार्पणाय दिलीपस्य विज्ञापन-कथाभागे वर्तते।

पदविभागः - भवान्, अपि, इद्म्, परवान्, अवैति, महान् ,हि, यत्नः, तव, देवदारौ।
स्थातुम्, नियोक्तुः, न, शक्यम्, अग्रे, विनाश्य,रक्ष्यम्, स्वयम्, अक्षतेन।।

अन्वयक्रमः - परवान्, भवान्, अपि, इदम्, अवैति, हि, तव, दोवदारौ,महान्, यत्नः। रक्ष्यम्, विनाश्य, स्वयम्, अक्षतेन, नियोक्तुः, अग्रे, स्थातुम्, शक्यम्, न हि।

प्रतिपदार्थः -परवान् = पराधीनः,(अस्वतन्त्रः)भवान् = कुम्भोदरः सिंहोऽपि,इदम् = वक्ष्यमाणम्,

अवैति = जानाति, हि = यतः, तव = भवतः कुम्भोदरस्य, देवदारौ = देवदारुवृक्षविषये,महान्= अतिशयितः, यत्नः = प्रयासः, (महता प्रयत्नेन रक्ष्यते ,गुरुतरबाध्यता विद्यते इत्यर्थः), रक्ष्यम्= पालनीयम् वस्तु,विनाश्य = विनाशं प्रापयित्वा,स्वयम् = आत्मना,अक्षतेन= व्रणरहितेन, नियोक्तुः= स्वामिनः,अग्रे=पुरतः, स्थातुम्=स्थितिं कर्तुम्, शक्यम् = योग्यम्,न हि = न भवति हि।

श्लोकभावः - मृगेन्द्र ! भवान् अष्टमूर्तेः किंकरः, अहं वसिष्ठस्य शिष्यः ।भवता परमेश्वरेण प्रदिष्टं पलनीयम्। मया वसिष्ठेन आदिष्टं संरक्षणीयम्। भवतः देवदारुवृक्षस्य परिरक्षणविषये बाध्यता महती। मम च नन्दिन्याः संरक्षणे बाध्यता च महती। एवं परतन्त्रयोः आवयोः उभयोः बाध्यताः , भाराः च समानाः। एतान् सर्वान् भवान् अपि सम्यक् जानाति। क्लिष्टकाले एव खलु सहकारः अपेक्षते।

अपि च स्वयम् अव्रणितस्सन् ,रक्ष्यं अपरिपाल्य ,नियोक्तुः अग्रेः भवनम्,तस्य क्रोधाय कल्पते। तेषां अग्रे स्थित्वा असमर्थतायाः निवेदनं उदात्तचरितानाम् अस्माकम् अप्रतिष्ठायै भवति" इति दिलीपः ,तयोः अस्वातन्त्र्यं मृगेन्द्राय विज्ञापयति।

व्याकरणांशाः -सन्धयः अवैति; अव + एति (अ + ए = ऐ) वृद्धिसन्धिः।

यत्नस्तव; यत्नः + तव (विसर्गः,अः + त् = स्) विसर्गसन्धिः।

समासाः - अक्षतेन; न क्षतेन = नञ् तत्पुरुषसमासः।

कोशः - हि; हि हेतौ अवधारणे (अमरकोशः)

**स्वावलोकनप्रश्नाः -**

१."यत्नः" इत्यस्य अर्थः कः ?

२. "भवान्,अपि इद्म् परवान्", अत्र "भवान्" कः ?

## ९.२.७ भौतिकेषु दिव्यानाम् अनारस्थाकथनम्

किमप्यहिंस्यस्तव चेन्मतोऽहं यशः शरीरे भव मे दयालुः।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु।। ५७।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"दिव्यानां भौतिकपदार्थेषु अनासक्तिः" इति दिलीपः मृगेन्द्रं विज्ञापयति इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे ,देहार्पणाय दिलीपस्य विज्ञापनकथाभागे वर्तते।

पदविभागः; किम्, अपि, अहिंस्यः, तव,चेत्, मतः, अहम्, यशश्शरीरे, भव, मे, दयालुः।
एकान्तविध्वंसिषु, मद्विधानाम्, पिण्डेषु, अनास्था, खलु, भौतिकेषु।।

अन्वयक्रमः; किमपि, अहं, तव, अहिंस्यः, मतः, चेत्, मे, यशश्शरीरे ,दयालुः, भव, मद्विधानाम्, एकान्तविध्वंसिषु,भौतिकेषु,पिण्डेषु, अनास्था, खलु।

प्रतिपदार्थः - किमपि = अथ वा, अहम् =दिलीपः, तव = भवतः कुम्भोदरस्य सिंहस्य,अहिंस्यः= अवध्यः, मतः = भावितः,चेत् = यदि, मे = मम दिलीपस्य, यशश्शरीरे ,यशस् = कीर्ति, शरीरे =देहे ,दयालुः = कारुणिकः, भव = भवतात्, एकान्तविध्वंसिषु, एकान्त =नियमेन अवश्यम् ,विध्वंसिषु = नाशशीलिषु,मद्विधानाम् = मत्सदृशानाम् राज्ञाम्, भौतिकेषु = पञ्चभूतात्मकेषु, पिण्डेषु = शरीरेषु, अनास्था खलु = अनपेक्षा प्रसिद्धिः हि।

श्लोकभावः - " मृगेन्द्र ! भवान् दयावान् -परेषां हिंसनम् तव नाभिमतम्। अयं च मदीयः देहः भौतिकः, पञ्चभूतैः (पृथिवी -अप्- तेजो-वायु-आकाशैः) आरचितः। भौतिकः अयं देहः अहिंस्यत्वेन भवतः न चेत् सम्मतः, तदा मदीयेन यशश्शरीरेण उदरवृत्तिं पूरयितुं प्रसीद। तथाहि - मृगेन्द्र ! भवान् परमेश्वरस्य किङ्करः खलु दिव्यः,परमेश्वरेण दिव्यः सम्बन्धः विद्यते। अवश्यं विध्वंसी, नष्ट शीली, अनित्यः पदार्थः।दिव्यसम्बन्धिनाम् भवादृशानां, अवश्यं विध्वंसिषु मादृशानां भौतिकेषु पिण्डेषु अनिष्टता सहजा एव खलु" इति दिलीपः मृगेन्द्रस्य यशश्शरीरग्रहणं मार्गान्तरम् अपि सूचयति।

सन्धयः -किमप्यहिंस्यः; किमपि + अहिंस्यः(इ + अ = य्)यणादेशसन्धिः।
पिण्डेष्वनास्था; पिण्डेषु + अनास्था (उ + अ = व्)यणादेशसन्धिः।
यशश्शरीरे; यशस् + शरीरे (स् + श् = श्) श्चुत्वसन्धिः।
चेन्मतः; चेत् + मतः (त् + म् = न् ) अनुनासिकसन्धिः।

समासाः -अनास्था; न आस्था = नञ्ततपुरुषसमासः।

**स्वावलोकनप्रश्नाः -**

१. भौतिकाः (पदार्थाः) कीदृशाः ?

२. "यशः शरीरे भव मे दयालुः" अत्र "मे" शब्दः कं सम्बन्धयति?।

## ९.२.८ स्नेहस्य रक्षणम्

सम्बन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनान्ते।
तद्भूतनाथानुग ! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम्।। ५८।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्,सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"स्नेहितस्य प्रार्थना माननीया"इति दिलीपः सिहं विज्ञापयति इत्यंशंनिरूपयन्

अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, देहार्पणाय दिलीपस्य विज्ञापन -कथाभागे वर्तते।

पदविभागः; सम्बन्धम्, आभाषणपूर्वम्, आहुः, वृत्तः, सः, नौ, संगतयोः, वनान्ते।
तद्, भूतनाथानुग! न, अर्हसि, त्वम्, सम्बन्धिनः, मे, प्रणयम्, विहन्तुम्।।

अन्वयक्रमः; सम्बन्धम्, आभाषणपूर्वम्, आहुः, सः , वनान्ते, सङ्गतयोः, नौ, वृत्तम्,तद्,
भूतनाथानुग! त्वम्, सम्बन्धिनः, मे, प्रणयम्, विहन्तुम् ,न ,अर्हसि,।

प्रतिपदार्थः; सम्बन्धम् = सख्यम् मित्रता,आभाषणपूर्वम्, आभाषण = आलापन, पूर्वम् = पुरस्सरं जायमानम्, आहुः = कथयन्ति, सः =आलापनपुरस्सरः सम्बन्धः, वनान्ते = अरण्यमध्ये, सङ्गतयोः = मिलितयोः, नौ = आवयोः, वृत्तः = जातः, तत् = तस्मात् कारणात्,भूतनाथानुग!= परमेश्वरानुचर, सम्बन्धिनः = मित्रस्य, मे = दिलीपस्य, प्रणयम् = प्रार्थनाम्, विहन्तुम् = नाशयितुम्, न अर्हसि = न शक्यः असि।

श्लोकभावः - अत्र सम्बन्ध शब्दस्य समीचीनः बन्धः सम्बन्धः स्नेहः इत्यर्थः। "मृगेन्द्र ! स्नेहः सर्वदा सम्भाषणपूर्वकः भवति। तत् च वनमध्ये समागतयोः आवयोः जातम्। इदानीं आवाम् स्नेहितौ। मृगेन्द्र ! तव नियोजकः भूतानां नाथः परमेश्वर; भूतेषु स्नेहवर्ती, भवान् च तस्य अनुगः सेवकः । अवश्यं भवानपि अत्यन्तं स्नेहशीली स्याः।अतः मृगेन्द्र ! स्नेहितस्य मम प्रार्थनां निराकर्तुं नार्हसि " इति देहार्पणेन नन्दिन्याः विमोचनाय दिलीपः मृगेन्द्रं विज्ञापयति।

व्याकरणांशाः -सन्धयः वनान्ते; वन + अन्ते (अ + अ = आ)सवर्णदीर्घसन्धिः।
नार्हसि; न + अर्हसि (अ + अ = आ)सवर्णदीर्घसन्धिः।
समासाः - भूतनाथ...; भूतानाम् नाथः = षष्ठीतत्पुरुषसमासः।
वनान्ते; वनस्य अन्ते = षष्ठीतत्पुरुषसमासः।
कोशः - प्रणयः; प्रणयास्त्वमी विस्रम्भ याञ्चा प्रेमाणः (अमरकोशः)

**स्वावलोकनप्रश्नाः -**

१. सम्बन्धं कथम् आहुः ?

२. "वृत्तः स नौ संगतयोर्वनान्ते" अत्र "नौ" कौ ?

## ९.२.९ देहस्य अर्पणम्

तथेति गां मुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य।। ५९।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य

**रघुवंशः द्वितीयसर्गः**

कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; - " दिलीपः स्वदेहं मृगेन्द्राय समर्पयति " इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे देहार्पणाय दिलीपस्य विज्ञापनकथाभागे वर्तते।

पदविभागः; तथा, इति, गाम्, मुक्तवते, दिलीपः, सद्यः, प्रतिष्टम्भविमुक्तबाहुः।
सः. न्यस्तशस्त्रः, हरये,स्वदेहम्, उपानयत्, पिण्डम्, इव, आमिषस्य।।

अन्वयक्रमः; तथा, इति, गाम्, मुक्तवते, दिलीपः, हरये, सद्यः, प्रतिष्टम्भविमुक्तबाहुः,
सः. न्यस्तशस्त्रः, स्वदेहम्,आमिषस्य,पिण्डम्, इव,उपानयत्।

प्रतिपदार्थः; तथा = बाढम् , इति = एवम्, गाम् = नन्दिनीम्, मुक्तवते = त्यक्तवते,हरये = सिहाय,सद्यः = तत्क्षणम्, प्रतिष्टम्भविमुक्तबाहुः,प्रतिष्टम्भ = प्रतिबन्धात्, विमुक्त = त्यक्त, बाहुः = भुजः, सः = राजा दिलीपः, न्यस्तशस्त्रः,न्यस्त = परित्यक्त, शस्त्रः = शरः,(सन्) स्वदेहम्, स्व = निजस्य ,देहम्=शरीरम्, आमिषस्य = मांसस्य, पिण्डम् = कबलम्, इव = यथा, उपानयत् = उपाहरत् ,समर्पितवान्।

श्लोकभावः; मृगेन्द्रः दिलीपस्य उपपादनापद्धतेः हेतुबद्धतायाश्च प्रीतः भवति। "तथा" इति च दीलीपं वदति। दिलीपः देहस्य अर्पणाय संसिद्धः भवति।सिंहः नन्दिनीं विसृजति। अनुपदमेव प्रतिष्टम्भात् बाहुः वियुक्तः भवति।दिलीपःअस्त्रं सन्यस्यति।अनन्तरं मांसस्य पिण्डमिव स्वदेहं विधेयतापुरस्सरं सिंहाय समर्पयति।अत्र दिलीपस्य स्वधर्मानुष्ठानतत्परता सुव्यक्ता भवति।

सन्धयः - तथेति; तथा + इति (आ + इ = ए) गुणसन्धिः।
इवामिषस्य; इव + आमिषस्य (अ + आ = आ) सवर्णदीर्घसन्धिः।

समासाः - प्रतिष्टम्भविमुक्तः ; प्रतिष्टम्भात् विमुक्तः = पञ्चमीतत्पुरुषसमासः।
स्वदेहम्; स्वस्य देहम् = षष्ठीतत्पुरुषसमासः।
न्यस्तशस्त्रः; न्यस्तं शस्त्रं येन सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः -**

१.स्वदेहम् अर्पयितुम् कः उद्युक्तवान् ?

२.सिंहः कां मुक्तवान् ?

## ९.३.उपसंहारः

एवम् अत्र क्षत्रियशब्दस्य अगाथम् अर्थम् निरूपितम्।नन्दिन्याः दिव्यत्वं संसूचितम्। स्वीयदेहत्यगेन कुम्भोदरस्य पारणा ,वसिष्ठस्य देवता-पितृ-अतिथि-क्रियार्थता इत्येतत् उभयार्थसाधकत्वम् विज्ञापितम्।अनुचरयोः नियोगानुष्ठाने साधकबाधकानाम् अपनयनाय अन्योन्यसहकारस्य बोधनम् सूचितम्। भाषणपूर्वकमेव स्नेहस्सम्पद्यते इति,सोपि कार्यसाधनाय आवश्यक इति च ज्ञापितम्। एतत् सर्वम् दिलीपस्य निबद्धताम् ,उत्तमत्वम्,उदारताम् स्वधर्मे= स्वधर्मानुष्ठाने निधनमपि श्रेय एव इति विधानं च स्फुटीकुर्वन्ति ।एवम् दिलीपम् आदर्शपुरुषत्वेन चित्रणे कवेः कौशलं च सुव्यक्तं भवति।

## ९.४.अभ्यासः

श्लोकद्वयं व्याख्यात -

(१). एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रत्या, तमेवार्थमभाषतेव।।

(२).तथेति गां मुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः।
सन्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य।।

* * *

# अंशः -X;   नन्दिन्याः अनुग्रहः

संरचना

१०.०. परिचयः
१०.१. लक्ष्याणि
१०.२.नन्दिन्याः अनुग्रहः
१०.२.१ विद्याधराणां पुष्पवृष्टिः
१०.२.२ नन्दिन्याः अनुग्रहभाषणम्
१०.२.३ परीक्षितोऽसि इति नन्दिन्याः कथनम्
१०.२.४ वरस्य याचनाय नन्दिन्याः आदेशनम्
१०.२.५ पुत्रसन्ततेः याचनम्
१०.२.६ पयः पानाय नन्दिन्याः समादेशनम्
१०.२.७ वत्सहुतावशेषस्य  पयसः पानाय दिलीपस्य विज्ञापनम्
१०.३  उपसंहारः
१०.४  अभ्यासः

## १०.०. परिचयः

नन्दिन्याः अनुग्रहः इत्ययं पाठ्यांशः रघुवंशस्य द्वितीयसर्गे वर्तते। अस्यैव कथापरतया नन्दिनीवरप्रदानम् इत्यपि च व्यवहारः अस्ति। अयं पाठ्यांशः षष्ठितमश्लोकतः आरभ्य षट्षष्ठि तमश्लोकं यावत् (६०-६६) परिमितः। अस्मिन् प्रधानतया नन्दिन्याः अनुग्रहणविधानं वर्णितम्। दिलीपस्य उपरि विद्याधराणां पुष्पवर्षणम् , दिलीपं प्रति नन्दिन्याः अनुग्रहभाषणम्, वरस्य याचनाय नन्दिन्याः चोदनम्, पुत्रसन्ततेः याचनम् , पयः पानाय नन्दिन्याः समादेशनम्, वत्सहुतावशेषस्य  पयसः पानाय दिलीपस्य विज्ञापनम् एते अंशाः अत्र निरूपिताः।

## १०.१. लक्ष्याणि

पृथिवी-अप्-तेजो- वायु-आकाशानि पञ्च भूतानि, बुद्धि-मनो-अहंकाराः त्रयश्च सम्भूय प्रकृतिः अष्टधा भवति। जगत्सर्वम् एतदायत्तमेव।मानवः प्रथमं प्रकृतिं पश्येत्।परिशीलयेत्।प्रकृति भागान् विनिश्चयेत्। जगति प्रति वस्तु , प्रतिप्राणी ,प्रति पदार्थं च प्रकृतिविकार एव इति अव गच्छेत् । वस्तु सेवनम्, प्राणिसेवनम् ,पदार्थसेवनम् च प्रकृतिसेवनम्  इति चिन्तयेच्च। वस्तुषु उपकरणत्वबुद्धिः, प्राणिषु अनुकम्पाबुद्धिः, पदार्थेषु ओषधित्वबुद्धिः च आवश्यकी। एवं बुद्धिम् आपद्य मानवः सगुणां साकारां च प्रकृतिं समाराधयेत्। समाराधनं नाम सदुपयोगः, सद्विनियोग्च। प्रकृतेः सदुपयोगः,सद्विनियोग्च मानवं बाध्यतापूर्णं करोति। उपयोगे विनियोगे च कृतज्ञतापूर्णं प्रवर्तयति।

मानवः यावत् प्रकृतौ कृतज्ञताशीलः तावत् प्रकृतिः येन केनचिद्व्याजेन तस्य अभीष्टसाधने अनुकूलं प्रवर्तते। प्रकृते सुदक्षिणा-दिलीपौ गुरौ भक्त्या प्रवर्त्य, नन्दिन्यां श्रद्धया अनुकम्पया च प्रवर्त्य त्रिकरणशुद्ध्या प्रकृतिम् आराधितवन्तौ। तेन च समाराधनेन तुष्टा नन्दिनी सुदक्षिणा दिलीपयोः पुत्रसन्ततिं प्रसादितवती। एवम् अस्माभिः समाराधिता प्रकृतिः अस्मान् प्रसादयति इत्येतदंशबोधकः अयं पाठ्यांशः। अस्य पाठ्यांशस्य अध्ययनेन-

- नन्दिन्याःअनुग्रहं ज्ञातुं प्रभवति।
- नन्दिन्याः प्रभवं भाषितुं समर्थो भवति।
- दिलीपस्य पुत्रसन्सतिं प्रत्यभ्यर्थनं लिखितुं पारयति।
- स्वस्याः क्षीरपानाय नन्दिन्याः आदेशनं पठितुं प्रभवति।
- दिलीपस्य मर्यादाक्रमपालनं प्रति परिचयः सम्पादितो भवति।

## १०.२ नन्दिन्याः अनुग्रहः (६०-६६)

### १०.२.१ विद्याधराणां पुष्पवृष्टिः

तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता।। ६०।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "दिलीपस्य उपरि पुष्पवृष्टिः पतति" इत्यंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,नन्दिन्यनुग्रह-कथाभागे वर्तते।

पदविभागः - तस्मिन् क्षणे, पालयितुः, प्रजानाम्, उत्पश्यतः, सिंहनिपातम्, उग्रम्,। अवाङ्मुखस्य, उपरि, पुष्पवृष्टिः, पपात, विद्याधरहस्तमुक्ता।।

अन्वयक्रमः - तस्मिन् क्षणे,उग्रम्, सिंहनिपातम्, उत्पश्यतः,अवाङ्मुखस्य प्रजानाम्, पालयितुः, उपरि, विद्याधरहस्तमुक्ता, पुष्पवृष्टिः, पपात,।

प्रतिपदार्थः - तस्मिन् = पूर्वोक्ते, क्षणे = मुहूर्ते, (सिंहाय स्वदेहार्पणकाले), उग्रम् = उत्कटम्, भयंकरम्,सिंहस्य = केसरिणः, निपातम् =निपतनम्, उत्पश्यतः=प्रतीक्षमाणस्य, अवाङ्मुखस्य= अधोमुखस्य , प्राजानाम् = जनानाम्, पालयितुः = रक्षितुः दिलीपस्य, उपरि = उपरिष्टात्, विद्याधरहस्तमुक्ता, विद्याधर=देवयोनिविशेषाणाम्, हस्त =करेभ्यः, मुक्ता = पतिता,पुष्पाणाम्= कुसुमानाम्, वृष्टिः=वर्षं,पपात= अपतत्।

श्लोकभावः - स्वदेहस्य अर्पणाय दिलीपः मृगेन्द्रं बहुधा प्रार्थयति। मृगेन्द्रः अङ्गीकरोति। दिलीपः विधेयपुरस्सरं स्वदेहं मांसस्य पिण्डम् इव सिंहाय अर्पयति। बाहून् बध्नाति। अधोमुखस्सन् सिंहस्य पुरतः तिष्ठति। सादरं सश्रद्धं सिंहस्य उत्पतनं प्रतीक्षते।विद्याधराः सुरगणेषु अन्यतमाः। दिलीपस्य धर्माचरणाय विद्याधराः प्रीताः भवन्ति।तस्मिन् एव क्षणे पुष्पाणि किरन्ति। तानि

सिंहस्य पतनं प्रतीक्षतः दिलीपस्य उपरि पतन्ति। दिलीपः ससम्भ्रमम् आश्चर्यम् एति।आनन्दभरितः भवति।

व्याकरणांशाः -समासाः - सिंहनिपातः; सिंहस्य निपातः = षष्ठीतत्पुरुषसमासः।

...हस्तमुक्ता; हस्तेभ्यः मुक्ता = पञ्चमीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः;**

१. प्रजानां पालकः कः ?

२. दिलीपस्य उपरि केषां पुष्पवृष्टिः पपात ?

## १०.२.२ नन्दिन्याः अनुग्रहभाषणम्

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ।। ६१।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "दिलीपः उत्पतनशीलस्य सिंहस्य स्थाने नन्दिनीं दृष्टवान्" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,नन्दिन्यनुग्रहकथाभागे वर्तते।

पदविभागः - उत्तिष्ठ, वत्स, इति, अमृतायमानम्, वचः, निशम्य, उत्थितम्, उत्थितः, सन्।
ददर्श, राजा, जननीम् इव, स्वाम्, गाम्, अग्रतः, प्रस्रविणीम्, न सिंहम्।।

अन्वयक्रमः - राजा, अमृतायमानम्, उत्थितम्, वत्स,उत्तिष्ठ,इति, वचः, निशम्य, उत्थितः, सन्, अग्रतः, प्रस्रविणीं, गाम्, स्वाम्, जननीम्,इव, ददर्श,सिंहम् ,न (ददर्श)।

प्रतिपदार्थः -राजा = दिलीपः,अमृतायमानम् = पीयूषमाणम्, उत्थितम् = उत्पन्नम्, हे वत्स = हे पुत्र,उत्तिष्ठ= उत्थितो भव, इति = इत्येव, वचः = वचनं, निशम्य = श्रुत्वा, उत्थितः = शिरः उत्क्षिप्य अवलोकितस्सन्,अग्रतः = पुरतः,प्रस्रविणीं = क्षीरदयिनीम्, गाम् = नन्दिनीम्, स्वाम् = आत्मीयाम्,जननीम् = मातरम्, इव = यथा, ददर्श = अपश्यत्।सिहम् = केसरिणम्, न = न हि ददर्श।

श्लोकभावः - अकस्मात् आकाशात् पुष्पवृष्टिः पतति। दिलीपःपुष्पवर्षे सिक्तः भवति। आश्चर्यचकितो भवति।संभ्रमम् एति। अत्रानतरे 'वत्स !उत्तिष्ठ 'इति वचः आकाशत् प्रसरति भवति। तच्च दिलीपस्य श्रवणसुभगं भवति।तस्य अमृतास्वादनसुखं जनयति। आश्चर्येण शिरः उत्क्षिप्य पश्यति।तत्र उत्पतनस्य सिंहस्य स्थाने स्थितां प्रसन्नां वात्सल्यपूर्णाम् एकां नन्दिनीम् एव पश्यति, मृगेन्द्रः तु तत्र न भवति।तदा नन्दिनी स्वमातृमूर्तिः इव दिलीपस्य अवभासे।तेन दिलीपः आश्चर्यम् आनन्दम् च अनुभवति।

व्याकरणांशाः;सन्धयः;वत्सेति; वत्स + इति (अ + इ = ए) गुणसन्धिः।
निशम्योत्थितम्;निशम्य +उत्थितम् (अ + उ = ओ) गुणसन्धिः।
इत्यमृताय...;इति+ अमृतायामान (इ + अ = य्)यणादेशसन्धिः।

| |
|---|
| **स्वावलोकनप्रश्नाः -** |
| १.नन्दिन्याः वचनम् कथं वर्तते ? |
| २. दिलीपः नन्दिनीं कथं ददर्श ? |

## १०.२.३.परीक्षितोसि इति नन्दिन्याः कथनम्

तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्यहिंस्राः।। ६२।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः -"ऋषिप्रभावात् ,मां तर्जयितुं यमः अपि न प्रभवति" इति नन्दिनी दिलीपं ज्ञापयति इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, नन्दिन्यनुग्रह- कथाभागे वर्तते।

पदविभागः - तम्, विस्मितम्, धेनुः उवाच, साधो, मायाम्, मया, उद्भाव्य, परीक्षितः ,असि।
ऋषिप्रभावात्, मयि, न, अन्तकः,अपि, प्रभुः, प्रहर्तुम्, किमुत, अन्यहिंस्राः।।

अन्वयक्रमः - विस्मितम्,तम्, धेनुः, साधो,मया,मायाम्,उद्भाव्य, परीक्षितः असि।
ऋषिप्रभावात्,मयि,अन्तकः,अपि,प्रहर्तुम्,न,प्रभुः,अन्यहिंस्राः,किमुत(इति) उवाच।

प्रतिपदार्थः - विस्मितम् = आश्चर्यचकितम्, तम् = दिलीपम्, धेनुः = नन्दिनी,साधो = हे उचितप्रवर्तन, मया = नन्दिन्या, मायाम् = कृत्रिमाम् अवस्थाम् ,उद्भाव्य = कल्पयित्वा, परीक्षितः = परिशीलितः, असि = भवसि।ऋषेः =वसिष्ठस्य, प्रभावात् = महिमाकारणतः, मयि = धेनौ नन्दिन्याम्, अन्तकः = यमः, अपि = च,प्रहर्तुम्=हन्तुम्, प्रभुः = समर्थः, न = न भवति। अन्य = अपरे, हिंस्राः = घातुका इति,किमुत = न समर्थाः इत्यस्य वचनीयता एव नास्ति खलु ,(इति = एवं रूपेण) , उवाच = जगाद।

श्लोकभावः-दिलीपः स्वस्मिन् पुष्पवृष्टिं पश्यति।'वत्स ! उत्तिष्ठ ' इति अमृतायमानं नन्दिन्याः वचः शृणोति। आश्चर्यचकितः भवति। एवं आश्चर्यचकितं दिलीपं नन्दिनी 'साधो! दिलीप! मायाम् उद्भाव्य त्वां परीक्षितवती। तावदेव। तव भयं मास्तु।अत्र मम किमपि प्रमादः नास्ति। भयं अपि न विद्यते। भगवतो वसिष्ठस्य प्रभावतः मृत्युः अपि मां तर्जयितुं न शक्नोति। किं पुनः एते सिंह-व्याघ्रादयः क्रूरजन्तवः। मम भयं नास्ति, भवान् स्वस्थचित्तः

भवतु 'इति नन्दिनी दिलीपं समाश्वासयति।

व्याकरणांशाः;सन्धयः;अन्तकोऽपि;अन्तकः+ अपि (अः+ अ = ओ ऽ)विसर्ग/पूर्वरूपसन्धिः।
परीक्षितोऽसि; परीक्षितः + असि (अः + अ = ओ ऽ)विसर्ग/पूर्वरूपसन्धिः।
समासाः; ऋषिप्रभावः ऋषेः प्रभावः = षष्ठीतत्पुरुषसमासः।
कोशः - किमुत बलवत् सुष्ठु किमुत स्वत्यतीव च निर्भरः (अमरकोशः)

| स्वावलोकनप्रश्नाः |
|---|
| १.(वसिष्ठस्य) ऋषेः प्रभावः कीदृशः ? |

## १०.२.४ वरस्य याचनाय नन्दिन्याः आदेशनम्

भक्त्या गुरौ मय्यनुकम्पया च प्रीतास्मि,ते, पुत्र! वरं वृणीष्व।
न केवलानां पयसां प्रसूतिम् अवेहि मां कामदुघां प्रसन्नाम्।। ६३।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः;"वरं वृणीष्व इति नन्दिनी दिलीपं समादिशति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे नन्दिन्यनुग्रहकथाभागे वर्तते।

पदविभागः; भक्त्या, गुरौ, मयि, अनुकम्पया, च, प्रीता, अस्मि, ते, पुत्र ! वरम् वृणीष्व।
न, केवलानाम्, पयसाम् , प्रसूतिम्, अवेहि, माम् कामदुघाम्, प्रसन्नाम्।।

अन्वयक्रमः; हे पुत्र !,गुरौ,भक्त्या, मयि, अनुकम्पया, च, प्रीता,अस्मि,वरम् वृणीष्व,
माम्,केवलानाम्,पयसाम्, प्रसूतिम् अवेहि,प्रसन्नाम्,माम्, कामदुघाम्, अवेहि।

प्रतिपदार्थः; पुत्र! = वत्स !, गुरौ =महर्षौ वसिष्ठे, भक्त्या = पूज्यभावेन, मयि = धेनौ नन्दिन्याम्, अनुकम्पया = दयया.कारुण्येन च. प्रीता = प्रसन्ना, अस्मि = भवामि, वरम् = ब्अभीष्टम्,वृणीष्व = प्रार्थयतु, (तथाहि),माम् = गाम् नन्दिनीम् ,केवलानाम् = परिमितानाम्, पयसाम्=क्षीराणाम्,प्रसूतिम् = प्रस्रविणीम् एव , न अवेहि = मा विद्धि, किन्तु, प्रसन्नाम् = प्रीताम्, कामदुघाम्= मनोभीष्टप्रदायिनीम् ,(अपि) अवेहि =विद्धि।

श्लोकभावः;"दिलीप ! गुरौ तव भक्तिः गरीयसी। मयि अनुकम्पा च अमोघा। अहं तवअनु कम्पया अधिकं प्रीता अस्मि। वरं वृणीष्व, पुत्र ! दिलीप ! मां न केवलां पयोदायिनीं चिन्तय, किन्तु यदि अहं प्रसन्ना, कामानाम् अपि प्रदायिनी भवामि । मां कामदुघाम् अपि जानीहि " इति नन्दिनी दिलीपाय स्वमहिमानं कथयति।

व्याकरणांशाः;सन्धयः -मय्यनुकम्पया मयि + अनुकम्पया (इ + अ = य्) यणादेशसन्धिः।
प्रीताऽस्मि प्रीता + अस्मि (आ + अ = आ) सवर्णदीर्घसन्धिः।

**स्वावलोकनप्रश्नाः**

१.दिलीपस्य कस्याम् अनुकम्पा वर्तते ?

२.दिलीपस्य कस्मिन् भक्तिः वर्तते ?

३.नन्दिनी कीदृशी ?

## १०.२.५ पुत्रसन्ततेः याचनम्

ततः समानीय स मानितार्थी, हस्तौ स्वहस्तार्जितवीरशब्दः।
वंशस्य कर्त्तारमनन्तकीर्तिम् , सुदक्षिणायां तनयं ययाचे।। ६४।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "दिलीपः सुक्षिणायां तनयं ययाचे" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, नन्दिन्यनुग्रह-कथाभागे वर्तते।

पदविभागः - ततः, समानीय, सः, मानितार्थी, हस्तौ, स्वहस्तार्जितवीरशब्दः।
वंशस्य, कर्त्तारम्, अनन्तकीर्तिम्, सुदक्षिणायाम्, तनयम्, ययाचे।।

अन्वयक्रमः - ततः मानितार्थी,स्वहस्तार्जितवीरशब्दः,वंशस्य, कर्त्तारम्, अनन्तकीर्तिम्,तनयम्, सुदक्षिणायाम्, ययाचे

प्रतिपदार्थः - ततः = अनन्तरम्, मानितार्थी, मानित = सम्मानित,अर्थी= याचकः , स्वहस्तार्जितवीरशब्दः,स्व = स्वस्य, निजस्य, हस्त = कराभ्याम्, अर्जित = सम्पादित, वीरशब्दः = पराक्रमशाली इति व्यवहारवान् राजा दिलीपः, हस्तौ = करौ, समानीय = सम्पुटीकृत्य, वंशस्य=कुलस्य, कर्त्तारम् = प्रवर्तयितारम्, अनन्तकीर्तिम्=यशस्सम्पन्नम्, तनयम्= पुत्रम्, सुदक्षिणायाम् = स्वभार्यायाम्, ययाचे = याचितवान्।

श्लोकभावः - दिलीपः भुजबलसम्पन्नः।उद्यम्य स्वयं हस्तेन रिपून् संहरति।तथा स्वयं सम्पादितवीरशब्दः अयं दिलीपः। तथापि नन्दिन्याः विधेयः एव। अयं अञ्जलिं घटते। कीर्तिसम्पन्नं वंशोद्धारकं तनयं सुदक्षिणायां याचते। इह लोके प्रतिष्ठासम्पादनार्थं कीर्तिसम्पन्नं वृणोति, पितृणां पुण्यलोकावाप्यर्थं श्राद्धादीनाम् आचरणाय वंशोद्धारकं,च तनयं अभिलषति।

सन्धयः मानितार्थी; मानित + अर्थी (अ + अ = आ) सवर्णदीर्घसन्धिः।
...हस्तार्जित...; हस्त + आर्जित (अ + आ = आ) सवर्णदीर्घसन्धिः।
ततस्समानीय; ततः + समानीय (विसर्गः + स् = स्) विसर्गसन्धिः।

समासाः -मानितार्थी; मानिताः अर्थिनः येन सः = बहुव्रीहिसमासः।
अनन्तकीर्तिः; अनन्ता कीर्तिः यस्य सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१.दिलीपः कीदृशं पुत्रं ययाचे ?

२. दिलीपः कस्यां तनयं ययाचे ?

## १०.२.६ पयः पानाय नन्दिन्याः समादेशनम्

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश।। ६५।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः-" पुत्र! दिलीप! मदीयं पयः पिबतु इति नन्दिनी दिलीपं आदिशति "इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे नन्दिन्यनुग्रह-कथाभागे वर्तते।

पदविभागः - सन्तानकामाय, तथा, इति, कामं, राज्ञे, प्रतिश्रुत्य, पयस्विनी, सा।
दुग्ध्वा, पयः, पत्रपुटे, मदीयम्, पुत्र! उपभुङ्क्ष्व, इति,तम्, आदिदेश।।

अन्वयक्रमः - सा, पयस्विनी,सन्तानकामाय,राज्ञे, तथा, इति, कामं,प्रतिश्रुत्य, पुत्र! मदीयम् पयः,पत्रपुटे, दुग्ध्वा, उपभुङ्क्ष्व, इति,तम्,आदिदेश।

प्रतिपदार्थः - सा = वरं वृणीष्व इति दिलीपम् आदिष्टा, पयस्विनी=प्रशस्तक्षीरवती नन्दिनी, सन्तानकामाय = पुत्रम् अर्थितवते, तस्मै = राज्ञे दिलीपाय ,तथा = यथा इच्छसि तथा , इति = एवम्, कामम् = दिलीपस्य अभीष्टम्,प्रतिश्रुत्य = प्रतिज्ञाय, पुत्र! = हे वत्स! दिलीप! ,मदीयम् = मदीयस्तननिस्सृतम्, पयः = दुग्धम्,पत्रपुटे = पर्णानां पात्रे, दुग्ध्वा = प्रदुह्य, उपभुङ्क्ष्व = पिब, इति = एवम्, तम्=दिलीपम्,आदिदेश = आदिष्टवती।

श्लोकभावः -दिलीपस्य इह लोके प्रतिष्ठा आवश्की। तत्सम्पादनार्थं कीर्तिसम्पन्नं तनयं याचते।अपि च तस्य परलोके पितृणां पुण्यलोकाश्च अभीष्टाः। तदवाप्त्यर्थं श्राद्धादीनाम् आचरणाय वंशोद्धारकं च तनयं सुदक्षिणायां य्याचते। प्रातः प्रभृति रुचिकरतृणानां भक्षणात्, सायंकाले वत्सस्य स्मरणात् च गोः ऊधसि क्षीम् अधिकं स्रवते, अधिकस्रवणस्य प्रस्रवणं इति व्यवहारः।तादृशी इयं प्रस्रविणी नन्दिनी कामदुघा भवति ।दिलीपाय "तथा" इति पुत्रसन्तानं प्रतिशृणोति। अनन्तरं दिलीपं "पुत्र!दिलीप ! पत्रपुटे मदीयं पयः दुग्ध्वा पिबतु " इति नन्दिनी दिलीपम् आदिशति।

सन्धयः- तथेति; तथा +इति (आ + इ = ए ) गुणसन्धिः।
उपभुङ्क्ष्वेति; उपभुङ्क्ष्व + इति (अ + इ = ए ) गुणसन्धिः।
पुत्रोपभुङ्क्ष्व; पुत्र +उपभुङ्क्ष्व (अ + उ = ओ ) गुणसन्धिः।

**स्वावलोकनप्रश्नाः**

१.संतानकामः कः ?

२. नन्दिनी दिलीपं किम् आदिदेश ?

## १०.२.७ वत्सहुतावशेषस्य पयसः पानाय दिलीपस्य विज्ञापनम्

वत्सस्य होमार्थविधेश्च शेषम् ऋषेरनुज्ञामधिगम्य मातः।
औधस्यमिच्छामि तवोपभोक्तुम्, षष्ठांशमुर्व्या इव रक्षितायाः।। ६६।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "दिलीपः वत्सहुतावशेषं पयः पातुं नन्दिनीं विज्ञापयति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे नन्दिन्यनुग्रह-कथाभागे वर्तते।

पदविभागः - वत्सस्य, होमार्थविधेः, च, शेषम्, ऋषेः, अनुज्ञाम्, अधिगम्य मातः।
औधस्यम्, इच्छामि, तव,उपभोक्तुम्, षष्ठाशम्, उर्व्याः, इव, रक्षितायाः।।

अन्वयक्रमः - मातः! वत्सस्य, होमार्थविधेः, च, शेषम्, तव, औधस्यम्, रक्षितायाः,उर्व्याः, षष्ठाशम्, इव, ऋषेः, अनुज्ञाम्, अधिगम्य, उपभोक्तुम्,इच्छामि।

प्रतिपदार्थः - मातः! = गोमातः!नन्दिनि!, वत्सस्य= भवत्याः बालसन्ततेः पोषणपानस्य,च= अपि च, होमार्थविधेः, होमार्थ = यागप्रयोजनस्य, विधेः = अनुष्ठानस्य,शेषम् = अवशेषम्, तव= भवत्याः ,औधस्यम् = दुग्धम्, रक्षितायाः = पालितायाः, उर्व्याः = पृथिव्याः,षष्ठांशम् = षष्ठभागम् ,इव = यथा ,ऋषेः = वसिष्ठस्य, अनुज्ञाम्=आज्ञाम्, अधिगम्य = प्राप्य,उपभोक्तुम् = पातुम्, इच्छामि =अभिलषामि।

श्लोकभावः - दिलीपः सुदक्षिणायाम्- इह लोके प्रतिष्ठासम्पादनार्थं कीर्तिसम्पन्नं वृणोति।पितॄणां पुण्यलोकावाप्त्यर्थं श्राद्धादीनामाचरणाय वंशोद्धारकं च तनयं अभिलषति। प्रातः प्रभृतिरुचिकरतृणानां भक्षणात्, सायंकाले वत्सस्य स्मरणात् च गोः ऊधसि क्षीरं स्रवते, तत् प्रस्रवणं भवति। तादृशी इयं प्रस्रविणी नन्दिनी कामदुघा भवति ।दिलीपाय "तथा" इति प्रतिशृणोति।अनन्तरं दिलीपं "पुत्र! दिलीप ! पत्र पुटे मदीयं पयः दुग्ध्वा पिब" इति दिलीपं च आदिशति।दिलीपश्च वत्स-हुत-अवशेषं पातुं नन्दिनीं विज्ञापयति। नन्दिनी च अङ्गीकरोति।

व्याकरणांशाः-सन्धयः-तवोपभोक्तुम् तव +उपभोक्तुम् (अ + उ = ओ ) गुणसन्धिः।
होमार्थविधेः होम + अर्थविधेः (अ + अ = आ ) सवर्णदीर्घसन्धिः।
षष्ठांशम् षष्ठ + अंशम् (अ + अ = आ ) सवर्णदीर्घसन्धिः।
कोशः - उर्वी वसुधोर्वी वसुन्धरा इत्यमरः।

**स्वावलोकनप्रश्नाः**

१."गुरोः अनुज्ञाम् अधिगम्य मातः " अत्र माता का ?

२. नन्दिन्याः क्षीरस्य पानाय दिलीपः कस्य अनुज्ञां इच्छति ?

## १०.३. उपसंहारः

पूज्यपूजाव्यतिक्रमः श्रेयसः प्रतिबन्धकः भवति। दिलीपस्य च विषये पूज्यपूजाव्यतिक्रमः श्रेयसः प्रतिबन्धश्च, प्रमादवशादेव भवति। तेन दिलीपःकामधेनोः शापस्य पात्रः भवति।परं,वसिष्ठस्य ज्ञापनानन्तरं अपराधं जानाति,गुरौ भक्त्या ,धेनौ अनुकम्पया च प्रवर्तते,त्रिकरणशुद्ध्या नन्दिन्याः व्रतम् आचरति। नन्दिन्याः परीक्षायाम् उत्तीर्णः भवति। नन्दिनी दिलीपस्य निबद्धतां प्रति परं प्रीता भवति।राजदम्पत्योःसन्ततिं प्रसादयति।एवं श्रद्धया सुदक्षिणा-दिलीपयोः प्रकृति (भूतप्राणिनः) आराधनस्य फलमेव नन्दिन्याः अनुग्रहः।

## १०.४.अभ्यासः

श्लोकद्वयं व्याख्यात -

(१).उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्।
ददर्श राजा जननीमिव स्वां गामग्रस्तः प्रस्रविणीं न सिंहम्।।

(२).वत्सस्य हौमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः।
औधस्यमिच्छामि तवोपभोक्तुम्, षष्ठांशमुर्व्या इव रक्षितायाः।

* * *

# अंशः-XI ;  नन्दिन्याः व्रतसमापनम्

संरचना

११. ० परिचयः
११. १ लक्ष्याणि
११. २ नन्दिन्याः व्रतसमापनम्
११. २.१ आश्रमं प्रति नन्दिनी-दिलीपयोः आगमनम्
११. २.२ नन्दिन्याः  अनुग्रहस्य निवेदनम्
११. २.३ नन्दिन्याः पयसः पानम्
११. २.४ सुदक्षिणा-दिलीपयोः प्रस्थापनम्
११. २.५ सुदक्षिणा-दिलीपयोः प्रस्थानम्
११. २.६ राजथान्याः मार्गगमनम्
११. २.७ राजथान्यां प्रजानां प्रतीक्षणम्
११. २.८ राज्यभारस्य पुनः स्वीकरणम्
११. २.९ गर्भस्य धारणम्
११. ३  उपसंहारः
११. ४  अभ्यासः

## ११.० परिचयः

नन्दिन्याः व्रतसमापनम् इत्ययं पाठ्यांशः रघुवंशस्य द्वितायसर्गे वर्तते। अस्य द्वितीय सर्गस्यैव कथापरतया नन्दिनीवरप्रदानम् इत्यपि च व्यवहारः अस्ति। अयं पाठ्यांशः सप्तषष्ठितम श्लोकतः आरभ्य पञ्चसप्ततितमश्लोकं यावत् (६७-७५) परिमितः। अत्र राजदम्पत्योः गोसेवा व्रतस्य समापनं निरूपितम्।  हिमालयतः आश्रमं प्रति नन्दिनी-दिलीपयोः  आगमनम्,वसिष्ठस्य, सुदक्षिणायाश्च नन्दिन्यनुग्रहनिवेदनम्,वसिष्ठस्य अनुमत्या नन्दिन्याः प्पयसः पानम्, सुदक्षिणा-दिलीपयोः प्रस्थानम्,राजथान्यां प्रजानां प्रतीक्षणम्,मन्त्रिषु न्यस्तस्य राज्यभारस्य पुनः स्वीकरणम् ,सुदक्षिणायाः गर्भधारणम् इत्येते अंशाः अस्मिन् पाठ्यांशे वर्णिताः।

## ११.१ लक्ष्याणि

सर्वत्र  सर्वस्यापि कर्मणः  आद्यन्तौ भवतः। तावेव प्रारम्भ-उपसंहारौ इति नाम्ना व्यवहारम् आप्तौ। एतयोः एव भिन्नभिन्नस्थलेषु भिन्नभिन्ननाम्ना प्रसिद्धिः अस्ति।यज्ञ-यागादिषु अङ्कुरार्पण-पूर्णाहुती नाम्ना व्यवहारः अस्ति।  शस्त्रसन्धानविषये प्रयोग-उपसंहारौ नाम्ना प्रसिद्धिः अस्ति। पूजाविधिषु आवाहन-उद्वासने इति प्रचारः अस्ति।कम्प्यूटर् विषये अपि Opening-Shut down च प्रसिद्धे एव पदे  विद्येते। एतेषु सर्वेष्वपि यावत्या श्रद्धया प्रारम्भो वा,प्रयोगो वा ,आवाहनं वा,Opening वा अनुष्ठितं भवति,तावत्यैव श्रद्धया

समाप्तिः,उपसंहारः,उद्वासनम् Shut downच अनुष्ठेयाः भवन्ति।आद्यन्तौ द्वावपि शास्त्रसम्मतातौ एव। कम्प्यूटर् Open कृत्वा, शास्त्रीयपद्धत्या यदि Shut down न क्रियते, तदा यथा वा Improper Shut down कारणतः प्रमादो भवति,स च तस्य भाराय कार्यनाशाय वा भवति, तथैव प्रारब्धस्य कर्मणः असमुचितरीत्या अशास्त्रीयपद्धत्या समापनम् अश्रेयसे अप्रतिष्ठायै च भवति। अतः प्रारब्धस्य कर्मणः समापनं समुचितपद्धत्या आचरणीयं वर्तते।अयम् अभ्यासः, आरभ्य आचरितस्य कर्मणः शास्त्रीयतां सम्पादयति। कर्मणः आदावेव केवलम् आसक्तिः शास्त्रोक्तता च न, अपि तु अवसानं यावत् शास्त्रोक्ततया कर्म आचरेत् इत्येतदंशसूचकः अयं पाठ्यांशः।एतत् पाठ्यांशस्य अध्ययनेन-

- गुरवे,भार्यायै च दिलीपेन निवेदितं नन्दिन्याः अनुग्रहं ज्ञातुं प्रभवति।
- दिलीपस्य नन्दिनीपयःपानवृत्तान्तं लिखितुं समर्थो भवति।
- सुदक्षिणा-दिलीपयोः प्रस्थापनविधानं प्रति भाषितुं पारयति।
- सुदक्षिणा-दिलीपाभ्यां प्रदर्शितं मर्यादाक्रमपालनं(Protocol)पठितुं प्रभवति।
- सुदक्षिणा-दिलीपयोःसुनायासप्रयाणम् अवगन्तुं प्रभवति।
- सुदक्षिणा-दिलीपयोः सन्दर्शने प्रजानाम् आनन्दं लिखितुं पारयति।
- सुदक्षिणायाः गर्भस्य वैशिष्ट्यम् अवगन्तुं समर्थो भवति।

## ११.२ नन्दिन्याः व्रतसमापनम्

### ११.२.१ आश्रमं प्रति नन्दिनी-दिलीपयोः आगमनम्

इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीतितरा बभूव।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण।। ६७।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम्।अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "नन्दिनी-दिलीपौ हिमालयात् आश्रमं प्रति आगच्छतः " इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे,व्रतसमापन-कथाभागे वर्तते।

पदविभागः - इत्थम्, क्षितीशेन, वसिष्ठधेनुः, विज्ञापिता. प्रीतितरा. बभूव।
तदन्विता, हैमवतात्, च ,कुक्षेः, प्रत्याययौ, आश्रमम्, अश्रमेण।।

अन्वयक्रमः - इत्थम्, क्षितीशेन,विज्ञापिता, वसिष्ठधेनुः,प्रीतितरा बभूव, तदन्विता, हैमवतात्, कुक्षेः, अश्रमेण, आश्रमम्, प्रत्यययौ,च।

प्रतिपदार्थः - इत्थम् = गुरोः अनुमत्या भवत्याः पयः पास्यामि इत्येवं प्रकारेण, क्षितीशेन = राज्ञा दिलीपेन, विज्ञापिता = निवेदिता, वसिष्ठधेनुः, वसिष्ठ = गुरोः वसिष्ठस्य, धेनुः = नन्दिनी, प्रीतितरा=अतिसन्तष्टा , बभूव=जाता।तदन्विता, तत् = तेन दिलीपेन,अन्विता=युक्ता सती, हैमवतात् = हिमालयसम्बन्धिनः, कुक्षेः = गुहाप्रदेशात्,अश्रमेण = अनायासेन, आश्रमम्= निजवासस्थानम्, वसिष्टस्य आश्रमम् , प्रत्याययौ=प्रत्याजगाम।

श्लोकभावः - गुरौ दिलीपस्य भक्तिः गरीयसी। नन्दिन्याः वत्सायां अनुकम्पा च अमोघा। वत्से अनुकम्पायाः गुरौ भक्तिभावस्य च नन्दिनी अत्यन्तं प्रीता भवति। अतः नन्दिनी वत्सहुतावशेषं पातुं दिलीपस्य विज्ञापनाम् अङ्गीकरोति।अनन्तरं हिमालयात् नन्दिनी-दिलीपौ अनायासेन आश्रमं प्रति आगच्छतः।

सन्धयः तदन्विता; तत् + अन्विता (पदान्ततकारः, त् = द्) जश्त्वसन्धिः।

प्रत्याययावाश्रमम्; प्रत्याययौ + आश्रममश्रमम् (औ + आ = आव्)आवादेशसन्धिः।

प्रत्याययौ; प्रति + आययौ (इ + आ = य्) यणादेशसन्धिः।

समासाः; वसिष्ठधेनुः वसिष्ठस्य धेनुः =षष्ठीतत्पुरुषसमासः।

**स्वावलोकनप्रश्नाः**

१.दिलीपेन विज्ञापिता का ?

२. दिलीपेन सह नन्दिनी कस्मात् आश्रमं प्रत्याययौ ?

## ११.२.२ नन्दिन्याः अनुग्रहस्य निवेदनम्

तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य।
प्रहर्षचिह्नानुमितं प्रियार्थं शशंस वाचा पुनरुक्तयेव।। ६८।।

श्लोकपरिचयः श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम्। अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः-"दिलीपः नन्दिन्याः अनुग्रहं प्रथमं वसिष्ठाय , अनन्तरं सुदक्षिणायै च निवेदयति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे व्रतसमापन-कथाभागे वर्तते।

पदविभागः; - तस्याः, प्रसन्नेन्दुमुखः, प्रसादम्, गुरुः, नृपाणाम्, गुरवे, निवेद्य।
प्रहर्षचिह्नानुमितम्, प्रियार्थम्, शशंस, वाचा, पुनरुक्तया, इव।।

अन्वयक्रमः;-प्रसन्नेन्दुमुखः,नृपाणाम्,गुरुः,प्रहर्षचिह्नानुमितम्,तस्याः, प्रसादं, वाचा, गुरवे, निवेद्य, पश्चात्, पुनरुक्तया, इव,प्रियायै, शशंस।

प्रतिपदार्थः; प्रसन्नेन्दुमुखः,प्रसन्न = निर्मलस्य, इन्दु = चन्द्रस्य,मुखः= मुखम् इव मुखं यस्य सः,नृपाणाम्= राज्ञाम्,गुरुः= श्रेष्ठः,दिलीपः,प्रहर्षचिह्नानुमितम्,प्रहर्ष = आनन्दस्य, चिह्न = लक्षणैः एव,अनुमितम् = ऊहितम्, तस्याः = नन्दिन्याः,प्रसादम्=अनुग्रहम्,वाचा = वचनेन, गुरवे = वसिष्ठाय, निवेद्य= विज्ञाप्य,पश्चात् =अनन्तरम्,पुनरुक्त्या =भूयः कथनमिव, प्रियायै = सुदक्षिणायै, शशंस = कथयामास।

श्लोकभावः -नन्दिनी दिलीपाय पुत्रसन्तानम् अनुगृह्णाति।ततः नन्दिनी- दिलीपौ हिमालयात्

आश्रमं प्रति आगच्छतः। वरं प्राप्य दिलीपः प्रसन्नः प्रशान्तश्च भवति। वरप्राप्त्या दिलीपस्य मुखं च आह्लादकरं जायते। एवं प्रसन्नवदनः दिलीपः नन्दिन्याः वरप्रदानं प्रथमं गुरवे वसिष्ठाय निवेदयति। अनन्तरं सुदक्षिणायाः सकाशं गच्छति। तत्र दिलीपस्य प्रसन्नवदनम् एव, नन्दिन्याः वरप्रदानं आशंसति। तथापि दिलीपः पुनः उक्तम् इव स्वयं सुदक्षिणायै नन्दिन्याः वरप्रदानवृत्तान्तं कथयति।

व्याकरणांशाः सन्धयः -प्रसन्नेन्दुमुखः; प्रसन्न +इन्दुमुखः (अ + इ = ए) गुणसन्धिः।

समासाः -प्रसन्नेन्दुमुखः; प्रसन्नेन्दुः इव मुखं यस्य सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः -**

१.दिलीपः कस्मै प्रथमं नन्दिन्याः अनुग्रहं निवेदितवान्। ?

२. नन्दिन्याः अनुग्रहेण कः सन्तुष्टः ?

## ११.२.३ नन्दिन्याः पयसः पानम्

स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम्।
पपौ वसिष्ठेन कृताभ्युनुज्ञः, शुभ्रं यशो मूर्तमिवातितृष्णः।। ६९।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "दिलीपःवसिष्ठस्य अनुमतिं स्वीकरोति।नन्दिन्याः पयः पिबति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे व्रतसमापन-कथाभागेवर्तते।

पदविभागः - सः, नन्दिनीस्तन्यम्, अनिन्दितात्मा, सद्वत्सलः, वत्सहुतावशेषम्।
पपौ, वसिष्ठेन, कृताभ्यनुज्ञः, शुभ्रं, यशः, मूर्त्तम्, इव, अतितृष्णः।।

अन्वयक्रमः - अनिन्दितात्मा, सद्वत्सलः, वसिष्ठेन,कृताभ्यनुज्ञः,वत्सहुतावशेषम्,
नन्दिनीस्तन्यम्,शुभ्रं,मूर्त्तम्, यशः, इव,अतितृष्णः, पपौ।

प्रतिपदार्थः -अनिन्दितात्मा=अगर्हितः स्वभावः यस्य सः, सद्वत्सलः=साधुषु समुचितप्रवर्तनः,वसिष्ठेन=महर्षिणा,कृताभ्यनुज्ञः, कृत=प्राप्त, अनुज्ञः=अनुमतिः, सः=दिलीपः,वत्सहुतावशेषम्,वत्स=नन्दिन्याः बालसन्ततेः,हुतस्य=हवनस्य,च अवशेषम्=अवशिष्टम्, नन्दिनीस्तन्यम्,नन्दिनी= वसिष्ठस्य धेनोः,स्तन्यम् = क्षीरम्, शुभ्रम् = निर्मलम्, मूर्तम्=आकृतिम् आपन्नम्, यशः=कीर्तिम् ,इव=यथा, अतितृष्णः =अतिशयितया तृष्णया सहितः सन्, पपौ=पीतवान्।

श्लोकभावः - दिलीपः पवित्रशीलः,पुण्यात्मा।अपि च अयं साधुषु वत्सलः, स्नेहप्रवर्तनः।

तादृशः अयं दिलीपः वत्सायाः पानस्य अनन्तरम्, होमार्थविधेश्च अनन्तरम् अवशिष्टं नन्दिन्याः पयः पातुं गुरोः अनुमतिं प्राप्य मूर्तीभूतं स्वीयं यशः इव तृष्णया पिबति।

व्याकरणांशाः-सन्धयः-अनिन्दितात्मा; अनिन्दित + आत्मा(अ + आ = आ) सवर्णदीर्घसन्धिः।

समासाः -अनिन्दितात्मा; अनिन्दितः आत्मा यस्य सः = बहुव्रीहिसमासः।

**स्वावलोकनप्रश्नाः**

१.दिलीपः कस्य अनुज्ञया नन्दिन्याः क्षीरं स्वीकरोति?

२. नन्दिन्याः क्षीरं दिलीपः कथं पपौ ?

## ११.२.४ सुदक्षिणा-दिलीपयोः प्रस्थापनम्

प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य।
तौ दम्पती स्वां प्रति राजथानीं प्रस्थापयामास वशी वशिष्ठः।।७०।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "वसिष्ठः सुदक्षिणा-दिलीपौ राजथानीं प्रस्थापयामास" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे व्रतसमापनकथाभागे वर्तते।

पदविभागः - प्रातः, यथोक्तव्रतपारणान्ते, प्रास्थानिकम्, स्वस्त्ययनम्, प्रपुज्य।
तौ, दम्पती, स्वाम्, प्रति, राजथानीम्, प्रस्थापयामास, वशी, वशिष्ठः।।

अन्वयक्रमः - वशी, वसिष्ठः,प्रातः,यथोक्तव्रतपारणान्ते, प्रास्थानिकं, स्वस्त्ययनम्, प्रपुज्य,
तौ, दम्पती, स्वाम्, राजथानीम्,प्रति, प्रस्थापयामास।

प्रतिपदार्थः;वशी = जितेन्द्रियः,वसिश्ठः = वशिष्ठमहर्षिः,प्रातः = प्रातःकाले,यथोक्तव्रतपारणान्ते, यथोक्तव्रत = पूर्वोक्तस्य, गोसोवाव्रतसम्बन्धिनः, पारणा = सन्तर्पणभोजनस्य, अन्ते = अवसाने, प्रास्थानिकम् = प्रस्थानकालिकम्, स्वस्त्ययनम्=शुभावहम् आशीर्वादम् ,प्रयुज्य = दत्वा, तौ = पूर्वोक्तौ, दम्पती = सुदक्षिणादिलीपौ, स्वाम् = स्वकीयं,राजथानीम् = अयोध्यां,प्रति= उद्दिश्य, प्रस्थापयामास = प्रेषयामास।

श्लोकभावः -नन्दिन्याः अनुग्रहणेन सुदक्षिणा-दिलीपौ आनन्देन रात्रिं यापयतः। प्रातश्च वसिष्ठः नन्दिन्याः व्रताचरणदीक्षां समापयति। व्रातान्तभोजनसन्नाहमपि समाप्तं भवति। वसिष्ठः विप्रैः आशीर्वचनमपि दापयति। अनन्तरं नियमशीलः= समयपालकः, वसिष्ठः सुदक्षिणा-दिलीपौ राजथानीं गन्तुं अनुमतिं ददाति,प्रस्थापयति च।

सन्धयः -यथोक्तव्रत...; यथा + उक्तव्रत (आ + उ = ओ) गुणसन्धिः।

पारणान्ते; पारणा + अन्ते (आ + अ = आ) सवर्णदीर्घसन्धिः।

स्वस्त्ययनम्; स्वस्ति + अयनम् (इ + अ = य्) यणादेशसन्धिः।

समासाः -दम्पती; जाया च पतिश्च, तौ = द्वन्द्वसमासः।

**स्वावलोकनप्रश्नाः;**

१.अत्र दम्पती कौ ?

२. किं कृत्वा वसिष्ठः सदक्षिणा-दिलीपौ राजथानीं प्रस्थापयामास?

## ११.२.५ सुदक्षिणा - दिलीपयोः प्रस्थानम्

प्रदक्षिणीकृत्य हुतं हुताशमनन्तरम् भर्तुररुन्धतीं च।
धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्राभवः।। ७१।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "सुदक्षिणा-दिलीपौ आश्रमात् राजथानीम् अयोध्यां प्रस्थितौ" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, व्रतसमापनकथाभागे वर्तते।

पदविभागः - प्रदक्षिणीकृत्य, हुतम्, हुताशम्, अनन्तरम्, भर्तुः, अरुन्धतीम्,च।
धेनुम्, सवत्साम्, ,च नृपः, प्रतस्थे, सन्मङ्गलोदग्रतरप्रभावः।।

अन्वयक्रमः - नृपः, हुतम्, हुताशम्, भर्तुः,अनन्तरम्, अरुन्धतीम्,च सवत्साम्,धेनुम्, प्रदक्षिणी कृत्य,सन्मङ्गलोदग्रतरप्रभावः, प्रतस्थे।

प्रतिपदार्थः - नृपः=राजा दिलीपः, हुतम्=हविर्दानेन तृप्तिम् आप्तम् ,ज्वलन्तम्; हुताशम् = अग्निम्,भर्तुः = स्वामिनो वसिष्ठस्य, अनन्तरम्=पश्चात्, अरुन्धतीम्=वसिष्ठपत्नीम्, च = अपि च,सवत्साम्=वत्ससहिताम्, धेनुम् = नन्दिनीम्, प्रदक्षिणीकृत्य =परिक्रम्य, सन्मङ्गलोदग्रतरप्रभावः, सन्मङ्ल = शुभाचारैः,उदग्रतर = उन्नततरः,प्रभावः = सन्नाहसमन्वितः, (सन्) प्रतस्थे=प्रचचाल।

श्लोकभावः - व्रताङ्गभूतं होमादिकं च अचिरादेव समाप्तम्। अतः अग्निदेवश्च ज्वलन्नेव अस्ति ।सुदक्षिणा-दिलीपौ प्रथमं ज्वलन्तम् अग्निदेवम् ,अनन्तरम् अरुन्धतीवसिष्ठौ च कृतज्ञतापूर्वकं प्रदक्षिणम् आचरतः।ततश्च वत्सयुतां नन्दिनीं नमस्कुरुतः। अत्रान्तरे शुभदायकाः मङ्गलघोषाः श्रूयन्ते ।स च मङ्गलघोषः सुदक्षिणा-दिलीपयोः मनस्सु सुखानुभूतिम् आनन्दं च जनयति। तस्मिन् शुभसमये सुदक्षिणा-दिलीपौ रथम् अधितिष्ठतः।रजधानीं आगन्तुं प्रस्थितौ भवतः।

सन्धयः -सन्मङ्लोदग्रतर; सन्मङ्गल + उदग्रतर (आ + उ = ओ) गुणसन्धिः।

सन्मङ्गल; सत् + मङ्गल (त् + म् = न्)अनुनासिकसन्धिः।

**स्वावलोकनप्रश्नाः**

१."अनन्तरम् भर्तुः अरुन्धतीम् च" अत्र "भर्तुः"पदं कं सम्बन्धयति?

२.प्रदक्षिणे अनुसृतस्य क्रमस्य वैशिष्ट्यं किम् ?

## ११.२.६ राजथान्याः मार्गगमनम्

श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः।
ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन।। ७२।।

श्लोकपरिचयः;अयं श्लोकः रघुवंशमहाकाव्ये वर्तते। तच्च एकोनविंशतिसर्गात्मकम्। अस्य रचयिता कालिदासः। अस्य विषये 'उपमा कालिदासस्य' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्,सरसम्,सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "सुदक्षिणा-दिलीपयोः रथमार्गं सुखकरम् अनुकूलं वर्तते"इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, व्रतसमापन-कथाभागे वर्तते।

पदविभागः - श्रोत्राभिरामध्वनिना,रथेन,सः,धर्मपत्नीसहितः,सहिष्णुः।
ययौ, अनुद्घातसुखेन, मार्गं, स्वेन,इव, ,पूर्णेन, मनोरथेन।।

अन्वयक्रमः- धर्मपत्नीसहितः, सहिष्णुः, सः, श्रोत्राभिरामध्वनिना अनुद्घातसुखेन,रथेन, स्वेन,पूर्णेन, मनोरथेन, इव, मार्गं, ययौ।

प्रतिपदार्थः - धर्मपत्नीसहितः,धर्मपत्नी =अग्निसाक्षिकम् ऊढया सुदक्षिणया, सहितः =युक्तः, सहिष्णुः=सहनशीलः, सः=राजा दिलीपः, श्रोत्राभिरामध्वनिना, श्रोत्र = कर्णयोः, अभिराम = सुखप्रदेन, ध्वनिना = नादेन, अनुद्घातेन= निम्न-उन्नताभ्यां जनितक्लेशरहितेन, रथेन=स्यन्दनेन, स्वेन=आत्मीयेन, पूर्णेन = सफलेन,मनोरथेन=अभिलाषेण, इव=यथा,मार्गम् = पथि, ययौ=जगाम।

श्लोकभावः - सुदक्षिणा-दिलीपौ रथमधितिष्ठतः ।एतौ च सहनशीलौ ।रथमार्गश्च अनुकूलः सुखकरश्च वर्तते। तथाहि -मार्गे उच्चावचौ न स्तः। पथि पाषाणादिकं नास्ति। अत एव रथचक्राणां परुषध्वनयः न श्रवणपथं आगच्छन्ति।रथश्च विलासतया विहरणशीलतया च गच्छति। मृदुना नादेन साह्लादं प्रयाति। प्रकृते-यथा सुदक्षिणा-दिलीपौ पुत्रसन्ततिवरं प्राप्य पूर्णमनस्कौ तृप्तिमन्तौ सुखसन्तोषिणौ स्तः,तथा इदमपि रथमार्गं श्रोत्राभिरामध्वनिना सुखं जनयन् गच्छति।

व्याकरणांशाः -समासाः-धर्मपत्नीसहितः; धर्मपत्न्या सहितः = तृतीयातत्पुरुषसमासः।
मनोरथः; मनः रथः इव = उपमानोत्तरपदकर्मधार.समासः।

**स्वावलोकनप्रश्नाः -**

१.दिलीपः कया सह रथम् आरूढवान् ?

## ११.२.७ राजथान्यां प्रजानां प्रतीक्षणम्

तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम्।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम्।। ७३।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः।अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "सन्तानार्थाय विधये ,नन्दिन्याः व्रताचरणं परिसमाप्य,राजथान्यां पौराः सुदक्षिणया साकं दिलीपं पश्यन्ति।प्रकामं प्रीणन्ति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, व्रतसमापन-कथाभागे वर्तते।

पदविभागः - तम्, आहितौत्सुक्यम्, अदर्शनेन, प्रजाः, प्रजार्थव्रतकर्शिताङ्गम्।
नेत्रैः, पपुः तृप्तिम्, अनाप्नुवद्भिः, नवोदयम्,नाथम्, इव, औषधीनाम्।।

अन्वयक्रमः-प्रजाः,अदर्शनेन,आहितौत्सुक्यम्, प्रजार्थव्रतकर्शिताङ्गम्,(दिलीपम्)नवोदयम्,औषधीनाम् ,नाथम् ,सोमम् तृप्तिम्, अनाप्नुवद्भिः, नेत्रैः, इव,तम्, पपुः।

प्रतिपदार्थः - प्रजाः =पौराः,अदर्शनेन = प्रवासनिमित्तेन अनवलोकनेन, आहितौत्सुक्यम्, आहित =आवाहित, औत्सुक्यम्=दर्शनोत्कण्ठम्,प्रजार्थव्रतकर्शिताङ्गम्, प्रजार्थं=सन्तानार्थाय,व्रत= स्वीकृतेन गोसेवादीक्षाचरणेन, कर्शित= कृशीभूतम्, अङ्गम्=अवयवसमुदायम्, नवोदयम् =नूतनाभ्युदयम्,औषधीनाम् = वनस्पतीनाम्, नाथम्= स्वामिनम्,सोमम्=चन्द्रम्, तृप्तिम्= सन्तोषम्, अनाप्नुवद्भिः=अलभमानैः,नेत्रैः=नयनैः, इव =यथा,तम्=राजानम्,पपुः= सतृष्णम् अवलोकयामासुः।

श्लोकभावः - सुदक्षिणा -दिलीपौ राजधानीं प्राप्नुतः ।दिलीपः नन्दिन्याः व्रताचरणेन, नन्दिन्याः वरप्रदानेन च सन्तुष्टः भवति। उल्लासी च भवति। राजथान्यां पौराश्च दिलीपम् अदृष्ट्वा बहुकालं भवति।दिलीपं द्रष्टुं च पौराणाम् उत्कण्ठा च अधिका वर्तते।सन्तानार्थं गोसेवाव्रता चरणेन दिलीपस्य शरीरं कृशं जायते। ओषधीनां पतिः चन्द्रः। तस्य उदयनं सर्वेषां सन्तोषजनकं भवति। सदा पश्यन् अपि तृप्तिस्तु नैव भवति। प्रकृते चन्द्रस्य उदयं सदा पश्यन् अपि जनः यथा नैव तृप्तः भवति, एवं सुदक्षिणया सह राजथानीं प्रति आगच्छन्तं दिलीपं सदा पश्यन्तः अपि प्रजाः तृप्तिं न आप्नुवन्ति।तथा तृप्तिम् अनाप्नुवद्भिः नेत्रैः दिलीपं पिबन्ति । पौराः अमितोत्कण्ठया पश्यन्ति इति भावः।

सन्धयः इवौषधीनाम्; इव + औषधीनाम् (अ + औ = औ) वृद्धिसन्धिः।
आहितौत्सुक्यम् ;आहित + औत्सुक्यम् (अ + औ = औ) वृद्धिसन्धिः।
प्रजार्थम्; प्रजा + अर्थम् (आ + अ = आ)सवर्णदीर्घसन्धिः।

**स्वावलोकनप्रश्नाः**

१.व्रतकर्शितांगः कः ?

२. प्रजाः दिलीपं कथं पपुः ?

## ११.२.८ राज्यभारस्य पुनः स्वीकरणम्

पुरन्दरश्रीः पुरमुत्पताकं, प्रविश्य पौरैरभिनन्द्यमानः।
भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज।। ७४।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः। अस्य विषये ' उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः; "दिलीपः व्रताचरणं परिसमाप्य राजथानीम् आगच्छति। अनुपदमेव च पुनः राज्यपालनाभारं च स्वीकरोति "इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे, व्रतसमापन-कथाभागे वर्तते।

पदविभागः - पुरन्दरश्रीः, पुरम्, उत्पताकम्, प्रविश्य, पौरैः, अभिनन्द्यमानः।
भुजे, भुजङ्गेन्द्रसमानसारे, भूयः, सः, भूमेः, धुरम्, आससञ्ज।।

अन्वयक्रमः - पुरन्दरश्रीः,सः, पौरैः, अभिनन्द्यमानः,उत्पताकम्,पुरम्, प्रविश्य,भुजङ्गेन्द्रसमान-सारे, भुजेः, भूयः, भूमेः, धुरम्, आससञ्ज।

प्रतिपदार्थः पुरन्दरश्रीः,पुरन्दर=इन्द्रस्य, श्रीः=शोभासम्पन्नः,सः=राजा दिलीपः,पौरैः=नागरिकैः. अभिनन्द्यमानः=प्रशंस्यमानः,उत्पताकम्=ऊर्ध्वं स्थापितध्वजम्,पुरम् =राजधानीनगरम्,प्रविश्य= प्राप्य, भुजङ्गेन्द्रसमानसारे,भुजङ्ग=सर्पाणाम् , इन्द्र=प्रभुणा आदिशेषेण,समान=तुल्ये, सारे= बलसम्पन्ने, भुजे=बाहौ, भूमेः=पृथिव्याः, धुरम्=भारम्, आससञ्ज=स्थापितवान्।

श्लोकभावः -दिलीपः इन्द्रसमानः। इन्द्रस्य यादृशं ऐश्वर्यं भोगं च विद्यते तादृशं अस्याप्यस्ति। अयं च राजधानीमागतः। पौराश्च इमं "जयतु महाराज ! जयतु दिलीप !" इति अभिनन्दन्ति। दिलीपस्य प्रत्यागमनसन्दर्भं पुरस्कृत्य राजथानी च ऊर्ध्वं पताकैः अलङ्कृता भवति। आदिशेषः भुवः भारं फणेषु वहति। फणानां बलं च अतिमहत्। दिलीपस्य भुजश्च आदिशेषफणसदृशः। तादृशे भुजे पुनः राज्यभारं न्यस्यति। पुनः राज्यभारं स्वीकरोति इत्यर्थः।

व्याकरणांशाः - सन्धयः; भुजङ्गेन्द्र भुजङ्ग + इन्द्र =(अ +इ =ए )गुणसन्धिः।
समासाः; पुरन्दरश्रीः,पुरन्दरस्य, श्रीः इव श्रीः यस्य सः=बहुव्राहिसमासः।
कोशः; पुरन्दरः पुरुहूतः,पुरन्दरः(अमरकोशः)

| स्वावलोकनप्रश्नाः |
| --- |
| १.पुरन्दरश्रीः कः ? |
| २. दिलीपः कैः अभिनन्द्यमानः पुरं प्रविष्टः? |

## ११.२.९ गर्भस्य धारणम्

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्।
नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः।। ७५।।

श्लोकपरिचयः; अयं श्लोकः रघुवंशमहाकाव्ये वर्तते । तच्च एकोनविंशतिसर्गात्मकम् । अस्य रचयिता कालिदासः।अस्य विषये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "व्रताचरणं समाप्य राजथानीमागता सुदक्षिणा प्रभावपूर्णं गर्भं धरति" इत्येतदंशं निरूपयन् अयं श्लोकः नन्दिनीवरप्रदाननामके द्वितीयसर्गे व्रतसमापनकथाभागे वर्तते।

पदविभागः - अथ,नयनसमुत्थम्,ज्योतिः अत्रेः, इव, द्यौः,
सुरसरित् ,इव, तेजः, वह्निनिष्ठ्यूतम्, ऐशम्,
नरपतिकुलभूत्यै, गर्भम्,आधत्त, राज्ञी,
गुरुभिः, अभिनिविष्टम्, लोकपालानुभावैः।।

अन्वयक्रमः - अथ, द्यौः अत्रेः नयनसमुत्थम् ज्योतिः इव, सुरसिरत् वह्निनिष्ठ्यूतम्, ऐशम्, तेजः इव, राज्ञी,नरपतिकुलभूत्यै, गुरुभिः,लोकपालानुभावैः,गर्भम्, आधत्त।

प्रतिपदार्थः - अथ=राजदम्पत्योः राजथानीं प्रति आगमनानन्तरम्, द्यौः=सुरवर्त्म, अत्रेः=महर्षेः, नयनसमुत्थम्,नयन=नेत्रयोः,समुत्थम् =उत्पन्नम्,ज्योतिः=चन्द्रज्योतिः,इव=यथा,सुरसिरत्=गङ्गा, वह्निनिष्ठ्यूतम्,वह्नि=अग्निना,निष्ट्यूतम्=क्षिप्तम्, ऐशम्=ईशसम्बन्धम्, तेजः=रेतः, इव=यथा, राज्ञी=सुदक्षिणा,नरपतिकुलभूत्यै,नरपति=राज्ञः दिलीपस्य कुल=वंशस्य,भूत्यै=अभिवृद्धये गुरुभिः = श्रेष्ठैः, लोकपालानुभावैः.,लोकपाल=अष्टदिगीशानाम्, आनुभावैः=अंशैः,अभिनिविष्टम्= अनुप्रविष्टम्,गर्भम्=भ्रूणम्, आधत्त=दधार।

श्लोकभावः;रात्रौ आकाशे चन्द्रः प्रकाशते खलु।चन्द्रः अत्रिमहर्षेः नयनाभ्याम् उत्थितः प्रकाशः। तं च द्यौः वहति। जलानां पक्वाधायकशीलता वर्तते।देवताकार्यार्थं ईश्वरः स्वकीयं अग्निप्रविष्टं तेजः गङ्गायां =जले निक्षिपति।जलानां पक्वशीलता एवमेव आगतेति पौराणिकं कथनम्। एवमेव महाराज्ञी सुदक्षिणापि लोकपालानां तेजोभिः पूरितं महिमान्वितं गर्भं धरति। तच्च परिपालनादक्षं कीर्तिकरं वंशोद्धारकं च भवति।इदं गर्भं दिलीपस्य वंशप्रतिष्ठायै समर्थं च भवति।

सन्धयः- लोकपालानुभावैः; लोकपाल+अनुभावैः = (अ + अ =आ) सवर्णदीर्घसन्धिः।

सुरसरिदिव; सुरसरित् + इव = (पदान्ततकारः, त् =द्)जश्त्वसन्धिः।

समासाः- नयनसमुत्थम्; नयनयोः समुत्थम् = षष्ठीतत्पुरुषसमासः।

सुरसरित्; सुराणाम् सरित् = षष्ठीतत्पुरुषसमासः।

कोशः; -द्यौः द्यौः स्वर्ग-सुरवर्त्मनोः (विश्वकोशः)

**स्वावलोकनप्रश्नाः -**

१.अत्रिनयनसमुत्थितं ज्योतिः किम् ?

## ११.३ उपसंहारः

एवं वसिष्ठः सुदक्षिणा-दिलीपाभ्यां गोसेवाव्रतं कारयति। नन्दिनीं च समाराधयति। नन्दिन्याः अनुग्रहं दापयति। सुदक्षिणा-दिलीपयोः गोसेवाव्रताचरणदीक्षां समापयति। विप्रैश्च सुदक्षिणा-दिलीपयोः आशीः दापयति ।व्रतान्तपारणाम् आयोजयति।ब्राह्मणान् दक्षिणाताम्बूलादिभिः सम्मानयति ।सुदक्षिणा-दिलीपौ राजथानीं प्रस्थापयति। सुदक्षिणा-दिलीपौ राजथानीं प्राप्नुतः।दिलीपः पुनः राज्यस्य पालनभारं स्वीकरोति।सुदक्षिणा च महिमान्वितं गर्भं धरति।

## ११.४ अभ्यासः

श्लोकद्वयं व्याख्यात -

१). इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीतितरा बभूव।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण।।

२). वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः।
औधस्यमिच्छामि तवोपभोक्तुम्, षष्ठांशमुर्व्याः इव रक्षितायाः।।

* * *

# अंशः-XII ; व्यासात्मकप्रश्नाः

संरचना

१२.०.परिचयः
१२.१.लक्ष्याणि
१२.२.व्यासात्मकप्रश्नाः
१२.२.१ नन्दिन्याः समाराधनम्
१२.२.२ वने दिलीपस्य लब्धं समादरणम्
१२.२.३ निलयाय गन्तुं नन्दिन्याः उपक्रमणम्
१२.२.४ नन्दिन्याः परीक्षणम्
१२.२.५ सिंहस्य निगदनम्
१२.२.६ दिलीपस्य प्रत्युत्तरम्
१२.२.७ सिंहस्य अभिभाषणम्
१२.२.८ देहार्पणाय दिलीपस्य विज्ञापनम्
१२.२.९ नन्दिन्याः अनुग्रहः
१२.२.१० नन्दिन्याः व्रतसमापनम्
१२.३.उपसंहारः
१२.४.अभ्यासः।

## १२.०.परिचयः

Diploma in Sanskrit Examination मध्ये , आहत्य पञ्च पत्राणि सन्ति।तत्र इदं द्वितीयं प्रश्नपत्रम्। अस्य च शतं १००अङ्काः भवन्ति। अत्र च विषयद्वयं भवति।रघुवंशः-द्वितीयसर्गः इत्ययम् एको विषयः।एतस्य कृते पञ्चाशत् ५०अङ्काः भवन्ति।त्रयः प्रश्नाः वर्तन्ते।तेषु व्यासात्मकः प्रश्नः अन्यतमः। अस्य च विंशति अङ्काः विद्यन्ते। तदर्थं विद्यार्थिनां कृते अत्र अभ्याससम्पादनं भवति।

## १२.१.लक्ष्याणि

प्रतिपाठ्यांशस्यापि अध्ययने विद्यार्थिनां प्रयोजनद्वयं साधनीयं भवति। तत्र वैयक्तिकं जीवनलक्ष्यम् एकम्।परीक्षादृक्पथम् (Examination Point Of View) अपरम्। पाठ्यांशः परीक्षादृष्ट्या अपि अभ्यसनीयः भवति। प्रश्नपत्रे व्यासात्मकप्रश्नलेखनाय आवश्यकः अभ्यासः अत्र सम्पाद्यते।एतत् पाठ्यांशस्य अध्ययनेन -

- संस्कृतभाषायां लेखनकौशलं वर्धितं भवति।
- संस्कृतभाषायां रचनाकौशलं सम्पादितं भवति।
- संस्कृतभाषायाम् आलोचनायै प्रेरणं दत्तं भवति।
- परीक्षादृक्पथं अभ्यासितं भवति,आर्जितं च भवति।

## १२.२.व्यासात्मकप्रश्नाः

## १२.२.१ नन्दिन्याः समाराधनम्

नन्दिन्याः समाराधनाय नेपथ्यम्

दिलीपः मनुवंशीयः।सुदक्षिणा मगधवंशजा। तौ च राजदम्पती।तयोः चिरं सन्ततिः न भवति। इक्ष्वाकूणां गुरुः वसिष्ठः। सः तेषाम्, मानवीयानां दैविकानां च आपदां प्रतिकर्ता। अतः सुदक्षिणा-दिलीपौ सन्ततिस्तम्भारणं ज्ञातुं वसिष्ठम् उपसर्पतः।वसिष्ठश्च स्वदिव्यशक्त्या सन्ततेः स्तम्भकारणं जानाति। ज्ञातं कारणं च राजदम्पत्योः निवेदयति। प्रतिक्रियाम् अपि आदिशति। तौ च गुरोः आदेशं शिरसि धरतः। आश्रमे समयोजितं आवासम् एव स्वीकुरुतः।नन्दिन्या व्रताचरणाय उद्युक्तौ भवतः।

सुदक्षिणा-दिलीपाभ्यां निशा यापिता। प्रातः भवति।सुदक्षिणा भक्त्या श्रद्धया च नन्दिनीं पूजयति। चन्दनेन मुखं ,मालया च कण्ठं अलङ्करोति। दिलीपः नन्दिन्याः सुतां प्रातः कालिकं पयः पाययति। तत्रैव गोशालायां प्रतिबध्नाति च। एवं दिलीपः आश्रमे नन्दिनीसम्बन्धितान् लाञ्छनान् समापयति, समाराधयितुं नन्दिनीं वनाय विसृजति।

सुदक्षिणा दिलीपस्य धर्मपत्नी। सा स्वप्रवर्तनेन श्रद्धा-आसक्तिभ्यां च पतिव्रतानां मध्ये प्रथमं परिगणिता भवति। तत्र आश्रममार्गः नन्दिन्याः पादार्पणेन पवित्रः भवति। तम् एव मार्गम् अनन्यभक्त्या सुदक्षिणा अनुसरति। यथा स्मृतिः वेदेन उक्तम् अर्थं प्रतिपादयन् अनुगच्छति, तथा सुदक्षिणा अपि नन्दिन्या क्षुण्णं मार्गम् एव अनुसरति।

दिलीपः परस्य क्लेशान् जानाति। अत एव अयं कारुणिकः सम्पन्नः। सुदक्षिणा नन्दिन्याः मार्गं अनुसरति। सन्ततिप्राप्तौ सोत्कण्ठा खलु सुदक्षिणा। अतः धर्मलोपभयात् नन्दिन्याः खुरक्षुण्णं यावत् अरण्यमार्गं अनुसर्तुं साभिलाषेव दृश्यते। सुदक्षिणायाः सौकुमार्यम्, आरण्यकं क्लेशम् उभयं जानन् दिलीपः 'वनमार्गगतानां क्लेशानां अनभिज्ञा इयम् ,क्लेशान् न सहते' इति मत्वा सुदक्षिणां वारयति। दिलीपः चतुस्सागरपर्यन्तं भूमेः पालकः। सः भूमिं सर्वं एकछत्राधिपत्येन अवलीलया पालयति। प्रकृते - चत्वारः समुद्राः - चत्वारः स्तनाः जाताः,भूमिश्च गौस्सम्पन्ना। एवं साक्षात् गोरूपधराम् उर्वीमिव नन्दिनीम् अनायासेन पालयति।

दिलीपः समाराधनाय नन्दिन्याः अनुयायी भवति।दयाबुद्ध्या सुदक्षिणाम् वारयति। अनावश्यकमिति बुद्ध्या अवशिष्टं च अनुयायिवर्गं निवारयति। एकाकी एव नन्दिन्याः व्रतानुष्ठानपरो भवति। तथाहि - निबद्धतया परिरक्षणीयेषु अन्येषु महनीयेषु सत्सु मनुवंशीयानाम् आत्मसंरक्षणविषये अनास्था अधिका। आत्मनः रक्षणविषये न तथा श्रद्धावन्तो भवन्ति। स्वपरिरक्षणार्थं ते प्रत्येकं यन्त्राङ्गं नानुमन्यन्ते। यदि कदाचित् विधिवशात् स्वस्य रक्षणावश्यकता समापतति, तदा स्वीयेनैव पराक्रमेण मनुवंशसन्ततिः आत्मानं रक्षितुं सिद्धो भवति, समर्थः अपि भवति।

**नन्दिन्याः समाराधनम्**

दिलीपःचतुस्सागरपर्यन्तां भूमिं एकच्छत्राधिपत्येन पालयति। अतः सः सम्राट् भवति। तथापि अहङ्कारम् अपहाय दिलीपः निबद्धस्सन् श्रद्धया नन्दिन्याः सेवां आरचयति। तथाहि- राजा दिलीपः सुदक्षिणाम् अनुयायिवर्गं च निवर्तयति ।नन्दिन्याः अनुयायी भवति।अरण्यं प्रविशति। तत्र रुचिकरः बालतृणः वर्तते। तम्,उत्पाट्य कण्टकादीन् अपसारयति।,शुभ्रं करोति।कबलान् आरचयति।नन्दिन्याः मुखाय अर्पयति।

दिलीपः नन्दिन्याः समाराधनाय अरण्यं खलु प्रविशति,तत्र वनमक्षिकाः अधिकाः भवन्ति।नन्दिनीं परितः आवहन्ति। नन्दिन्याः असौकर्यं कुर्वन्ति। शरीरे निपतन्ति। रक्तं पिबन्ति।रक्तस्य पानसमये नन्दिन्याः शरीरे पतनस्थले कण्डूतिः जायते। तं जानन् श्रद्धशीली दिलीपः समुचितैः उष्णदायकैः करस्पर्शैः तदसौकर्यं दूरीकरोति। यदा पतनोत्सुकाः सन्तः परितः भवन्ति तदा तान् हस्तप्रसरणैः निवारयति।

सामान्यतः पशवः स्वेच्छाचारिणः भवन्ति। पशुपालकास्तु पशूनां स्वेच्छागमनं नैव सहन्ते। स्वेच्छागमनं अवरुन्धन्ति । पशून् ताडयन्ति च। प्रकृते - नन्दिनी पशुजातीया खलु। तथापि दिलीपः पशुपालकपात्रं अस्वीकृत्य नन्दिन्याः स्वेच्छासञ्चरणं कल्पयति। एवं दिलीपः मुखाय रुचिकराणां बालतृणानां समर्पणैः, उष्णदायकैः करस्पर्शैः, वनमक्षिकाणाम् अपसरणैः अप्रतिहतैः स्वेच्छागमनैश्च,नन्दिन्याः समाराधने आसक्तः भवति।

दिलीपः राज्यानाम् अधिनेता।अखिलस्य भुवः पतिः। अतः सः सम्राट् =सार्वभौमः भवति। तथाऽपि अयं नन्दिनीं छाया इव अनुगच्छति। तथाहि- दिलीपस्यापि शारीरकाः अवसराः भवन्ति एव। तान् अपि अवश्यम् अयं संसाधयेत्।परन्तु तान् सर्वान् निरुध्य नन्दिनी यावत् उत्थिता भवति तावत् अयम् अपि उत्तिष्ठन् एव तं पालयति।यदा तृणखादनाय वा,स्वेच्छागमनाय वा अन्यत्र चलति,शरीरस्य स्तब्धताम् अपि निराकृत्य तदैव उच्चलितस्सन् समाराधयति।यदा यावत् नन्दिनी भूमौ शरीरं प्रसार्य उपविशति, तदैव, तावदेव दिलीपोऽपि उपविशति।यदा वा जलं पातुं इच्छति नन्दिनी, तदैव जलं च पातुं स इच्छति। एवं नन्दिनीं स्वस्याः छाया यथा अनुसरति तथा दिलीपः नन्दिनीम् अनुगच्छति।

## १२.२.२ .वने दिलीपस्य लब्धं समादरणम्

**दिलीपस्य वर्णनम्**

तपोवनानि विनीतवेषेण प्रवेष्टुम् अर्हाणि भवन्ति।अतः सार्वभौमोऽपि दिलीपः छत्रचामरादीनि सकलानि राजलाञ्छनानि अपहायैव आश्रमं प्रविशति। नन्दिनीं समाराधयितुं तथैव अरण्यमपि प्रविशति। अरण्येषु च युवावस्थाम् आपन्नाः गजेन्द्राः वर्तन्ते। ते च मदेन पूर्णाः सन्तः बलिष्ठाः भवन्ति। परं मदं तु न आविष्कुर्वन्ति। प्रकृते-अरण्ये राजचिह्नानि अपहाय, तेजोविशेषानुमितया मुखकान्त्या नूनम् अयं राज्याधिनेता'क्षत्रियः' इति ज्ञायमानः दिलीपः, मदम् अनाविष्कुर्वन् ,अन्तः एव मदेन पूर्णः द्विपेन्द्रः इव अक्ष्णाम् आनन्दं जनयति।

साधारणतः अरण्ये मृगयार्थं किरताः चरन्ति। ते च केशान् उन्नमय्य बध्नन्ति। धनुश्च सन्धितं कृत्वा हस्ते धरन्ति। मृगान्  हन्तुं वनं तीक्ष्णतया विचरन्ति च।  किरातानाम् एतत् सामान्यं प्रवर्तनम् । प्रकृते- दिलीपः  किरीटं विना विनीतेन वेषेण आश्रमं प्रविशति । अतः केशानां विकीर्णतां परिहर्तुं अरण्ये ,कुटिलाभिः तन्तुभिः ऊर्ध्वं बध्नाति ।दिलीपः च नन्दिन्याः समाराधनाय रक्षणाय च अरण्यम् आगच्छति।अतः सन्धितं धनुश्च धरति। एवम्-अरण्ये कुटिल लताभिःकेशान् ऊर्ध्वं आबध्य,अधिज्यधन्वा सन्,नन्दिन्याःपालकत्वेन अरण्यं प्रविष्टः दिलीपः, क्रूरजन्तूनाम् मदं दमयितुम्=शिक्षयितुम्,इव, च सर्वम् अरण्यम् अतिविस्तृतं , सुसूक्ष्मं विचरति।

दिलीपःनन्दिन्याः समाराधको भवति ।अरण्यं प्रविशति। तत्र दिलीपस्य मार्गम् उभयतः वृक्षाः सन्ति। तेषां शाखासु उन्मत्ताः पक्षिणश्च वसन्ति। ते पक्षिणश्च किलकिलरवं कुर्वन्ति। अयं च सन्निवेशः अनुचरवर्गं विहाय नन्दिन्याः संरक्षणव्याजेन अरण्यं प्रविष्टस्य दिलीपस्य पार्श्वस्थाः आरण्यकाः वृक्षाः वयसां विरावैः"जय! महाराज! पदम् अवधार्यताम् "इति स्वागतवचनं व्याहरन्ति इव अवभासते।

दिलीपः तेजसा स्वभावेन च अग्निसदृशः, पवित्रः अस्ति। अतः पूज्यश्च भवति । नन्दिन्याः समाराधनव्याजेन अरण्यं प्रविशति । अरण्ये च वायुः प्रसरति।बाललताश्च ईषत् चलन्ति। तासां पुष्पाणि भूमौ ,तथैव दिलीपे च, पतन्ति । अयं च सन्निवेशः,पुरप्रवेशे पौरकन्याः आचारलाजैः  राजानम् इव , नन्दिन्याः समाराधनव्याजेन अरण्यं प्रविश्य, आरात् अभिमुखम् आगच्छन्तं दिलीपं बाललताः प्रसूनैः, अवाकिरन्।दिलीपस्य पुरः प्रवेशे पौरकन्याः लाजान् विकिरन्ति । स च आचारः अरण्येऽपि समनुष्ठितः इव आभाति।

दिलीपः नन्दिन्याः पालनार्थं खलु अरण्यं प्रविशति । अतः धनुः धरति । अरण्यम् आगच्छति। सामान्यतः धनुर्धारिणं दृष्ट्वा सर्वे मृगाः भयम् आप्नुवन्ति।  तथैव हरिणाश्च । तत्रापि हरिण्यः इतोऽप्यधिकम्। परन्तु निश्चलाः निर्मलाः प्रसन्नाः मनोभावाः दिलीपस्य करुणान्तरङ्गं  मृगान् प्रोत्साहयन्ति। दिलीपस्य कोमलस्वभावं प्रकटयन्ति। अतश्च दिलीपः अभिगम्य एव इति निर्भयं सानन्दं सोल्लासं दिलीपं पश्यन्ति। सहजतया हरिणीनां नेत्राणि प्रकामं विस्तृतानि। प्रकृते धनुर्धारिणम् अपि दिलीपं दृष्ट्वा, भयमपि अनवाप्य स्वेषां नेत्राणां प्रकामं विस्तारस्य फलं प्राप्नुवन्ति इव हरिण्यः निर्भयं चरन्ति।

दिलीपः नन्दिन्याः समाराधनाय अरण्यं प्रविशति । तत्र च वंशवृक्षाः सन्ति। ते  वर्षेषु सिक्ताः,आतपेषु शुष्काः च भवन्ति। अत एव रेखा रूपेण छिन्नाश्च भवन्ति। ईषत् छिन्न रेखामार्गेण वंशानाम् अन्तः  वायुना पूरितम्।पुनश्च सः  एव पूरितः वायुः  अन्यात् ईषच्छिन्नरेखामार्गात् च बहिः आगच्छति। तदा वंशः ध्वनिं करोति । सः वंशानां रवः= ध्वनिः वेणुनादं स्मारयति।दिलीपस्य वनप्रवेशश्च वनदेवतानां सन्तोषदायकः ।तं सन्तोषसन्दर्भं पुरस्कृत्य कुञ्जेषु वनदेवताः उच्चैः

दिलीपस्य कीर्तिम् गायन्ति। तथा वनदेवताभिः कुञ्जेषु उच्चैः गीयमानं स्वं यशः श्रुत्वा दिलीपः आनन्दितः भवति।

नन्दिन्याः समाराधनाय दिलीपः अरण्यं प्रविशति खलु। तत्र अरण्ये गिरयः सन्ति,निर्झराः प्रवहन्ति। जलपाताश्च भवन्ति।अनिलश्च निष्कलुषस्सन् प्रवहति।वृक्षाश्च वर्तन्ते। ते च वायुना ईषत् कम्पिताः भवन्ति,स्वयं सुमनोहरं सुगन्धं प्रसारयन्ति। स च शरीरस्य सुखस्पर्शं मनसः उल्लासं च कल्पयति। अयं च सन्निवेशः- व्रताचरणाय खलु दिलीपः अरण्यं प्रविशति। स च साम्राट् , तथापि नन्दिन्याः समाराधनं विनीतेनैव वेषेण कार्यं खलु। अतः आतपत्रं विनैव नन्दिन्याः सेवाम् अनुतिष्ठति । एवम् अनातपत्रः अपि, स्वीयं धर्मं = नन्दिन्याः समाराधनरूपं धर्मम् आचरति।अतः आतपे भृशं क्लिन्नः च भवति ।एवं स्वस्य धर्मस्य आचरणेन पवित्रस्सन्, आतपे क्लान्तं दिलीपं ,गिरिनिर्झराणाम् तुषारैः पृक्तः सुगन्धभरितश्च वायुः संसेवते। दिलीपशरीरस्य सुखस्पर्शं मनसः उल्लासं च कल्पयति।

राजा गोसेवा व्रताचरणाय अरण्यं प्रविशति। अरण्ये तस्य च प्रवेशनं प्रभावपूर्णं महिमान्वितं च भवति। तथाहि - दिलीपे अरण्यं प्रविशति सति, विनैव वर्षं दवाग्निः शमनं प्राप्नोति।अरण्ये वृक्षाः अधिकं फलन्ति।अधिकं पुष्यन्ति च।सामान्यतः अरण्येषु क्रूरजन्तवः साधुजन्तून् बाधन्ते। परं दिलीपे प्रविशति तु जन्तुषु अधिकाः सिंह-व्याघ्र-भल्लूकादयः ऊनान् हरिणादीन् साधुजन्तून् न बाधन्ते। एवंविधमहिमासम्पन्नः प्रभावपूर्णश्च दिलीपः । उदारचरितवतः दिलीपस्य प्रवेशेन वनम् एवं समृद्धं सुसम्पन्नं च दृश्यते।

## १२.२.३ निलयाय गन्तुं नन्दिन्याः उपक्रमणम्

दिलीपः नन्दिन्याः समाराधनाय अरण्यम् आगच्छति,स च श्रद्धया नन्दिन्याः सेवायाम् आसक्तो भवति। दिलीपेन सेव्यमाना नन्दिनी च ताम्रा, अरुणवर्णा।नन्दिनी पर्यटनेन अरण्यस्य चतुरःभागान् पवित्रं करोति।अत्रान्तरे सायं भवति,निलयाय गन्तुं च उद्युक्ता भवति। एवम् एव सूर्यस्य सायं प्रभा अपि अरुणा। सा च किरणव्यापनेन दिगन्तराणि शुद्धं शुभ्रं च करोति।ततश्च सायं भवति,अस्ताद्रिं गच्छति।अर्थात्-सन्ध्यारुणा सूर्यप्रभा स्वीयव्यापनेन दिगन्तराणि पूतानि कृत्वा दिनान्ते अस्ताद्रिं गन्तुं यथा प्रक्रमते तथा पाटलारुणा नन्दिनी अपि स्वीय पर्यटनेन चतुरः दिग्भागान् पवित्रं कृत्वा दिनान्ते मुनेः आश्रमं गन्तुं प्रक्रमते।

दिलीपेन सेव्यमाना नन्दिनी च आश्रमे बहुलान् अर्थान् साधयति । सा च देवताकार्याणां यज्ञ-यागादीनाम् अपेक्षितं हविरादिकम् आरचयति। पितृकार्याणां श्रद्धादीनां निर्वर्तनाय आवश्यकं पयः दधि आज्यादिकं साक्षात् साधयति। आश्रम् आमागच्छतां अतिथीनाम्

अभ्यागतानां च आवश्यकं भोजनादिकं आयोजयति। सायं नन्दिन्याः आश्रमगमने यदि कालातिपातः, तदा सर्वेषां एषां क्रियाणाम् अन्तरायः आपतति। दिलीपश्च आश्रमे नन्दिन्याः उपयोगिताम् आलोच्य अनुपदम् एव ताम् अनुसरति। एवं दिलीपेन अनुगम्यमाना नन्दिनी वेदविहितकर्मणा संलग्ना(मनोवाञच्छा) श्रद्धा इव विराजते।

**वनानां वर्णनम्**

सायं भवति। नन्दिनी निलयाय गन्तुं सङ्कल्पते । निवृत्तां नन्दिनीं दिलीपः अनुसरति। दिलीपः महानगरवासी खलु। प्राकृतिकसौन्दर्यस्य परोक्षवेत्ता एव सः। आरण्यकानां जीवनविधानम्, आरण्यकं सहजसौन्दर्यं द्रष्टुम् अवकाशः इदानीमेव जातः।तदेव वर्णयति,तथाहि- सायं भवति , मध्याह्नं यावत् सूर्यातपे पर्यटिताः आरण्यकाः वराहाः सूर्यातपं सोढुम् अशक्नुवन्तः, अल्पेषु पङ्कभूयिष्ठेषु जलाशयेषु निपत्य निपत्य शरीरतापं परिहरन्ति। ते सायम् आसीत् इति वराहाः समूहं समूहं पङ्कजलाशयतः तापं अपवार्य सानन्दं बहिः आगच्छन्ति। राजा तान् सोत्कण्ठं पश्यति।

मयूराः दिवा आहारार्थं परिभ्रमन्ति।सायं जातमिति इति बुद्ध्या निवासभूतानां वृक्षाणाम् अभिमुखम् आगच्छन्ति। ते च सोल्लासं आवासाय उन्मुखाः भवन्ति। आवासात् गमनसमये 'आहारो लभ्यते वा न वा इति' चिन्ता। आगमनसमये तु आवासं प्रति आगमनम् इति कृत्वा सोत्साहं आगच्छन्ति। तान् च पश्यति दिलीपः। हरिणाश्च प्राकृतिकाः बालतृणभूमीः अध्यास्य, रोमन्थम् अभ्यस्यन्ति।रोमन्थं च कुर्वन् आस्वादने तत्पराः आनन्दं अनुभवन्ति। तान् च पश्यति।आसन्नरात्रित्वात् अन्धकारश्च मन्दं मन्दं पदं क्षिपति। तेन च श्यामता अरण्ये किञ्चित् किञ्चित् आवृता भवति। तादृशानि अरण्यानि पश्यन् दिलीपः ,नन्दिन्या सह आश्रमं गच्छति

**आवृत्तिपथाधिष्ठानम्**

सायं भवति । नन्दिनी निलयाय गन्तुम् उत्सहते।दिलीपश्च नन्दिनीम् अनुसरति।एवं नन्दिनी-दिलीपौ तपोवनावृत्तिपथम्,अधिष्ठितौ भवतः।तथाहि-नन्दिनी प्रथमप्रसूता, वत्सदर्शनोत्कण्ठिता च। किञ्च नन्दिनी सायं यावत् तत्तत् स्वादु विशेषतृणवल्यादिकम् अधिकं खादति। वत्सस्य स्मरणात् विशेषतृणखादनाच्च नन्दिन्याः ऊधसि क्षीरस्त्रवणम् अधिकं पूर्णं भवति । तच्च भाराय जातम्।तस्य भारस्य वहने प्रयासवशात् नन्दिनी मन्दं गच्छति।दिलीपस्य वपुश्च महान् "व्यूढोरस्कः-वृषस्कन्धः,सालप्रांशुः,महाभुजः"इति प्राक् वर्णितम् अस्ति,एवं वपुषः गुरुत्वात् सः अपि शनैः एव नन्दिनीम् अनुसरति।एवं नन्दिनी-दिलीपौ उभौ अपि चारु गमनाभ्यां वसिष्ठाश्रमस्य आवृत्तिपथम् अधिष्ठितौ स्तः।

**सुदक्षिणायाः निरीक्षणम्**

सुदक्षिणा-दिलीपौ आदर्शदम्पती। परस्परानुरागिणौ एतौ।'मयि सन्तितिं जनयितुम् एव राजा नन्दिनीव्रताचरणदीक्षां स्वीकरोति।गुरोः आदेशं रेखामात्रम् अपि अनतीत्य अरण्ये च आतपकष्टादिकम् अपि अनुभवति इति सुदक्षिणायाः दिलीपे अनुरागातिशयः वर्तते। तेनैव आदरातिशयश्च वर्धते । अपि च प्रकृते सुदक्षिणा आश्रमे वर्तते। आश्रमः परिमितः। तत्र च

वातावरणम् परिमितम्। तादृशे आश्रमे प्रातः प्रभृति एकाकिनी कालं यापयति। अतःसुदक्षिणा आनुरगातिशयेन एकाकितया च दिलीपं प्रतीक्षते। अत्रान्तरे आश्रमस्य मार्गे नन्दिन्याः अनुयायी सन् दिलीपः दृष्टः। दृष्टञ्च तम् दिलीपं सुदक्षिणा उपवासदीक्षां स्वीकृत्य पिपासाम् अनुभूयमानाभ्याम् इव लोचनाभ्याम्, प्रेम्णा पीतवती=अत्युत्कण्ठतया पश्यति।

सायंकाले, दिलीपः नन्दिन्या सह आश्रमं प्रतिनिवृत्तः भवति। आश्रमप्राङ्गणं च प्राप्नोति। दिलीपेन च अनुगम्यमाना सती नन्दिनी आश्रममार्गं प्रविशति।नाम नन्दिनी पुरतः भवति, पश्चात् दिलीपः अनुगच्छति।आश्रमं प्राप्तां च नन्दिनीं स्वागतीकृत्य अर्चयितुं सुदक्षिणा अभिमुखम् आयति।एवं नन्दिनी आश्रमप्राङ्गणे पथि दिलीपेन पुरतः कृता, सुदक्षिणया च अभिमुखीकृता सा नन्दिनी, दिवसः रात्रेश्च मध्यगता सन्ध्याकान्तिः इव विराजते।

**सुदक्षिणायाः अर्चनम्**

सुदक्षिणा हरिद्रा-कुंकुम-गन्ध-अक्षतैः पूजापात्रं हस्ते धरति ।नन्दिनी पयस्विनी,अधिकं पयः ददाति। सुदक्षिणा नन्दिन्याः त्रिवारं प्रदक्षिणं करोति ।नमस्कारं च आचरति।नन्दिन्याः फालभागः (श्रृङ्गान्तरम्) सुविशालः। अर्थसिद्धेः द्वारभूतम् इव च वर्तते।तदृशं नन्दिन्याः श्रृङ्गान्तरं श्रद्धया अर्चयति ।

**नन्दिन्याः पूजास्वीकरणम्**

नन्दिनी सकृत्प्रसूता, एकसन्ताना, स्ववत्सायां नन्दिन्यां वात्यल्यं च सहजम्।प्रातश्च व्रताचरणाय वनं विसृष्टा। सायं पुनः आश्रमम् आनीता। आगमनानन्तरम् अपि आश्रमे पूजादिभिः आलस्यं क्रियते। अन्या या काचन माता चेत् कुपिता अपि भवति। नन्दिनी खलु ,निश्चला सती सुदक्षिणायाः प्रत्युद्गमनम्, प्रदक्षिणम्, प्रणमनम्, पूजनम्, इत्यादिकं,प्रीतिभावेन, स्वीकृता इति राजदम्पती सुदक्षिणादिलीपौ अपि प्रकामं सुन्तुष्टौ भवतः।

**वसिष्ठाय निवेदनम्**

'सहनम्-सामर्थ्यम् ' इत्येतौ द्वावपि परस्परं विरुद्धौ गुणौ, एतौ प्रयाशः एकत्र न भवतः। दिलीपस्तु विरुद्धगुणामाम् आश्रयः । दिलीपः समर्थवान् - स्वभुजेनैव रिपून् उच्छिन्नवान्। एवं बाहुबलसमपन्नः अपि दिलीपः ऋषिदम्पत्योः विधेयस्सन्,तद्दिवसीयान् नन्दिन्याः व्रतानुष्ठानगत-विशेषान् निवेदयति।अयं नियमशीलः ।सायंकालीनं विधिविहितं सन्ध्यावन्दनादिकं आचरति। निबद्धशीलस्सन् भारं अलसतां वा अमत्वा, श्रद्धया दिलीपः, दोहनानन्तरं पुनः नन्दिनीं एव सेवते। एवं दिलीपः आश्रमे अपि कामुदुघायाः नन्दिन्याः समाराधने आसक्तः जातः।

**सुदक्षिणा -दिलीपयोः अहोरात्रं सेवनम्**

सुदक्षिणा दिलीपौ अहोरात्रं नन्दिन्याः व्रतस्य अनुष्ठानपरौ भवतः। दिलीपः नन्दिन्याः पोषकः।पोषकश्च पशूनानम् क्षुण्णिवारणार्थं आहारं समायोजयेत्। दिलीपश्च रात्रौ नन्दिन्याः अपेक्षितं आहारादिकं समीपे एव, समायोजयति। क्रिमिकीटकादिभ्यः प्रमादं वारयितुं दीपम् अपि प्रज्ज्वलयति। पार्श्वतः स्थापयति।नन्दिनीं च पालयति। सुदक्षिणा च सहचरी भवति।

नन्दिनी च विश्राम्यति। क्रमेण च निद्रां गच्छति। निद्रितां नन्दिनीम् अनुसृत्यैव सुदक्षिणा दिलीपौ अपि निद्रितौ भवतः। प्रातः एव स्वापात् नन्दिनी उत्तिष्ठति। ताम् अनु एव राजदम्पती अपि उत्थितौ भवतः। एवम् सुदक्षणिणा-दिलापौ अहोरात्रं नन्दिन्याः सेवने आसक्तौ भवतः। एकविंशति दिनानि यावत् पूजनम् । एवं सन्तानार्थाय विधये अहर्निशम् नन्दिन्याः व्रतम् आचरतः दिलीपस्य त्रिगुणानि सप्तदिनानि एकविंशतिदिनानि व्यातीतानि भवन्ति।

## १२.२.४ नन्दिन्याः परीक्षणम्

### नन्दिन्याः गुहाप्रवेशनम्

दिलीपः व्रताचरणाय नन्दिन्याः अनुचरः भवति। तस्य च नन्दिन्याः समाराधने एकविंशति दिनानि व्यतीतानि भवन्ति। नन्दिनी,दिलीपस्य गुरौ भक्तिभावं, स्वास्याम् अनुकम्पाभावं च ज्ञातुं संकल्पते। द्वाविंशतितमे दिने परीक्षितुं प्रक्रमते। व्रताचरणाय दिलीपः हिमालयप्रान्तं खलु आगच्छति। तत्र च प्रदेशे गङ्गाप्रवाहपतनप्रदेशाः विद्यन्ते, तत्र शीकारैः वर्धितं बालतृणम्,तेन च हरिताः पर्वतपर्यन्तभूमयश्च सन्ति।दिलीपं परीक्षितुं सङ्कल्पिता नन्दिनी, तत्र स्थिताम् अन्यतमां पर्वतपर्यन्तगुहां प्रविशति।

### सिंहस्य उत्पतनम्

नन्दिनी सौरभेयी, कामधेनोः पुत्री, दिव्या महिमान्विता प्रभावपूर्णा च भवति। अतः व्याघ्रादिभिः तर्जयितुम् अशक्या, नन्दिन्याः व्याध्रादिभ्यः भीतिर्वा प्रमोदो वा न भवति इति, दिलीपः निर्भीकं हिमालयस्य शोभां द्रष्टुम् उपक्रमते। हिमालयः प्रकृत्या सुन्दरः खलु। तत्सौन्दर्यदर्शने तत्परश्च भवति।नन्दिनी गहां प्रविशति।दिलीपस्तु नन्दिनी कुत्र गता ? इति न पश्यति। अत्रान्तरे क्षणे एव कश्चन सिंहः हठात् नन्दिनीं आकर्षति, नन्दिन्याम् उत्पतति, नन्दिनीं पादाक्रान्तं च करोति।

### दिलीपस्य दृष्टेः निवर्तनम्

सिंहः नन्दिनीं बलात् आकर्षति, पादाक्रान्तं करोति। नन्दिनी भयेन चकिता भवति। आर्त्या उच्चैः आक्रन्दति। नन्दिन्याः आक्रन्दनं ह्रदयं विदारयति। हिमालयगुहासु प्रतिध्वनति च।तत् प्रतिध्वननं च नन्दिन्याः एव दीर्घाक्रन्दनस्य भ्रान्तिं जनयति।दिलीपः आक्रन्दनं शृणोति। अप्रमत्तः भवति।अनुपदम् एव अद्रिशोभा दर्शनात् निवर्तते च।यथा रश्मयः विशृङ्खलताम् अपवार्य गच्छतः मार्गात् अश्वादीन् निवर्तयन्ति, तथा नन्दिन्याः आक्रन्दनं हिमालयदर्शनात् दिलीपस्य दृष्टिं निवर्तयति।

### नन्दिन्युपरि स्थितस्य सिहस्य वर्णनम्

दिलीपः नन्दिन्याः आक्रन्दनं शृणोति। दृष्टिं निवर्तयति। अभिमुखे सिंहं पश्यति। स च बलात् नन्दिनीम् आक्रम्य उत्पतति। सन्निवेशम् इमम् एवं वर्णयति - अत्र नन्दिनी पाटलवर्णा,सन्ध्यारुणा,सिहश्च केसरी,केसराःअस्य सन्ति इति केसरी। हिमालयेषु च शिखरप्रदेशाः सन्ति।ते गैरिकादिधातूनां निलयाः सन्ति।तत्कारणात् एव पर्वतपर्यन्तभूमयः पाटलवर्णाः

भवन्ति। लोध्रद्रुमः कश्चन वृक्षविशेषः, तस्मिन् पुष्पाणि विकसन्ति।पुष्पविकासने हि केसराः भवन्ति। मृदुतां दुकूलतां स्निग्धतां च प्राप्य वृक्षस्य आशाखं विस्तार्य केसरिणः स्मारयति। प्रकृते दिलीपः, पाटलायां नन्दिन्यां विद्यमानं सिंहं - हिमालयस्य सानुषु गरिकादिधातुकारणतः पाटलीभूतायां भूमौ विद्यमानं प्रफुल्लं लोध्रद्रुमम् इव पश्यति।

**सिंहस्य हननाय दिलीपस्य उद्यमनम्**

दिलीपः सिंहः, सः सिंहः इव कार्यकारी,सूक्ष्मदर्शी शीघ्रगामी क्रियाशीली च। किञ्च दिलीपः दयावान् , शरणम् आगतानां त्राता भवति। प्रतापवान्,सर्वान् अपि रिपून् बलात् आकृष्य संहरति।एवं दिलीपः दयावान्, प्रतापवान्,च भवति। तथापि नन्दिनीं प्रमादात् वारयितुं विफलः भवति। तदर्थं दिलीपः भृशं पराभवं प्राप्नोति। अपि च नन्दिनी वसिष्ठस्य होमसाधनम्-बहुलान् अर्थान् साधयति।ताम् एतां हन्तुम् उद्युक्तः सिंहः अवश्यं वधार्हः भवति। अतः अनुपदम् एव दिलीपः,नन्दिन्याः हानिं चिन्तयतः सिंहस्य हननाय,निषङ्गात् शरम् उद्धर्तुम् इच्छति।

**बाहोः प्रतिष्टम्भनम्**

सिंहः नन्दिन्याम् उत्पतति।अनुपदम् एव तं संहर्तुं दिलीपः उद्युक्तः भवति। चापं च सन्धातुम् इच्छति। सायकम् आक्रष्टुं च दक्षिणं करं पुङ्खे प्रसारयति। स च तत्रैव संसक्तः भवति।तस्याम् अवस्थायां दिलीपःफलके चित्रितः शराणाम् उद्धरणे प्रयत्नवान् इव अवभासते।

**दिलीपस्य अन्तर्दहनम्**

दिलीपः स्वयं क्रियाशीली ,दयाशाली, प्रतापशाली च अस्ति।तथापि नन्दिनीं प्रमादात् निवारयितुं विफलप्रयत्नः भवति। तदर्थं पूर्वम्उप्रथमम्, एव दिलीपः पराभवं प्राप्नोति। इदानीं च बाहोः प्रतिष्टम्भात् कोपश्च वर्धते।समीपे एव स्थितम् अपराधिनं सिंहं किमपि कर्तुं स्वपराक्रमाः असमर्थाः भवन्ति इति दिलीपः खिन्नः भवति। आन्दोलनाम् एति। भोगी नाम सर्पः, भोगीणां बाह्यप्रभावः मन्त्रैः वनमूलिकाभिश्च अवरुध्यते। तदा स पराक्रमप्रभावः अन्तः एव स्थित्वा सर्पान् दहति। प्रकृते -मन्त्रैः, वनमूलिकाभिश्च अवरुद्धप्रभावः सर्पः यथा अन्तः स्वयं दहति,अपराधिनं शिक्षितुम् असमर्थैः पराक्रमैः दिलीपोऽपि नितान्तम् अन्तः दहन् दृश्यते।

## १२.२.५.सिंह-दिलीपयोः संवादः - सिंहस्य निगदनम् -१

**भाषणाय सिंहस्य उपक्रमणम्**

दिलीपः विचक्षणानां पक्षपाती। मनीषिणां माननीयश्च। मनुसन्ततिपरम्परायां प्रधानभूतः प्रसिद्धश्च। किञ्च अयं सिंहबलः। तथापि नन्दिन्याम् उत्पतन्तं सिंहं किम् अपि कर्तुं न पारयति।तदर्थम् एव खिन्नः भवति। अवमानभारं वहति। ततः पुनः बाहोः प्रतिष्टम्भेन परं विस्मितः भवति। आश्चर्यम् एति। ततश्च सिंहः मनुष्यवाचा भाषते। सिंहः कथं मनुष्यवाचा भाषते !इति पुनः विस्मयम् एति। एवं पदे पदे दिलीपं विस्मितं करोति।एवम् अनेकधा विस्मितं दिलीपं इतः अपि अधिकं विस्मापयन् सिंहः एवं वदति।

**प्रयासः मास्तु**

दिलीपः सिंहं हन्तुम् उद्युक्तः भवति। बाहोः प्रतिष्टम्भनेन अन्तःदहति।तदा सिंहः दिलीपम् – 'महीपाल ! राजन् दिलीप ! श्रमेण अलम्, व्यर्थप्रयासः कुतः।प्रयासः मास्तु। तव शस्त्राणि सर्वाण्यपि मां किमपि कर्तुं न पार यन्ति। प्रयुक्तानि अपि व्यार्थानि एव भवन्ति। परिमितशक्तिः वायोः वेगः पादपानाम् उत्पाटनार्थं भवतु नाम समर्थः, सः एव किं पर्वतान् उत्पाटयितुम् अपि समर्थः भवति ? भवतः प्रभावः वायुवेगसदृशः। अहं पुनः शिलोच्चयः। त्वत् प्रभावः मयि न प्रसरति ' ।

**सिंहस्य परिचयः - अहम् अष्टमूर्तेः किङ्करः**

'राजन् !दिलीप !अहम् अष्टमूर्तेः परमेश्वरस्य सेवकः। मम नाम कुम्भोदरः। अहं निकुमभेन सदृशः। परमेश्वरः कैलासवासी खलु। कैलासधवलः कश्चित् वृषभः तस्य अस्ति। स च तस्य वाहनम्। परमेश्वरः साक्षात् तं नाधिरोहति। प्रथमं मम पृष्ठे पादं निक्षिप्यैव वृषभं आरुरुक्षति। एवं परमेश्वरस्य पादार्पणेन पृष्टः पूतः । अतः माम् दिव्यम् अवेहि ?

**देवदारुवृत्तान्तकथनम्**

दिलीप ! पुरतः स्थितम् अमुं पश्यसि खलु। अयम् वृक्षः, देवदारुः,असौ पार्वत्याः सेचनजलस्य रुचिं जानाति ।पार्वती अमुं स्तनसदृशैःकनककलशैः परिषिञ्चति। आलवालादिकं च आरचयति,आतपात् रक्षति।पार्वती एवम् अमुं सुतनिर्विशेषं पोषयति, वर्धयति च। अतश्च अयं परमेश्वरस्यापि प्रीतिपात्रः भवति। अतः असौ वृषभध्वजेनउपरमेश्वरेण,अपि पुत्रीकृतः अस्ति।

**देवदारौ पार्वत्याः वात्सल्यम्**

दिलीप !अत्र कश्चित् वनद्विपः अस्ति।तस्य कदाचित् कपोले कण्डूतिः जायते।तदपनोदनार्थं कपोलेन देवदारुं घर्षति। तेन च देवदारोः त्वक् उन्मथिता भवति।पार्वती उन्मथितत्वचं देवदारुं पश्यति ।भृशं परि शोचति। सेनान्यः कुमारस्वामी, पार्वतीपरमेश्वरयोः प्रथमम् अपत्यम्। स च तारकासुरं संहरति। तारकसुरस्य वधाय देव-दानवयोः च प्रचण्डः युद्धः प्रचलति। तत्र दानवाः मायोपायैः बहुभिः शस्त्रास्त्रैः कुमारस्वामिनं ताडयन्ति। तीव्रं व्रणितं कुर्वन्ति।तम् दृष्ट्वा पार्वती शोचति। प्रकृते – उन्मथितत्वचं देवदारुं दृष्ट्वा पार्वती, असुरास्त्रैः ताडितं कुमारस्वामिनम् इव शोचति ।

**परमेश्वरेण मम नियोजनम्**

दिलीप ! वन्यद्विपः देवदारोः त्वक् उन्मथ्नाति। तदर्थं पार्वती तीव्रं शोचति। परमेश्वरः पार्वत्याः शोकम् अपाकर्तुं चिन्तयति। प्रतिक्रियां विचारयति । देवदारोः परिरक्षणाय, वनद्विपानां तर्जनाय च संकल्पितः भवति। अनुपदमेव किङ्करः अहम् परमेश्वरेण स्मृतः। अहं च सिहं विहितः। समीपम् आगतः जन्तुः एव मम आहारः इति अभ्यवहाराव्यवस्थां च कृतः। एवम् अहं परमेश्वरेण अस्मिन् अद्रिकुक्षौ नियुक्तः ।

**नन्दिनी मम आहारः**

दिलीप! परमेश्वरेण मम आहारव्यवस्था कृता अस्ति खलु।समीपागतजन्तुः एव आहारः इति परमेश्वरस्य आदेशः।तदनुसारं एषा नन्दिनी,इदानीं मम,आहारः भवति।किञ्च अहं मांसप्रियः,रुधिरपायी च।एषा नन्दिनी मासं भूयिष्ठा शोणितपारणा।अहं च क्षुधितः।यथा चन्द्रमसी सुधाउचन्द्रसम्पत्तिः,नाम चन्द्रस्य कलाः कान्तयश्च,एवंसर्वाः एताः सुरद्विषः राहोः तृप्त्यै भवन्ति,तथा परमेश्वरेण प्रतिपादिता शोणितपराणा इयं नन्दिनी क्षुधितस्य मम तृप्त्यै भवति ।

**अवमानभारं विहाय निवर्तस्व**

दिलीप ! एवम् त्वम् उपायशून्यः । तव मार्गान्तरं नास्ति। अवमानभारं त्यजतु,गच्छतु ! गुरौ च तवभक्तिः असमाना एव।भवान् अप्रमत्तस्सन् नन्दिनीं प्रमादात् रक्षितुम् प्रयतितवान् एव। विफल जातः इति तु अन्यदेतत्। गुरौ भक्तिं विना प्राणत्यागाय अपि कथं सिद्धः भवेः ? दिलीप ! श्रुणु ! पालकानां सर्वमपि वस्तु रक्षणीयम् एव। परं यद्वस्तु शस्त्रेणापि रक्षितुम् अशक्यम् – तद्विषये विफलता शस्त्रभृतां अप्रतिष्ठायै न भवति। सर्वथा असाध्ये कर्मणि शस्त्रभृतः किं कर्तुं पारयन्ति ' इति सिंहः दिलीपं निगदति।

## १२.२.६सिंह-दिलीपयोः संवादः - दिलीपस्य प्रत्युत्तरम्

**अवमानभारस्य शिथिलीकरणम्**

दिलीपः पुरुषाधिराजः ।पुरुषाणां पालकः। पुरुषाश्च बुद्धिजीविनः ।तादृशानां बुद्धिमाताम् राजा, दिलीपः। सिहः मृगाधिराजः ।मृगाणां पालकः। मृगाश्च बुद्धिहीनाः क्रूरजन्तवः। एवम् मनीषीणाम् पालकः, मृगाधिराजस्य दर्पमात्सर्यभूयिष्ठं प्रगल्भं वचः शृणोति।इषुप्रयोगे च बाहोः प्रतिष्टम्भःपरमेश्वरप्रभावात् जातः इति, अवमानम् अपनयति। अवमानभाराच्च मुक्तः भवति।

**दिलीपः इन्द्रेण सदृशः(भाषणाय दिलीपस्य उपक्रमणम्)**

दिलीपः भुजेन रिपून् उच्छिनत्ति।बलात् शत्रून् संहरति तादृशः प्रतापवान् पराक्रमशाली च दिलीपः। अयम् इतः पूर्वं अनेकवारं सहस्रशः बाणान् प्रयुक्तवान् एव। परम् इदानीं अत्रैव इदम्प्रथमतया विफलः भवति। निषङ्गे एव बाहुः संसक्तः भवति।तस्मिन् समये दिलीपं वर्णयति। बाणप्रयोगे इदम्प्रथमतया विफलः दिलीपः, वज्रायुधं धृत्वा, हस्तम् उत्क्षिप्य, वज्रं मोक्तुम् इच्छन्,त्र्यम्बकस्य वीक्षणेन जडीकृतः वज्रपाणिः =इन्द्रः,इव अवभासते। तादृशः दिलीपः सिंहम् एवं प्रति ब्रवीति।

**सिंहस्य विज्ञापनम्**

'मृगेन्द्र ! शरसन्धाने बाहोः प्रतिष्टम्भनेन अहं अवरुद्धचेष्टःअस्मि। भयचकितां नन्दिनीं रक्षितुं समर्थः न अस्मि। पराभवं च प्राप्नोमि। नन्दिनीं त्रातुम् असमर्थस्य मम दिलीपस्य, वचः, तव सिंहस्य, निश्चयेन परिहसनीयम् एव भवति। तथापि भवान् परमेश्वरस्य सेवकः खलु। परमेश्वरः इव त्वमपि सर्वेषां आन्तर्यं जानासि इति कारणतः किञ्चित् वक्तुकामः

अस्मि ‘इति दिलीपः सिंहं विज्ञापयति।

**नन्दिन्याः अनुपेक्षणीयता**

‘मृगेन्द्र ! परमेश्वरः सर्वमहान् अयं लोकाधीशः,लोकः चर-अचरात्मकः वर्तते।एतस्य सर्वस्य अपि लोकस्य सृष्टि-स्थिति-लयात्मकक्रियाणां परमेश्वरः कारणभूतः।सः निश्चयेन मान्यः एव । तस्य वचनम् अवश्यम् अनति क्रमणीयम् -तथापि मम इमां विज्ञापनाम् अवधरतु। तथाहि -मम गुरुः वसिष्ठः, मनुवंशीयानाम् आपदां प्रतिकर्ता। अग्न्याराधकः, यज्ञयागादीनाम् अनुष्ठाता। इयं नन्दिनी तस्य यागसाधनम्, यज्ञ-यागादीनाम् आवश्यकं पयः - दधि - आज्याधिकं सर्वं नन्दिनी आयोजयति। अतः मुनिहोमधेनुः अपि न उपेक्षितुम् अर्हा ‘इति दिलीपः सिंहाय नन्दिन्याः अनुपेक्षणीयतां विज्ञापयति।

**नन्दिन्याः विमोचनाय दिलीपस्य प्रार्थनम्**

‘मृगेन्द्र ! अङ्कागतसत्त्ववृत्तिः खलु भवान्। अहम् अपि अङ्कागतजन्तुः एव भवामि। मदीयेन शरीरेण क्षुधां निवारयितुम् प्रसन्नो भवतु।नन्दिनी आहिताग्नेः वसिष्ठस्य यागयाधनम्।सकृत् प्रसूता,एकसन्ताना च। आश्रमे अस्याः बालवत्सा दिवसावसाने सोत्कण्ठं स्वमात्रे नन्दिन्यैः प्रतीक्षते।मृगेन्द्र !सवत्यायाः दैन्यं विचारयतु।नन्दिन्याः यागसाधनत्वम् अपि अवगच्छतु, मद्देहार्पणाय अङ्गीकरोतु,नन्दिनीं मुञ्चतु ’ इति दिलीपः सिहं प्रार्थयति।

## १२.२.७ सिंह-दिलीपयोः संवादः - सिंहस्य (अभिभाषणम्) निगदनम् -२

**पुनः भाषणाय सिंहस्य उपक्रमणम्**

मृगेन्द्रःपरमेश्वरस्य पार्श्ववर्ती किङ्करः।सः दिलीपस्य समाधानाय किञ्चित् विहसति।परिहासं प्रकटयति। सर्वासाम् आपदाम् प्रत्यक्षतः परोक्षतः वा प्रधानं कारणं धनम्। तादृशस्य धनस्य अधिपतिः दिलीपः, कुबेरसदृशः। ‘सिंहः कथं दिलीपं भाषते’ इति अत्र चित्रीकरोति। अस्य सन्निवेशस्य प्रदेशः हिमशिखराणां पर्यन्तभूमयः सन्ति। हिमालयस्य गुहाश्च महत्यः भवन्ति।तत्र च अन्धकारः सान्द्रं व्याप्तः भवति। सिंहस्य दंष्ट्राः धवलतराः भवन्ति। प्रकृते च प्रकामं धवलतराणां स्वदंष्ट्राणां कान्तिभिः,गिरिगुहानां अन्धकारं दूरीकुर्वन् सिंहः,अर्थविभव सम्पन्नंदिलीपं, पुनः एवं वक्तुम् उपक्रमते।

**विचारमूढः प्रतिभासि**

‘राजेन्द्र ! दिलीप ! ते एकच्छत्राधिपत्यं सार्वभौमः अधिकारः अस्ति। प्रतिष्ठाकरं प्रजानाम् आदरणं वर्तते। सुन्दरञ्च शरीरं भवति । नवं वयः च विद्यते।एतानि चत्वारि प्रायशः एकत्र न भवन्ति। तदेतत् भवतः श्रयसे प्रतिष्ठायै च अलम्।एतेषां समावशः पुण्यकृतेषु भवादृशेषु एव भवति।एतत् महत् ऐश्वर्यम् अल्पीयस्याः नन्दिन्याः कारणतः हातुं अभिलषसि। परिशील्यमाने दिलीप ! त्वं न तथा विमृश्यकारी, किन्तु विचारे मूढः एव। आलोचना रहितः सन् कर्मसु प्रवर्तसे इति प्रतिभासि ‘इति सिंहः स्व(दिलीप)विचारमूढतां दिलीपाय बोधयति ।

**एकस्याः गोः संरक्षणाय दोहार्पणं युक्तं वा**

' राजेन्द्र ! दिलीप ! यद्यपि भवान् कारुणिकः,तथापि भवतः कारुणिकतादृष्ट्या अधिकाधिकं एका गैः परिरक्षिता भवति। जीवन् पुनः,दैविकेभ्यः मानुषेभ्यश्च प्रमादेभ्यः यावद्भुवः प्रजाः पिता इव पासि। एकस्याः गोः संरक्षणाय दोहार्पणं युक्तं वा,अखिलजगत्-रक्षणाय देहस्य विनियोगः युक्तः वा - स्वस्य प्राणव्ययेन एकस्याः धेनोः रक्षणापेक्षया शश्वत् आजीवितान्तं अखिलजगत्-त्राणं युक्तियुक्तं श्रेयोदायकञ्च भवति विचारयतु 'इति सिंहः दिलीपाय विवेकं बोधयति।

**गुरोः कोपं परिहर्तुं समर्थः**

'दिलीप ! वसिष्ठः कुलगुरुः। सः अग्न्याराधकः,यज्ञयागादीनाम् अनुष्ठाता। अग्निसदृशः पवित्रः, तस्य आदेशः शिरोधार्यः।गुरोः आदेशस्य भङ्गः दण्डनाय कल्पते इति,एकस्याः गोः अपराधविषये गुरोः दण्डनात् बिभेषि खलु,तादृशस्य भयस्य अवसरः एव नास्ति। त्वं गुरोः कोपम् अपि अपनेतुं समर्थःअसि। तथाहि - तव पशुसम्पत्तिः महती अस्ति।तत्रापि गोधनम् महत्,नन्दिन्यपेक्षया अधिकपयोदायिन्यः घटसदृश-ऊधवत्यः धेनवश्च कोटिशःसन्ति।ताः समर्प्य गुरोःकोपं परिहर्तुं समर्थः भवसि,गुरोः भयं मास्तु 'इति सिंहः दिलीपाय धैर्यम् उपदिशति।

**देहार्पणप्रयत्नात् विरमतु**

'दिलीप ! आत्मनः देहस्य अर्पणप्रयत्नात् विरमतु। तव ऋद्धंउ समृद्धिसम्पन्नं, राज्यम् अस्ति। देहार्पणेन राज्याधिकारः नष्टः भवति। तच्च न तथा विचारसहं विवेकयुक्तं वा भवति। राज्याधिकारः राज्ञः धन-कनक-वस्तु- वाहनादिसौकर्यान् समयोजयति। समृद्धं राज्यं केवलं भूलोकमात्रभिन्नम् ऐन्द्रं पदं व्यवहरन्ति। ऐन्द्रम् स्वर्गसमबन्धि ।राज्यम् भौमम्। तदेक एव भेदः ।अन्यत् सर्वं स्वर्गाधिपत्य-राज्याधिपत्ययोः समानम्। सौर्वभौमाधिकारः,प्रजानाम् आदरणम् ,युक्तं वयः, सुन्दरं वपुः एषा भवतः कल्याणपरम्परा। ताम् अनुभुज्य देहश्च ऊर्जस्वलःजातः। बलसम्पन्नम् इमं देहं अखिलजगत्-त्राणाय परिरक्षतु' इति सिंहः दिलीपं देहस्य अर्पणप्रयत्नात् विरमणं बोधयति।

## १२.२.८ सिंह-दिलीपयोः संवादः - देहार्पणाय एव दिलीपस्य विज्ञापनम्

मृगेन्द्रः दिलीपम् -विचारमूढ इव अवभासि, ऋद्धं राज्यं ऐन्द्रं पदं वदन्ति। कल्याण परम्पराणाम् भोक्तारं ऊर्जस्वलं आत्मदेहं परिरक्षतु, इत्येवं बोधयति। विरमति ।मृगेन्द्रेण उक्तं गिरिगुहासु प्रतिध्वनति।तच्च प्रतिध्वननं, हिमालयः अपि मृगेन्द्रेण उक्तम् एव,दिलीपस्य श्रेयसम् अभिलषन् प्रीतिभावेन अनूद्य भाषते इव भासते।

नन्दिनी सिहस्य पादैः आक्रान्ता भवति। भयेन च चकिता अस्ति।नन्दिन्याः अक्षिणी च कातरे जायेते। एकतः नन्दिनी दीना दिलीपं सापेक्षं पश्यन्ती अस्ति।अपरतः दिलीपः प्रकामं कारुणिकः, नन्दिन्याः दीनवदनेन तीव्रं चलितः भवति। दिलीपः मृगेन्द्रस्य अभिभाषणं शृणोति। पुनः सिंहं वचोभिः एवम् अनुकूलयितुम् प्रारभते।

**क्षत्रियशब्दः उदात्तः उत्तमः महोन्नतश्च**

'मृगेन्द्र ! कुम्भोदर! क्षत्रियशब्दः उदात्तः,उत्तमः,महोन्नतश्च। क्षतः नाम नाशः। क्षतात् त्रायते इति क्षत्रः। क्षतात् =नाशात् , त्रायते=रक्षति, इति क्षत्रशब्दस्य अर्थः। क्षत्रशब्दात् एव च क्षत्रियः शब्दः अपि निष्पन्नः भवति। आपदां निवारकः इत्यर्थे जगत्प्रसिद्धः। प्राणिनम् अरक्षित्वा ,गुरोः आदेशनम् अपालयित्वा, जुगुप्सितैः एतैः प्राणैः किं प्रयोजनम्। आपन्नम् अरक्षित्वा तद्विपरीततया व्यवहृत्य अहं क्षत्रियः कथं स्याम् - क्षत्रियविपरीतवृत्तेः मम राज्येन किं प्रयोजनम्। अतः मद्देहार्पणेन नन्दिनीं विसृजतु'इति दिलीपः सिंहाय क्षत्रियस्य प्राशस्त्यं विज्ञापयति।

**नन्दिनी दिव्या**

'मृगेन्द्र! वसिष्ठः अस्माकं कुलगुरुः, तस्य आदेशनं शिरोधार्यम्। सः च नन्दिन्याः व्रताचरणं पालनं च आदिष्टवान्। मया च अनुष्ठातव्यम् एव। अन्यथा गुरोः आदेशभङ्गः - अपराधः भवति। केटिशः अन्याः गावः नन्दिन्या कथं समाना भवन्ति?नन्दिनी कामधेनोः पुत्री, अतः नन्दिनीं कामधेनोः अनूनां दिव्यां जानीहि। नन्दिन्याम् अस्याम् तव उत्पनन्तु परमेश्वरस्य प्रभावेण जातं स्यात्,भवान् परमेश्वरस्य पार्श्ववर्ती खलु । इतरः कोपि नन्दिनीं मनसा अपि तर्जयितुं न शक्नोति। तस्मात् दिव्याम् एनाम् विमुञ्चतु ' इति दिलीपः सिंहाय नन्दिन्याः दिव्यत्वं विज्ञापयति।

**मुनेः क्रियार्थश्च भवेत् अलुप्तः**

मृगेन्द्र ! परमेश्वरेण प्रदिष्टकालः अङ्कागतसत्त्ववृत्तिः नैव परिहरणीयः। तव तु आहारः आवश्यकः। तव आहारश्च नैव अपहरणीयः। नन्दिनी च वसिष्टस्य यागसाधनम्, अस्याः संरक्षणम् मम विधिः। मृगेन्द्र ! यथा तव आहारः अपहृतः न भवेत् , मुनेः क्रियार्थश्च अलुप्तः भवेत् तथा उभयप्रयोजनसाधकतया मदीयदेहस्य अर्पणं समुचितं भवति। अहम् अपि समीपागतजन्तुः, परमेश्वरेण प्रदिष्टकालः एव। अतः मदीयदेहार्पणविनिमयेन इयं नन्दिनीम् इमां मुञ्चतु ' इति दिलीपः सिंहाय उभयोः प्रयोजनयोः साधकत्वं विज्ञापयति।

**आवयोः बाध्यताः भाराश्च समानाः**

'मृगेन्द्र!भवान् अष्टमूर्तेः किकरः,अहं वसिष्ठस्य शिष्यः।भवता परमेश्वरेण प्रदिष्टं पलनीयम्।मया वसिष्ठेन आदिष्टं संरक्षणीयम्। भवतः देवदारुवृक्षस्य परिरक्षणविषये भारः महान्।मम च नन्दिन्याः संरक्षणे बाध्यता च महती। एवं परतन्त्रयोः आवयोः उभयोः बाध्यताः भाराश्च समानाः। एतान् सर्वान् भवान् अपि सम्यक् जानाति। क्लिष्टकाले एव खलु सहकारः अपेक्षते। अपि च स्वयम् अव्रणितस्सन्, रक्ष्यं अपालयित्वा, नियोक्तुः अग्रे भवनम्, नियोक्तुः गुरोः क्रोधाय कल्पते। तेषाम् अग्रे स्थित्वा असमर्थतायाः निवेदनं उदात्तचरितानां अप्रतिष्ठायै भवति' इति दिलीपः सिंहाय उभयोः बाध्यताः भारांश्च विज्ञापयति।

**दिव्यानां भौतिकेषु अनास्था**

' मृगेन्द्र! भवान् दयावान्।परेषां हिंसनम् तव न अभिमतम्।अयं च मदीयः देहः भौतिकः,पञ्चभूतैः (पृथिवी -अप्-तेजो-वायु-आकाशैः) आरचितः। अहिंस्यत्वेन अयं भौतिकः देहः भवतः सम्मतः न चेत्-तदा मदीयेन यशश्शरीरेण उदरवृत्तिं पूरयितुं प्रसीद। दिव्यसम्बन्धिनां भवादृशानां, अवश्यं विध्वंसिषु मादृशानां भौतिकेषु पिण्डेषु अनिष्टता सहजा एव ' इति दिलीपः सिंहाय उदरवृत्तिं पूरयितुं यशश्शरीरं दर्शयति।

स्नेहितस्य प्रार्थनां निराकर्तुं नार्हसि

'मृगेन्द्र! स्नेहः सर्वदा सम्भाषणपूर्वकः भवति।सः च वनमध्ये समागतयोः आवयोः परिचयप्रदानादिसम्भाषणेन जातः।परस्परसहकारेण खलु स्नेहबन्धः पटिष्ठो भवति।परस्परविश्वसं च वर्धयति।इदानीं आवाम् स्नेहितौ। मृगेन्द्र! तव नियोजकः भूतानां नाथः परमेश्वरः; भूतेषु स्नेहवर्ती, भवान् च तस्य अनुगः सेवकः।अवश्यं भवान् अपि अत्यन्तं स्नेहशीली स्याः। अतः मृगेन्द्र! स्नेहितस्य मम प्रार्थनां निराकर्तुं नार्हसि ' इति दिलीपः सिंहाय स्नेहधर्मं बोधयति।

मृगेन्द्रः दिलीपस्य उपपादनापद्धतेः हेतुबद्धतायाश्च प्रीतः भवति। 'तथा' इति वदति। देहस्य समर्पणाय दीलीपम् अङ्गीकरोति। नन्दिनीं विसृजति। अनुपदमेव प्रतिष्टम्भात् बाहुश्च वियुक्तः भवति। दिलीपः अस्त्रम् उपसंहरति । अनन्तरं स्वदेहं मांसस्य पिण्डम् इव विधेयतया सिंहाय समर्पयति।

## १२.२.९ नन्दिन्याः अनुग्रहः

**आकाशात् पुष्पवृष्टिः**

दिलीपः मृगेन्द्रं बहुधा प्रार्थयति। स च स्वदेहार्पणाय दिलीपम् अङ्गीकरोति। दिलीपश्च विधेयतापुरस्सरं स्वदेहं मांसस्य पिण्डम् इव सिहाय अर्पयति।बाहून् प्रबध्य अधोमुखस्सन् सिंहस्य पुरतः तिष्ठति। सादरं सश्रद्धं सिहस्य उत्पतनं प्रतीक्षते। तस्मिन् एव क्षणे अकस्मात् आकाशात् विद्याधराणां हस्तेभ्यः मुक्ता पुष्पवृष्टिः पतति।

**दिलीपस्य सम्भ्रमः**

दिलीपः अकस्मात् आकाशात् पतन्तं पुष्पवृष्टिं पश्यति। ससंभ्रमेण आश्चर्यचकितः भवति। आनन्दम् अनुभवति।अत्रान्तरे 'वत्स! उत्तिष्ठ 'इति वचश्च आकाशे शृणोति। तच्च दिलीपस्य अमृतास्वादनसुखं जनयति। आश्चर्येण शिरः उत्क्षिप्य पश्यति। तदा उत्पतनस्य सिंहस्य स्थाने स्थितां प्रसन्नां वात्सल्यपूर्णां एकां नन्दिनीम् एव पश्यति, मृगेन्द्रः तु तत्र नैव भवति।

**नन्दिन्याः समाश्वासनम्**

एवं आश्चर्यचकितं दिलीपम् उद्दिश्य -'साधो ! दिलीप ! मायाम् उद्भाव्य त्वां परीक्षितवती। तावदेव। मम किमपि भयं अत्र न विद्यते।भगवतो वसिष्ठस्य प्रभावतः मृत्युः

अपि मां किमपि न करोति। किं पुनः एते सिंह - व्याघ्रादयः क्रूरजन्तवः।मम भयं नास्ति, भवान् स्वस्थचित्तः भवतु ' इति नन्दिनी दिलीपं समाश्वासयति।

**नन्दिन्याः अनुग्रहः**

'दिलीप ! गुरौ तव भक्तिः गरीयसी।मयि अनुकम्पा च अमोघा।अहं तव अनुकम्पया अधिकं प्रीता अस्मि। वरं वृणीष्व,पुत्र! दिलीप ! मां न केवलां पयोदायिनीं चिन्तय, किन्तु यद्यहं प्रसन्ना, मां कामदायिनीम् अपि जानीहि ' इति वदति। वरयाचनाय दिलीपम् आदिशति।

**दिलीपस्य याचनम्**

दिलीपः भुजबलसम्पन्नः।उद्यम्य स्वयं हस्तेन रिपून् संहरति।तथा स्वयं सम्पादितवीरशब्दः अयं दिलीपः। तथापि नन्दिन्याः विधेयः एव। अयं अञ्जलिं घटते। कीर्तिसम्पन्नं वंशोद्धारकं तनयं सुदक्षिणायां याचते। इह लोके प्रतिष्ठासम्पादनार्थं कीर्तिसम्पन्नं, पितॄणां पुण्यलोकावाप्यर्थं श्राद्धादीनाम् आचरणाय वंशोद्धारकं,च तनयं सुदक्षिणायाम् अभिलषति।

**पयः पानाय नन्दिन्याः आदेशनम्**

नन्दिनी इयं प्रस्रविणी,कामानां दोग्ध्री भवति। दिलीपाय 'तथा' इति पुत्रसन्तानं प्रतिशृणोति। अनन्तरं 'पुत्र !दिलीप ! पत्रस्य पुटे मदीयं पयः दुग्ध्वा पिबतु ' इति दिलीपं च आदिशति। दिलीपश्च वत्स-हुत-अवशेषं पातुं नन्दिनीं विज्ञापयति। नन्दिनी च अङ्गीकरोति।

## १२.२.१० नन्दिन्याः व्रतसमापनम्

**नन्दिनी -दिलीपयोः आश्रमं प्रति आगमनम्**

दिलीपस्य गुरौ भक्तिः गरीयसी। वत्सायां अनुकम्पा च अमोघा। वत्से अनुकम्पायाः, गुरौ भक्तिभावस्य च नन्दिनी अत्यन्तं प्रीता भवति। अतः वत्स-हुत-अवशेषं पातुं दिलीपस्य विज्ञापनांनन्दिनी अनुमोदते । अनन्तरं नन्दिनी -दिलीपौ हिमालयगह्वरात् अनायासेन आश्रमं प्राति आगच्छतः।

**वसिष्ठाय वरप्रदानस्य निवेदनम्**

नन्दिनी दिलीपाय पुत्रसन्तानं प्रसीदति।हिमालयात् नन्दिनी-दिलीपौ आश्रमं प्रति आगच्छतः। वरं प्राप्य दिलीपः प्रसन्नः प्रशान्तश्च भवति। वरप्राप्त्या दिलीपस्य मुखं च आह्लादकरं जायते। एवं प्रसन्नवदनः दिलीपः नन्दिन्याः वरप्रदानं प्रथमं गुरवे वसिष्ठाय निवेदयति। अनन्तरं सुदक्षिणायाः सकाशं गच्छति। तत्र दिलीपस्य प्रसन्नवदनम् एव, नन्दिन्याः वरप्रदानं आशंसति। तथापि दिलीपः पुनः उक्तम् इव स्वयं सुदक्षिणायै नन्दिन्याः वरप्रदानवृत्तान्तं कथयति।

**नन्दिन्याः पयः पानम्**

दिलीपः पवित्रशीलः,पुण्यात्मा।अपि च अयं साधुषु वत्सलः, स्नेहप्रवर्तनः।तादृशः अयं दिलीपः वत्सायाः पानस्य अनन्तरम्, होमार्थविधेश्च अनन्तरम् अवशिष्टं नन्दिन्याः पयः पातुं गुरोः अनुमतिं प्राप्य मूर्तीभूतं स्वीयं यशः इव तृष्णया पिबति।

**रघुवंशः द्वितीयसर्गः**

**राजथानीं प्रति सुदक्षिणा-दिलीपयोः प्रस्थानम्**

नन्दिन्याः अनुग्रहणेन सुदक्षिणा-दिलीपौ आनन्देन रात्रिं यापयतः।प्रातश्च वसिष्ठः नन्दिन्याः व्रताचरण दीक्षां समापयति। व्रातान्ते भोजनानि च आयोजितानि।अनन्तरं वसिष्ठः आर्षैः सुदक्षिणा-दिलीपयोः आशीर्वचनम् अपि दापयति। अनन्तरं वसिष्ठः राजथानीं गन्तुं सुदक्षिणा-दिलीपयोः अनुमतिं ददाति।

**सुखप्रयाणम्**

सुदक्षिणा-दिलीपौ रथम् अधितिष्ठतः। एतौ च सहनशीलौ रथमार्गश्च अनुकूलः सुखकरश्च वर्तते। तथाहि - मार्गे उच्चावचौ न स्तः। पथि पाषाणादिकं च नास्ति। अत एव रथचक्राणां परुषध्वनयः न श्रवणपथं आगच्छन्ति। रथश्च विलासतया विहरणशीलतया च गच्छति। मृदुना ध्वनिना साह्लादं प्रयाति। प्रकृते - यथा सुदक्षिणा दिलीपौ पुत्रसन्ततिवरं प्राप्य पूर्णमनस्कौ तृप्तिमन्तौ सुखसन्तोषिणौ स्तः, तथा इदमपि रथमार्गं श्रोत्राभिरामध्वनिना सुखं जनयन् गच्छति।

**जनानाम् आदरणम्**

सुदक्षिणा-दिलीपौ राजथानीं प्राप्नुतः। नन्दिन्याः व्रताचरणेन, नन्दिन्याः वरप्रदानेन च दिलीपः सन्तुष्टः भवति। उत्साही च भवति। राजथान्यां पौराश्च दिलीपम् अदृष्ट्वा बहुकालं भवति। सन्तानार्थं गोसेवा व्रताचरणेन च दिलीपस्य शरीरं सन्नं भवति। ओषधीनां पतिः चन्द्रः। तस्य उदयनं सर्वेषां सन्तोषजनकम् एव भवति। तं कियद्वा पश्यतु, तृप्तिस्तु नैव भवति। प्रकृते सदा चन्द्रस्य उदयं पश्यन् अपि, जनः यथा नैव तृप्तः भवति, एवं सुदक्षिणया सह राजथानीं प्रति आगच्छन्तं दिलीपं दृष्ट्वापि प्रजाः तृप्तिं न आप्नुवन्ति।

**राज्यभारस्य स्वीकरणम्**

दिलीपः राजथानीम् आगच्छति। पौराश्च इमं 'जयतु महाराज ! जयतु दिलीप !' इति अभिनन्दन्ति। दिलीपस्य प्रत्यागमनसन्दर्भं पुरस्कृत्य राजथानी ऊर्ध्वं पताकैः अलङ्कृता भवति । आदिशेषः भुवः भारं फणेषु वहति। फणानां बलं च अतिमहत्। दिलीपस्य भुजश्च आदिशेषस्य फणानां सदृशः। तादृशे बलसम्पन्ने भुजे पुनः राज्यभारम् आवाहयति।

**गर्भस्य प्रप्तिः**

चन्द्रः अत्रिमहर्षेः नयनाभ्याम् उत्थितः प्रकाशः।तं च द्यौः वहति। रात्रौ आकाशे चन्द्रः प्रकाशते खलु। स्वकीयं अग्निप्रविष्टं तेजः, ईश्वरः, देवताकार्यार्थं गङ्गायां(जले) निक्षिपति। जलानां पक्वशक्तिः अस्ति खलु। एवमेव महाराणी सुदक्षिणापि लोकपालानां तेजोभिः पूरितं महिमान्वितं गर्भं धरति। अयं च गर्भः दिलीपस्य वंश प्रतिष्ठायै समर्थं भवति। सः च गर्भः परिपालनादक्षं कीर्तिकरं वंशोद्धारकं च वहति।

## १२.३.उपसंहारः

एवम् अत्र पाठ्यांशम् आधारीकृत्य दश व्यासात्मकाः विषयाः आयोजिताः।एकैकस्मिन् विषये ये ये अंशाः भवन्ति , ते स्थूलाक्षरैः अपि दत्ताः। स्मरणसौकर्याय ते उपयुक्ताः भवन्ति।

## १२.४.अभ्यासः।

अ) दिलीपेन आचरितं नन्दिन्याः समाराधनं वर्णयत?

* * *

# अंशः-XIII; सन्दर्भवाक्यानि

संरचना

१३. ० परिचयः
१३.१ लक्ष्याणि
१३. २.सन्दर्भवाक्यानि
१३.२.१ मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।
१३.२.२ सम्राट् समाराधनतत्परोऽभूत्।
१३.२.३ छायेव तां भूपतिरन्वगच्छत्।
१३.२.४ प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः।
१३.२.५ तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या।
१२.२.६ भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरः फलानि।
१३.२.७ चित्रार्पितारम्भ इवावतस्थे।
१३.२.८ राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः।
१३.२.९ न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्छति मारुतस्य।
१३.२.१० शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशःशस्त्रभृतां क्षिणोति।
१३.२.११ अल्पस्य हेतोर्बहुहातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्।
१३.२.१२ महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः।
१३.२.१३ राज्येन किं तद्विपरीतवृत्तेः प्राणैरुक्तोशमलीमसैर्वा।।
१३.२.१४ इमामनूनां सुरभेरवेहि रुद्रौजसा, तु प्रहृतं त्वयाऽस्याम्।
१३.२.१५ न पारणा स्याद्विहता, तवैवं भवेदलुप्तश्च मुनेः क्रियाऽर्थः।
१३.२.१६ स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य, रक्ष्यं स्वयमक्षतेन।
१३.२.१७ एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु।
१३.२.१८ तद्भूतनाथानुग !नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम्।
१३.२.१९ औधस्यमिच्छामि तवोपभोक्तुम्, षष्ठांशमुर्व्या रक्षितायाः।
१३.२.२० पपौ वसिष्ठेन कृताभ्युनुज्ञःशुभ्रं यशो मूर्तमिवातितृष्णः।
१३.३ उपसंहारः
१३.४ अभ्यासः

## १३. ० परिचयः

Dipoma in Sanskrit Examination मध्ये इदं द्वितीयं पत्रम्। द्वितीयपत्रे च रघुवंशः - द्वितीयसर्गः इत्ययं Second Section भवति। अस्य कृते आहत्य पञ्चाशत् ५० अङ्काः सन्ति। त्रिविधाश्च प्रश्नाः भवन्ति। तत्र सन्दर्भव्याख्यानात्मकः प्रश्नः अन्यतमः।

तत्र चतुर्णां मध्ये द्वयोः वाक्ययोः सन्दर्भव्याख्यानं लिखितव्यम् अस्ति। एकैकस्य कृते पञ्च अङ्काः। एवम् आहत्य अस्य प्रश्नस्य 2x 5 =10 अङ्काः भवन्ति। अस्य प्रश्नस्य समाधानलेखनविधानं प्रति परिचयः अत्र दीयते।अस्य च समाधानं चतुर्भिः उपशीर्षकैः प्रचलति। ते च क्रमेण-

- वाक्यपरिचयः
- वाक्यसन्दर्भः
- वाक्यार्थः
- वाक्यभावः भवन्ति। तत्र

• वाक्यपरिचये पाठ्यांशस्य नाम, तस्य मूलग्रन्थस्य नाम,तस्य रचयितुः नाम ,तस्य कविता प्रशस्तिः संस्कृतसाहित्यस्य तस्य योगदानम् इत्येवं सामान्यसमाचारः सङ्ग्रहेण अत्र लभ्यते।

• वाक्यसन्दर्भे पुनः सन्दर्भपुरस्सरं ,नाम विशिष्य केन उक्तम्।कं प्रत्युक्तम्। कस्मिन् सन्दर्भे उक्तम् प्रधानतया किं निरूपयति इदम् वाक्यम् इत्ययं विषयः त्रचतुर्षु वाक्येषु लिख्यते।

• वाक्यार्थः अत्र वाक्यस्थप्रतिपदस्य अर्थः अन्वयक्रमम् अनुसृत्य दीयते।

• वाक्यभावः सन्दर्भवाक्यं श्लोकस्य पूर्वभागः वा उत्तरभागो वा खलु दीयते । तस्य वाक्यस्य सम्पूर्णश्लोकं स्मृत्वा, सम्पूर्णश्लोकस्य भावः पञ्चवाक्येषु कथ्यते।सः च नातिदीर्घं भवति , नातिह्रस्वमपि भवति।

छात्रः एतत् मनसि निधाय अत्र दत्तानाम् एव , अदत्तानाम् अपि कतिपयवाक्यानां सन्दर्भव्यख्यानलेखनविधानम् अभ्यसनीयं भवति।

## १२.१ लक्ष्याणि

भाषायाः श्रवणम् ,पठनम् , लेखनम्, भाषणम् इति चत्वारि कौशलानि सन्ति। एकैकस्य भिन्नानि उद्देश्यानि भवन्ति। परं भाषायाः पाटवसम्पादनाय चतुर्णाम् कौशलानां साधनम् आवश्यकं भवति। साहित्यस्य अध्ययने अपि परोक्षतया वा अन्तर्लीनतया वा एषां कौशलानां सम्पादनम् अपेक्षितं वर्तते। तत्र भागतया संक्षिप्तलेखनस्य अभ्यासं अधिगन्तुं अयं पाट्यांशः उद्दिष्टः। एतत् पाट्यांशस्य अध्ययनेन -

विस्तृते पाट्यांशे वाक्यस्य चयनाय प्रयत्नं करोति। तदर्थं श्रुतं स्मरति।यथाश्रुतं स्मर्तुं प्रयतते। नाम यथा प्रभावपूर्णं शृणोति तथैव प्रभावपूर्णं स्मरणं वहति।तदैव सुलभतया लिखति च। एवं श्रवण,लेखनयोः कौशलसम्पादनम् अत्र उद्दिष्टम् अस्ति। सङ्क्षिप्तं सरलं च विवरणं दातव्यमस्ति । तदर्थं बहुमुखतः तीव्रं पाट्यांशः पठनीयः भवति।तेन च पठनस्यापि कौशलस्य अभिवर्धनवम् अपरम् उद्दिष्टम् अस्ति।

## १३.२.सन्दर्भवाक्यानि

### १३.२.१.मार्ग मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरर्वगच्छत्।

वाक्यपरिचयः - इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूर्वकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति । अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "दिलीपः नन्दिनीं वनाय मुञ्चति। तां च सुदक्षिणा अनुसरति"इत्यंशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः -- श्रुतेः =वेदस्य, अर्थम् =अभिप्रायम्, स्फूर्तिम्, स्मृतिः = पराशर-यज्ञवल्क-मनु, प्रभृतीनां स्मृतिग्रन्थः, इव =यथा, अन्वगच्छत् =अनुसृता/अनुगता

वाक्यभावः - दिलीपः प्रजाभिमतः पालकः। तस्य धर्मपत्नी सुदक्षिणा। सा च स्वीयप्रयत्नेन, श्रद्धा - आसक्तिभ्यां च पतिव्रतानां मध्ये प्रथमं परिगणनीया जाता। समाराधनाय च दिलीपः नन्दिनीं वनाय च मुञ्चति। तत्र च आश्रममार्गः नन्दिन्याः पादार्पणेन पवित्रः भवति। तं च मार्गम् अनन्यभक्त्या सुदक्षिणा अनुसृतवती। श्रुतिः वेदग्रन्थः।स च सर्वत्र सूक्ष्मभूतः, तदर्थश्च विना विवरणं विश्लेषणं अवगन्तुं नैव शक्यते। अतः तदाशयस्य बहिरानयनार्थं अवतीर्णः ग्रन्थसमुदायः एव स्मृतिः। स च सर्वदा वेदोक्तार्थपरतयैव विषयान् उपस्थापयति।एवं यथा वेदोक्तार्थमेव स्मृतिः अनुगच्छति, तथा एव सुदक्षिणा नन्दिनीक्षुण्णम् एव मार्गम् अनुगच्छति इति भावः।

### १३.२.२.सम्राट् समाराधनतत्परोऽभूत्।

वाक्यपरिचयः - इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - नन्दिन्याः समाराधने दिलीपस्य तत्परतां निबद्धतां च निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

प्रतिपदार्थः- सम्राट्=सार्वभौमः दिलीपः, समाराधन=श्रद्धापूर्वकं, सेवने, तत्परः=निरतः निबद्धः आसक्तः, अभूत्=आसीत्।

श्लोकभावः दिलीपः चतुस्सागरपर्यन्तां भूमिं एकच्छत्राधिपत्येन पालयति। अतः सः सम्राट् भवति। एवमपि दिलीपः निबद्धस्सन् श्रद्धया नन्दिन्याः सेवां आरचयति। श्रद्धावान् पुरुषः यत्र यदा अवकाशः अवतरति,तत्र तदा तेनैव प्रकारेण तंअवकाशं समर्थतया सद्विनियोगं करोति। तथाहि- राजादिलीपः सुदक्षिणाम् अनुयायिवर्गं च निवर्त्य नन्दिन्याः अनुयायी सन् अरण्यं प्रविशति। तत्र रुचिकरः बालतृणः वर्तते। तम्,उत्पात्य कण्टकादीन् अपसार्य, शुभ्रं कृत्वा, कबलान् विधाय, मुखाय अर्पयति। तत् च अरण्यं खलु, तत्र वनमक्षिकाः अधिकाः भवन्ति। आवृत्य पशूनां असौकर्यं कुर्वन्ति। शरीरे निपत्य रक्तं पिबन्ति। रक्तपानसमये शरीरे तत् स्थले

कण्डूतिः जायते। तं जानन् समुचित-उष्णदायकैः करस्पर्शैः तदसौकर्यं दूरीकरोति। यदा पतनोत्सुकाः सन्तः आवृत्ताः भवन्ति तदा तान् हस्तप्रसरणैः निवारयति।सामान्यतः पशवः स्वेच्छानुसारिणः भवन्ति। पशुपालकास्तु पशूनां स्वेच्छागमनं नैव सहन्ते। स्वेच्छागमनं अवरुद्ध्य पशून् ताडयन्ति च। प्रकृते - नन्दिनी पशुजातीया खलु। तथापि दिलीपः पशपोषकपात्रं अस्वीकृत्य नन्दिन्याः स्वेच्छा सञ्चरणं कल्पयति।एवं दिलीपः रुचिकराणां बालतृणानां मुखादानैः, उष्णदायकैः करस्पर्शैः, वनमक्षिकाणाम् अपसरणैः अप्रतिहतैः स्वेच्छागमनैश्च,नन्दिन्याः समाराधनासक्तः अभवत्।

## १३.२.३.छायेव तां भूपतिरन्वगच्छत्।

वाक्यपरिचयः - इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाक्याम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूर्वकालीनः। संस्कृतकाव्य साहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः जाता। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - नन्दिन्याः समाराधने दिलीपस्य सहनशीलतां निरूपयत् इदं वाक्यं द्वितीय-सर्गे वर्तते।

वाक्यार्थः - भूपति=भूपालकः दिलीपः, छाया=प्रतिबिम्बमिव, अनु+अगच्छत्=अन्वसरत्।

वाक्यभावः - दिलीपः राज्यानाम् अधिनेता । अतश्च सः सम्राट् जातः । तथाऽपि अयं नन्दिनीं छाया इव अनुगच्छति । तथाहि - दिलीपस्यापि शारीरकाः अवसराः भवन्त्येव । तान् अपि अवश्यं अयं संसाधयेत् । परन्तु तान् सर्वान् स्तगयति ।नन्दिनी यावत् उत्थिता भवति तावदयमपि उत्तिष्ठन् एव तं पालयति । यदा तृणखादनाय वा,स्वेच्छागमनाय वा अन्यत्र चलति, शरीरस्य स्तब्धतामपि निराकृत्य तदैव उच्चलितस्सन् नन्दिनीम् अनुसरति। यदा यावत् नन्दिनी भूमौ शरीरं प्रसार्य उपविशति, तदैव, तावदेव दिलीपोऽपि अवसराण्यपि निराकृत्य उपविशति । यदा वा जलं पातुं इच्छति नन्दिनी, तदैव जलं च स पिबति । एवं नन्दिनीं स्वस्याः छाया यथा अनुसरति तथा दिलीपः नन्दिनीं अनुगच्छति । नन्दिन्याः स्वच्छायानुसरणं सहजमेव, तत्र विशेषो न विद्यते । परन्तु, स्वच्छायायाः अनुसरणमिव , दिलीपस्य अनुसरणं तु प्रशस्तम् इति भावः ।

## १३.२.४.प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः।

वाक्यपरिचयः - इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाक्याम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूर्वकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः जाता। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "प्रातः प्रभृति दिलीपः नन्दिनीं छायेव अन्वगच्छत्।सायम् आसीत्। निलयं गन्तुं उद्यमिता नन्दिनी"इत्येतदंशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः- पल्लवरागताम्रा, पल्लव=किसलयस्य, राग=रक्तिमायाः इव, ताम्रा=अरुणा पतङ्गस्य=सूर्यस्य, प्रभा=कान्तिः, मुनेः=वसिष्ठस्य, धेनुः च=नन्दिनी च, (निलयाय= स्वस्था-नाय, गन्तुम्=यातुम्,) प्रचक्रमे=उपचक्रमे।

वाक्यभावः ;नन्दिन्याः समाराधनाय दिलीपः अरण्यम् आगतः, स च श्रद्धया नन्दिन्याः सेवायाम् आसक्तश्च जातः। दिलीपेन सेव्यमाना नन्दिनी च ताम्रा, अरुणवर्णा।सा च पर्यटनेन दिशां मध्यभागान् पावितवती। सायं निलयाय गन्तुं च उद्युक्ता। एवमेव सूर्यस्य सायं प्रभाऽपि अरुणा। सा च किरणव्यापनेन दिगन्तराणि शुद्धं शुभ्रं च कृतवती। ततश्च सायं अस्ताद्रिं गन्तुं च उद्युक्तवती। अत्र सूर्यप्रभा-नन्दिन्योः निलयाय गमनोपक्रमणं ,श्लेषमहिम्ना वर्णयति।तथाहि- सन्ध्यारुणा सूर्यप्रभा स्वीयव्यापनेन दिगन्तराणि पूतानि कृत्वा दिनान्ते अस्ताद्रिं गन्तुं यथा प्रक्रमते तथा पाटलारुणा नन्दिनी अपि स्वीयपर्यटनेन अरण्यस्य चतुरः भागान् पवित्रं कृत्वा दिनान्ते मुनेः आश्रमं गन्तुम् उपक्रमते इति भावः।

## १३.२.५.तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या।

वाक्यपरिचयः - इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "दिलीपेन अनुगम्यमाना , सुदक्षिणया प्रत्युद्गम्यमाना च नन्दिनी सन्ध्या इव नितराम् प्रकाशते " इत्येतदंशं निरूपयन् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः सा = वसिष्ठस्य सम्बन्धिनी, धेनुः=नन्दिनी, तदन्तरे=सुदक्षिणा-दिलीपयोः मध्ये दिनक्षपामध्यगता, दिन=दिवसस्य, क्षपा=रात्रेश्च, मध्यगता=अन्तर्वर्तिनी, सन्ध्या=पाटलारुणा सन्ध्याकान्तिरिव, विरराज=चकास।

वाक्यभाव - सायंकाले दिलीपः वनान्तात् नन्दिन्या सह प्रतिनिवृत्तः। आश्रमप्राङ्गणं च प्राप्तः, दिलीपेन अनुगम्यमना सती नन्दिनी आश्रमं प्रविशति।नाम नन्दिनीं पुरतः कृत्वा पश्चात् दिलीपः अनुगच्छति।आश्रमं प्राप्तां च नन्दिनीं सुदक्षिणा स्वागतीकृत्य अर्चयितुं प्रत्येष्यति। एवम् - आश्रमप्राङ्गणे पथि दिलीपेन पुरतः कृता, सुदक्षिणया च प्रत्यद्गता च नन्दिनी, दिवसः रात्रेश्च मध्यगता सन्ध्याकान्तिः इव विराजते।

## १३.२. ६.भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरः फलानि।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूर्वकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "नन्दिनी स्तिमिता सती सुदक्षिणा-दिलीपयोः अर्चनं परिगृह्णाति" इत्येत- दंशं निरूपयन् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थःभक्त्या = श्रद्धया, उपपन्नेषु = युक्तेषु , तद्विधानाम् = महताम् नन्दिनी सदृशानाम्, प्रसादचिह्नानि, प्रसाद = प्रसन्नतायाः, चिह्नानि = लक्षणानि, पुरः फलानि हि, पुरः= प्रत्यासन्नानि, फलानि = लाभाः कार्यसिद्धयः येषां तानि, तथाविधानि,हि खलु।

वाक्यभावः; नन्दिनी सकृत्प्रसूता, एकसन्ताना, स्ववत्सायाम् नन्दिन्याम् वात्यल्यं च सहजम्। प्रातश्च व्रताचरणाय वनं विसृजति ।सायं पुनः आश्रमम् आगच्छति। आश्रमस्य

आगमनानन्तरम् माता, खलु, स्ववत्सायाः दर्शने उत्सहते च ।परं नन्दिनी निश्चला सती, सुदक्षिणायाः प्रत्युद्गमनम्, प्रदक्षिणम्, प्रणमनम्, पूजनम्, इत्यादिकं, प्रीतिभावेन, स्वीकरोति। तदर्थं , राजदम्पती सुदक्षिणा दिलीपौ अपि,प्रकामं, सुन्तुष्टौ भवतः। तथाहि - महिमान्वितानां प्रभावपूर्णानां च नन्दिनीसदृशानां, स्तिमितता, पूजास्वीकरणम् इत्यादिकं प्रसन्नतायाः लक्षणम्। एतद्धि च जनिष्यमाणानां फलानां सूचकं भवति खलु।

**१३.२.७.चित्रार्पितारम्भ इवावतस्थे।**

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूर्वकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - " नन्दिन्याः उपरि उत्पतन्तं सिंहं हन्तुं उद्युक्तस्य दिलीपस्य बाहुः सायक-पुङ्खे एव संसक्तः भवति " इत्येतदंशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - चित्र=आलेख्यफलके, अर्पित=लिखितः, आरम्भः=बाणनिष्कासनोद्योग, इव=यथा, अवतस्थे=स्थितः

वाक्यभावः - नन्दिनी वसिष्ठस्य यागसाधनम्।सिंहः नन्दिनीं बलाद् आकर्षति।तस्याम् उत्पतति। तस्याः भयं च जनयति।अतः सिहः हन्तुं योग्यः।तस्य च वधाय दिलीपः संसिद्धः भवति। सायकेन प्रहर्तुं च उद्युक्तः भवति। चापं सन्धातुं च दक्षिणहस्तं सायकपुङ्खे प्रसारयति। तत्र च सायकाः वर्तन्ते। सायकानां पृष्ठभागे कंकस्य पक्षिविशेषस्य पत्राणि(Feather) आयोजितानि। तानि विविधवर्णानि भवन्ति। अतः सायकाश्च चित्रतां भजन्ते, तानि च पत्राणि शराणाम् उत्तमत्वं सूचयन्ति। कररुहाणां प्रभाश्च, कङ्कपत्रेषु संलग्नाः, तेन च सायङ्कपुङ्खस्य विशेषकान्तयः संजाताः भवन्ति। तादृशे सायपुङ्खे प्रसारितः हस्तः तत्रैव ससंक्तः भवति। दिलीपश्च आश्चर्येण निश्चेष्टितः भवति।सायकपुङ्खे ससंक्तहस्तस्सन्, आश्चर्येण निश्चेष्टितः, दिलीपः, फलके चित्रितः शरोद्धारणप्रयत्नवान् इव अवभासते।

**१३.२.८.राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः।**

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "दिलीपः संहस्य वधाय उद्युक्तः, दक्षिणबाहुश्च सायकपुङ्खे एव संसक्तः। तेन च दिलीपस्य कोपः द्विरुणीकृतः" इत्येतदेशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - राजा=दिलीपः, स्वतेजोभिः, स्व=आत्मनः दिलीपस्य, तेजोभिः=पराक्रमैः, मन्त्रौष-धिरुद्धवीर्यः, मन्त्र=विषनिवारकमन्त्रैः, ओषधि=वनमूलिकाभिः, च रुद्ध=अवरुद्धः, वार्यः=प्रतापः यस्य सः, भोगी=सर्पः, इव=यथा, अन्ताः=स्वस्मिन्, अदह्यत=अतप्यत।

वाक्यभावः- सिहः नन्दन्याम् उत्पतितः। तं च प्रहर्तुं दिलीपः संसिद्धः। चापं च सन्धातुम् उद्युक्तः।सायकं आक्रष्टुं च दक्षिणः करः पुङ्खे प्रसारितः।स च तत्रैव ससक्तः। क्रियाशीली

,दयाशाली, प्रतापवान् च सन् अपि नन्दिनीं प्रमादात् निवारयितुं निष्फलः इति राजा भृशं पराभवं प्राप्नोति। इदानीं च बाहोः स्तम्भनानत् कोपश्च वर्धितः।समीपे एव स्थितं अपराधिनं सिंहं किमपि कर्तुं स्वपराक्रमाःअसमर्थाः जाताः इति दिलापः आन्दोलनाभरितः भवति।भोगः = फणः,भोगः अस्य अस्तीति भोगी = सर्पः। भोगीणां विषप्रभावः मन्त्रैः वनमूलिकादीनां रसैश्च अवरुध्यते। तदा सर्पाणां सः पराक्रमः, प्रभावश्च अन्तः एव स्थित्वा सर्पान् दहति। प्रकृते मन्त्रैः,वनमूलिकाभिश्च अवरुद्धप्रभावः सर्पः यथा वा अन्तः स्वयं दहति, तथा अपराधिनं शिक्षितुम् असमर्थैः पराक्रमैः दिलीपोऽपि नितान्तं अन्तः दहन् दृश्यते।

## १३.२.९.न पादपोन्मूलनशक्तिरंहः शिलोञ्चये मूर्छति मारुतस्य।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "शस्त्रेण वधार्थम् उद्युमन्तं राजानं वारयन्, सिहः दिलीपं वदति" इत्येतदेशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - पादपोन्मूलनशक्ति,पादप=वृक्षाणाम्,उन्मूल=उत्पाटने, शक्ति=शक्तिः यस्य तत्, मारुतस्य=वायोः, रंहः =वेगः, शिलोच्चये=पर्वते, न मूर्छति=न प्रसरति हि।

वाक्यभावः- हन्तुम् उद्यम्य बाहोः प्रतिष्टम्भनेन अन्तर्दहन्तं दिलीपं सिंहः एवं वदति -' महीपाल! राजन् दिलीप ! श्रमेण अलम्, व्यर्थः प्रयासः, मास्तु। तव शस्त्राणि सर्वाणि अपि मां किमपि कर्तुं न पारयन्ति।प्रयुक्तानि अपि व्यार्थानि एव भवन्ति। परिमितशक्तिः वायोः वेगः पादपानाम् उत्पाटनार्थं भवतु नाम समर्थः, स एव किं पर्वतान् उत्पाटयितुम् अपि समर्थः भवति ? भवतः प्रभावः वायुवेगसदृशः। अहं पुनः शिलोच्चयः। वायोः वेगः शिलोच्चये इव, त्वत्प्रभावः मयि न प्रसरति ' इति दिलीपं प्रगल्भं वदति ।

## १३.२.१० शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "माम् हन्तुं त्वम् असमर्था। वृथाप्रयासो मास्तु, हननात् निवर्तस्व " इत्येतदेशं निरूपयत सिंहः दिलीपं कथयति। इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - रक्ष्यम्=अवश्यं रक्षणीयम्, यद्=यद्वस्तु, शस्त्रेण=अस्त्रेणापि, शक्यरक्षम्=रक्षितुं समर्थं न भवति, तत्=तद्वस्तु, सः विषयः, शस्त्रभृताम्=आयुधधारिणाम्, धनुर्धारिणाम्, यशः= कीर्तिम्, न क्षिणोति= न विनाशयति।

वाक्यभावः - दिलीप!एवम् त्वम् उपायशून्यः ,तव मार्गान्तरं नास्ति। अवमानभारं विहाय निवर्तस्व।गुरौ च तव भक्तिः प्रदर्शित एव।अप्रमत्तस्सन् नन्दिनीं प्रमादात् रक्षितुम् प्रयतितवान् खलु भवान्। विफलः जातः इति तु अन्यदेतत्।गुरौ भक्तिं विना प्राणत्यागायापि सिद्धः कथं

भवेः-दिलीप! श्रुणु!राज्ञां प्रतिवस्तु रक्षणीयमेव। परं यद्वस्तु शस्त्रेणापि रक्षितुं न भवति-तद्विषये विफलता शस्त्रभृतां अप्रतिष्ठायै वा,अवमानाय वा न भवति। सर्वथा असाध्ये कर्मणि शस्त्रभृतः किं कर्तुं पारयन्ति " इति सिंहः दिलीपम् अनुनयति।

## १३.२.११अल्पस्य हेतोर्बहुहातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम्

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः जाता। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "त्वं विचारमूढः इति कथयन् मृगेन्द्रः दिलीपं प्रति" इत्येतदंशं निरूपयत् सिंहः दिलीपं कथयति। इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - बहु=बहुलम् अधिकम् इत्यर्थः, अल्पस्य=स्वल्पस्य, हेतोः=कारणात्, हातुम्=त्यक्तुम्, इच्छन् = अभिलषन् ,त्वम्=दिलीपः, विचारमूढः, विचारे=कार्याकार्यविवेके, मूढः=मूर्खः, इति, मे=मम, प्रतिभासि= लक्ष्यते।

वाक्यभावः - "राजेन्द्र ! दिलीप ! एकच्छत्राधिपत्यं सार्वभौमाधिकारः, प्रतिष्ठाकरं प्रजानाम् आदरणम्, सुन्दरञ्च शरीरम्, नवं वयः च एतानि चत्वारि प्रायशः एकत्र न भवन्ति। एतेषां समावेशः विरलः,स च इदानीम्, भवति =त्वयि ,सम्पन्नः। स च भवतः श्रयसे प्रतिष्ठायै च अलम्। एतेषां एकत्र सङ्गमः प्रायशो न भवति। एतेषां समावेशः पुण्यकृतेषु भवादृशेशेषु एव भवति। एतत् महत् ऐश्वर्यम्। तत्सर्वं अल्पस्य हेतोः हातुं अभिलषसि। परिशील्यमाने दिलीप ! त्वं न तथा विमृश्यकारी,किन्तु विचारे मूढः एव। आलोचनारहितः सन् कर्मसु प्रवर्तसे "इव प्रतिभाससे इति कुम्भोदरः दिलीपं स्वधर्मानुष्ठानतः भ्रष्टं कर्तुं प्रयतते।

## १३.२.१२.महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः जाता। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "भवान् देहार्पणप्रयत्नात् विरमतु " इत्येतदेशं निरूपयत् सिंहः दिलीपं वदति। इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः -महीतल=भूतलस्य, स्पर्शनमात्र=केवलं स्पर्शनेन,भिन्नम्=विभिन्नम्, ऐन्द्रम्=इन्द्रसम्बन्धि, पदम्=स्थानम्, आहुः=कथयन्ति।

वाक्यभावः; "दिलीप ! देहार्पण प्रयत्नात् विरमतु। तव च राज्यम् ऋद्धम्; समृद्धिसम्पन्नम्। देहार्पणेन राज्याधिकारः नष्टः भवति। तच्च न तथा विचारसहम्। राज्याधिकारः राज्ञः धन-कनक- वस्तु- वाहनादिसौकर्यान् समयोजयति। समृद्धं राज्यं केवलं भूलोकमात्रभिन्नम् ऐन्द्रं पदं व्यवहरन्ति। ऐन्द्रम् स्वर्गसम्बन्धि, राज्यम् तु भौमम् प्रभुत्वम्। तदेकः एव भेदः ।अन्यत् सर्वं स्वर्गाधिपत्य-राज्याधिपत्ययोः समानम्। सौर्वभौमाधिकारः, प्रजानाम् आदरणम् ,युक्तं

वयः, सुन्दरं वपुः, एषा भवतः कल्याणपरम्परा। ताम् अनुभुज्य देहश्च ऊर्जस्वलः बलिष्ठश्च जातः। बलसम्पन्नम् इमं देहं अखिलजगत् त्राणाय परिरक्षतु "इति मृगेन्द्रः दिलीपं सन्दिशति।।

## १३.२.१३.राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "क्षत्रियशब्दस्य व्युत्पत्तिं उदारं अर्थं च ज्ञापयन् दिलीपः सिहं प्रति एवं वदति् " इत्येतदेशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - तद्विपरीतवृत्तेः, तत्=नाशस्य रक्षणात् , विपरीतवृत्तेः,विपरीत = विरुद्ध, वृत्तेः = व्यापारस्य,प्रवर्तनस्य क्षत्रियस्य, राज्येन = राज्यपालनेन, किम् = किम् प्रयोजनम्, उक्रोशमलीमसैः, उक्रोश = निन्दया,मलीमसैः = मलिनैः, प्राणैः = असुभिः, वा = अपि, किम् प्रयोजनम्, निन्दितस्य सर्वं व्यर्थमिति भावः।

वाक्यभावः -"मृगेन्द्र ! कुम्भोदर!क्षत्रियशब्दः उदात्तः उत्तमः महोन्नतश्च। क्षतः नाम नाशः।त्रायते इति त्रः।क्षतात् नाशात् त्रायते इति व्युत्पत्त्या निष्फन्नः क्षात्रः = क्षत्रियः इति शब्दः आपन्नरक्षकः इत्यर्थपरतया जगत्प्रसिद्धः। प्राणिनम् असंरक्ष्य, गुरोः आदेशनम् अपरिपाल्य, जुगुप्सितैः एतैः प्राणैः किं प्रयोजनम्।आपन्नम् असंरक्ष्य तद्विपरीततया व्यवहृत्य अहं क्षत्रियः कथं स्याम् क्षत्रियविपरीतवृत्तेः मम ,राज्येन किं प्रयोजनम्। अतः मम देहस्य स्वीकरणेन नन्दिनीं विसृजतु " इति दिलीपः मृगेन्द्रं विज्ञापयति।

## १३.२.१४इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयाऽस्यात्।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "नन्दिनी असमाना" इति दिलीपः मृगेन्द्रं वदति इत्येतदंशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः -इमाम् = नन्दिनीधेनुम्, सुरभेः = कामधेनोः,अनूनाम् = समानाम्,अवेहि = जानीहि,(त्वमिति शेषः), अस्याम्= एतस्याम् नन्दिन्याम् , त्वया = कुम्भोदरेण सिंहेन, प्रहृतम् तु = आक्रमणम् तु, रुद्रौजसा, रुद्रस्य =महेश्वरस्य ,ओजसा=प्रभावेण (स्यात् = कृतम् भवेत् )।

वाक्यभावः - "मृगेन्द्र! कुम्भोदर !वसिष्ठः अस्माकं कुलगुरुः,तस्य आदेशनं शिरोधार्यम्। स नन्दिन्याः व्रचाचरणम्,तस्याः पालनं च आदिष्टवान्। मया अनुष्ठातव्यम् एव।अन्यथा गुरोः आदेशभङ्गः ,अपराधः भवति । तत् दण्डनाय कल्पते । केटिशः अन्याः गावः नन्दिन्या कथं समानाः भवन्ति? इयं कामधेनोः सन्ततिः, इमाम् कामधेनोः अनूनां दिव्याम् अवेहि। नन्दिन्याम् अस्याम् तव उत्पतनन्तु रुद्रमहिम्ना जातं स्यात्,भवान् रुद्रस्य किंकरः खलु। इतरः कोपि नन्दिनीं मनस्यपि प्रधर्षयितुं न शक्नोति। तस्मात् दिव्याम् एनाम् विमुञ्चतु" इति

दिलीपः मृगेन्द्रस्य नन्दिन्याः दिव्यत्वं विज्ञापयति।

**१३.२.१५.न पारणा स्याद्विहता, तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः।**

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूर्वकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "मत् देहार्पणं कार्यद्वयं साधयति इति दिलीपः सिहं विज्ञापयति" इत्येतदशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - एवम् =एवम् कृते सति, तव = सिंहस्य, भवतः कुम्भोदरस्य,पारणा = भोजनम्, विहता =नष्टम् , न = न, स्यात् =भवेत्, मुनेः = महर्षेः,वसिष्ठस्य,क्रियार्थः = यज्ञ-याग-होमादिप्रयोजनम्, अलुप्तः = अनष्टः,भवेत्=स्यात्,

वाक्यभावः - "मृगेन्द्र ! आहारविषये परमेश्वरेण प्रदिष्टकलः अङ्कागतसत्त्वः भवता नैव परिहरणीयः।तव तु आहारः आवश्यकः।तव आहारश्च नैव अपहरणीयः। नन्दिनी वसिष्ठस्य यागसाधनम्, यज्ञ - यागादीनाम् देवकार्याणाम्, श्राद्धीदीनां पितृकार्याणाम्, अतिथीनाम्,अभ्यागतानां, च प्रयोजनानि संरक्षति। गुरोः आदेशेन अस्याः व्रताचरणपरः भवामि। अस्याः संरक्षणम् मम विधिः। मृगेन्द्र ! यथा तव आहारः अपहृतः न भवेत् , मुनेः क्रियार्थश्च अलुप्तः भवेत् तथा उभयप्रयोजनसाधकतया मदीयदेहस्य अर्पणं समचितम्। अहम् अपि समी पागतजन्तुः, परमेश्वरेण प्रदिष्टकालः एव। अतः मदीयदेहार्पणनिष्क्रयेण भवतः इयं नन्दिनी मोचयितुं युक्ता" इति दिलीपः स्वदेहर्पणस्य समुचितत्वं मृगेन्द्रस्य विज्ञापयति।

**१३.२.१६.स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य, रक्ष्यं स्वयमक्षतेन।**

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूर्वकालीनः।संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य'इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः- "सेवकस्य बाध्यता गरीयसी" सिंहः दिलीपं वदति इत्येतदेशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः -क्ष्यम्= पालनीयम् वस्तु,विनाश्य = विनाशं प्रापयित्वा,स्वयम् = आत्मना,अक्षतेन= व्रणरहितेन, नियोक्तुः= स्वामिनः,अग्रे=पुरतः, स्थातुम्=स्थितिं कर्तुम्, शक्यम् = योग्यम्,न हि = न भवति हि।

वाक्यभावः -मृगेन्द्र ! भवान् अष्टमूर्तेः किकरः, अहं वसिष्ठस्य शिष्यः ।भवता परमेश्वरेण प्रदिष्टं पलनीयम्। मया वसिष्ठेन आदिष्टं संरक्षणीयम्। भवतः देवदारुवृक्षस्य परिरक्षणविषये बाध्यता महती। मम च नन्दिन्याः संरक्षणे बाध्यता च महती। एवं परतन्त्रयोः आवयोः उभयोः बाध्यताः, भाराः च समानाः। एतान् सर्वान् भवान् अपि सम्यक् जानाति। क्लिष्टकाले एव खलु सहकारः अपेक्षते।

अपि च स्वयम् अव्रणितस्सन् ,रक्ष्यं अपरिपाल्य ,नियोक्तुः अग्रेः भवनम्,तस्य क्रोधाय

कल्पते। तेषां अग्रे स्थित्वा असमर्थतायाः निवेदनं उदात्तचरितानाम् अस्माकम् अप्रतिष्ठायै भवति" इति दिलीपः ,तयोः अस्वातन्त्र्यं मृगेन्द्राय विज्ञापयति।

## १३.२.१७.एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "दिव्यानां भौतिकपदार्थेषु अनासक्तिः" इति दिलीपः मृगेन्द्रं विज्ञापयति इत्येतदेशं निरूपयत् कथयति। इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - एकान्तविध्वंसिषु, एकान्त =नियमेन अवश्यम् ,विध्वंसिषु = नाशशीलिषु,मद्विधानाम् = मत्सदृशानाम् राज्ञाम्, भौतिकेषु = पञ्चभूतात्मकेषु, पिण्डेषु = शरीरेषु, अनास्था खलु = अनपेक्षा प्रसिद्धिः हि।

वाक्यभावः - " मृगेन्द्र ! भवान् दयावान् -परेषां हिंसनम् तव नाभिमतम्। अयं च मदीयः देहः भौतिकः, पञ्चभूतैः (पृथिवी -अप्- तेजो-वायु-आकाशैः) आरचितः। भौतिकः अयं देहः अहिंस्यत्वेन भवतः न चेत् सम्मतः, तदा मदीयेन यशश्शरीरेण उदरवृत्तिं पूरयितुं प्रसीद। तथाहि - मृगेन्द्र ! भवान् परमेश्वरस्य किङ्करः खलु दिव्यः,परमेश्वरेण दिव्यः सम्बन्धः विद्यते। अवश्यं विध्वंसी, नष्ट शीली, अनित्यः पदार्थः।दिव्यसम्बन्धिनाम् भवादृशानां, अवश्यं विध्वंसिषु मादृशानां भौतिकेषु पिण्डेषु अनिष्टता सहजा एव खलु" इति दिलीपः मृगेन्द्रस्य यशश्शरीरग्रहणं मार्गान्तरम् अपि सूचयति।

## १३.२.१८.तद्भूतनाथानुग !नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम्।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः "स्नेहितस्य प्रार्थना माननीया" इति दिलीपः सिहं विज्ञापयति इत्येतदेशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - हे भूतनाथानुग !=शिवानुचर, सम्बन्धिनः=मित्रस्य, मे=दिलीपस्य, प्रणयं=अभ्यर्थनाम् ं विहन्तुम्=नाशयितुम्, न अर्हसि=न योग्योऽसि।

वाक्यभावः - अत्र सम्बन्ध शब्दस्य समीचीनः बन्धः सम्बन्धः स्नेहः इत्यर्थः। "मृगेन्द्र ! स्नेहः सर्वदा सम्भाषणपूर्वकः भवति। तत् च वनमध्ये समागतयोः आवयोः जातम्। इदानीं आवाम् स्नेहितौ। मृगेन्द्र ! तव नियोजकः भूतानां नाथः परमेश्वर; भूतेषु स्नेहवर्ती, भवान् च तस्य अनुगः सेवकः । अवश्यं भवानपि अत्यन्तं स्नेहशीली स्याः।अतः मृगेन्द्र ! स्नेहितस्य मम प्रार्थनां निराकर्तुं नार्हसि " इति देहार्पणेन नन्दिन्याः विमोचनाय दिलीपः मृगेन्द्रं विज्ञापयति।

### १३.२.१९. औधस्यमिच्छामि तवोपभोक्तुम्, षष्ठांशमुर्व्याः इव रक्षितायाः।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

श्लोकसन्दर्भः - "दिलीपः वत्सहुतावशेषं पयः पातुं नन्दिनीं विज्ञापयति" इत्येतदंशं निरूपयत् इदं वाक्यं नन्दिनीवरप्रदाननामके द्वितीयसर्गे नन्दिन्यनुग्रह-कथाभागे वर्तते।

वाक्यार्थः -तव= भवत्याः ,औधस्यम् = दुग्धम्, रक्षितायाः = पालितायाः, उर्व्याः = पृथिव्याः,षष्ठांशम् = षष्ठभागम् ,इव = यथा ( वसिष्ठस्य, अनुज्ञाम् अधिगम्य )उपभोक्तुम् = पातुम्, इच्छामि =अभिलषामि।

वाक्यभावः - दिलीपः सुदक्षिणायाम्- इह लोके प्रतिष्ठासम्पादनार्थं कीर्तिसम्पन्नं वृणोति।पितॄणां पुण्यलोकावाप्त्यर्थं श्राद्धादीनामाचरणाय वंशोद्धारकं च तनयं अभिलषति। प्रातः प्रभृतिरुचिकरतृणानां भक्षणात्, सायंकाले वत्सस्य स्मरणात् च गोः ऊधसि क्षीरं स्रवते, तत् प्रस्रवणं भवति। तादृशी इयं प्रस्त्रविणी नन्दिनी कामदुघा भवति ।दिलीपाय "तथा" इति प्रतिशृणोति।अनन्तरं दिलीपं "पुत्र! दिलीप ! पत्र पुटे मदीयं पयः दुग्ध्वा पिब" इति दिलीपं च आदिशति।दिलीपश्च वत्स-हुत-अवशेषं पातुं नन्दिनीं विज्ञापयति। नन्दिनी च अङ्गीकरोति।

### १३.२.२०.पपौ वसिष्ठेन कृताभ्युनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः - "दिलीपस्य वसिष्ठस्य अनुमतिं स्वीकृत्य नन्दिन्याः पयः पिबति " इत्येतदंशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः -वसिष्ठेन=महर्षिणा,कृताभ्यनुज्ञः, कृत=प्राप्त, अनुज्ञः=अनुमतिः, सः=दिलीपः,(वत्सहुतावशेषं धेनोः क्षीरम्) = शुभ्रम् = निर्मलम्, मूर्तम्=आकृतिम् आपन्नम्, यशः=कीर्तिम् , इव=यथा, अतितृष्णः =अतिशयितया तृष्णया सहितः सन्, पपौ=पीतवान्।

श्लोकभावः - दिलीपः पवित्रशीलः,पुण्यात्मा।अपि च अयं साधुषु वत्सलः, स्नेहप्रवर्तनः।तादृशः अयं दिलीपः वत्सायाः पानस्य अनन्तरम्, होमार्थविधेश्च अनन्तरम् अवशिष्टं नन्दिन्याः पयः पातुं गुरोः अनुमतिं प्राप्य मूर्तीभूतं स्वीयं यशः इव तृष्णया पिबति।

### १३.२.२१.नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम्।

वाक्यपरिचयः- इदं वाक्यं रघुवंशे वर्तते। रघुवंशं च महाकाव्यम्, एकोनविंशतिसर्गात्मकम्। रघुवंशं च कालिदासः रचितवान्। अयं क्रीस्तोः पूवकालीनः। संस्कृतकाव्यसाहित्ये 'उपमा कालिदासस्य ' इति ख्यातिः अस्ति। अस्य कवित्वं सरलम्, सरसम्, सुन्दरञ्च भवति।

वाक्यसन्दर्भः -"सन्तानार्थाय विधये नन्दिन्याः व्रताचरणं परिसमाप्य सुदक्षिणया साकं राजथानीं आगच्छन्तं दिलीपं दृष्ट्वा पौराः प्रकामं प्रीताः भवन्ति" इत्येतदंशं निरूपयत् इदं वाक्यं द्वितीयसर्गे वर्तते।

वाक्यार्थः - नवोदयम् =नूतनाभ्युदयम्,औषधीनाम् = वनस्पतीनाम्, नाथम्= स्वामिनम्,सोमम्=चन्द्रम्, तृप्तिम्= सन्तोषम्, अनाप्नुवद्भिः=अलभमानैः,नेत्रैः=नयनैः, इव =यथा,तम्=राजानम्,पपुः= सतृष्णम् अवलोकयामासुः।

वाक्यभावः - सुदक्षिणा -दिलीपौ राजथानीं प्राप्नुतः ।दिलीपः नन्दिन्याः व्रताचरणेन, नन्दिन्याः वरप्रदानेन च सन्तुष्टः भवति। उल्लासी च भवति। राजथान्यां पौराश्च दिलीपम् अदृष्ट्वा बहुकालं भवति।दिलीपं द्रष्टुं च पौराणाम् उत्कण्ठा च अधिका वर्तते।सन्तानार्थं गोसेवाव्रता चरणेन दिलीपस्य शरीरं कृशं जायते। ओषधीनां पतिः चन्द्रः। तस्य उदयनं सर्वेषां सन्तोषजनकं भवति। सदा पश्यन् अपि तृप्तिस्तु नैव भवति। प्रकृते चन्द्रस्य उदयं सदा पश्यन् अपि जनः यथा नैव तृप्तः भवति, एवं सुदक्षिणया सह राजथानीं प्रति आगच्छन्तं दिलीपं सदा पश्यन्तः अपि प्रजाः तृप्तिं न आप्नुवन्ति।तथा तृप्तिम् अनाप्नुवद्भिः नेत्रैः दिलीपं पिबन्ति । पौराः अमितोत्कण्ठया पश्यन्ति इति भावः।

## १३.३.उपसंहारः

एवम् अत्र पाठ्यांशे कतपयानि वाक्यानि सन्दर्भपुरस्सरं व्याख्यातानि । एवम् एव अन्येषाम् वाक्यानाम् अपि विषये अभ्यासं कुर्वन्ति। सङ्क्षिप्तविवरणदानाय आवश्यकानां परिचय - सन्दर्भ - अर्थ - भावानां लेखने अभ्यासं सम्पादयन्ति।

## १३.४.अभ्यासः

द्वौ ससन्दर्भं व्याख्यात ?

अ) स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।

इ) उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः।